M. T. B. COLLEGE, SURAT
Manuscripts Library
BM No. Ref. BM
Ser. 319
Title: Siddhanta Kaumudi
(Uttarardha)

319

Siddhānta Kaumudī	: Title
(Uttarārdha)	: Author
Complete	: Editor
	: Year, Vols.
	: Publisher
	: Remarks

319

सि॰ कौमु॰॥ श्रीगणेशायनमः॥ ॥श्रीसरस्वत्यैनमः॥ ॥श्रीआर्हंतीवचैर्गुण्यैर्महर्षिभिरहर्दिवं॥ नोष्टूयमानोप्यगुणोविभुर्विजयते तिङ॰ ७॰
॥१॥ तराम्॥१॥ पूर्वार्धेकथितास्तुर्यपंचमाध्यायवर्तिनः॥ प्रत्ययाअथकथ्यंतेतृतीयाध्यायगोचराः॥२॥ तत्रादौदशलका
राःप्रदर्श्यंते॥ ॥लट्॥लिट्॥लुट्॥लृट्॥लेट्॥लोट्॥लङ्॥लिङ्॥लुङ्॥लृङ्॥१॥ ॥एषुपंचमोलकारश्छंदोमात्रगोचरः॥
वर्तमानेलट्॥ वर्तमानक्रियावृत्तेर्धातोर्लट्स्यात्॥ अटावितौ॥ लःकर्मणिचभावेचाकर्मकेभ्यः॥ लकाराःसकर्मकेभ्यःकर्म
णिकर्तरिचस्युःअकर्मकेभ्योभावेकर्तरिच॥ लस्य॥ अधिकारोयं॥ तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्व
हिमहिङ्॥ एतेष्टादशलस्यादेशाःस्युः॥ लःपरस्मैपदं॥ लादेशाःपरस्मैपदसंज्ञास्युः॥ तङानावात्मनेपदं॥ तङ्प्रत्याहारः
शानच्कानचौचैतत्संज्ञास्युःपूर्वसंज्ञापवादः॥ अनुदात्तङितआत्मनेपदं॥ अनुदात्तेतउपदेशेयोङित्तदंताच्चधातोर्लस्य
स्थानेआत्मनेपदंस्यात्॥ स्वरितञितःकर्त्रभिप्राये क्रियाफले॥ स्वरितेतोञितश्चधातोरात्मनेपदंस्यात्॥ स्वरितञितःक ॥१॥
र्त्रभिप्रायेक्रियाफले॥ स्वरितेतोञितश्चधातोरात्मनेपदंस्यात्कर्तृगामिनिक्रियाफले॥ शेषात्कर्तरिपरस्मैपदं॥ आत्मनेप

दनिमित्तहीनाद्धातोःकर्तरिपरस्मैपदंस्यात्॥ तिङस्त्रीणित्रीणिप्रथममध्यमोत्तमाः॥ तिङउभयोःपदयोःस्त्रयस्त्रिकाःक्रमादेतत्सं
ज्ञास्युः॥ तान्येकवचनद्विवचनबहुवचनान्येकशः॥ लब्धप्रथमादिसंज्ञानितिङस्त्रीणित्रीणिप्रत्येकमेकवचनादिसंज्ञानिस्युः॥ युष्मद्यु
पपदेसमानाधिकरणेस्थानिन्यपिमध्यमः॥ तिङ्वाच्यकारकवाचिनियुष्मदिप्रयुज्यमानेऽप्रयुज्यमानेचमध्यमःस्यात्॥ प्रहासेचम
न्योपपदेमन्यतेरुत्तमएकवच्च॥ मन्यधातुरूपपदंयस्यधातोस्तस्मिन्प्रकृतिभूतेसतिमध्यमःस्यात्परिहासेगम्यमानेमन्यतेरुत्त
मःस्यात्सचैकार्थस्यवाचकःस्यात्॥ अस्मद्युत्तमः॥ तथाभूतेऽस्मद्युत्तमःस्यात्॥ शेषेप्रथमः॥ मध्यमोत्तमयोरविषयेप्रथमःस्यात्
सूसमत्राप्यां॥ कर्तृविवक्षायांभूतिइतिस्थिते॥ तिङ्शित्सार्वधातुकं॥ तिङःशिच्चधात्वधिकारोक्तःएतत्संज्ञास्युः॥ कर्तरिशप्॥ कर्त्र
र्थेसार्वधातुकेपरेधातोःशप्स्यात्॥ शपावितौ॥ सार्वधातुकार्धधातुकयोः॥ अनयोःपरयोरिगंतांगस्यगुणःस्यात्॥ अवादेशः॥
भवति॥ भवतः॥ झोंतः॥ प्रत्ययावयवस्यझस्यान्तादेशःस्यात्॥ अतोगुणे॥ भवंति॥ भवसि॥ भवथः॥ भवथ॥ अतोदीर्घोयञि॥ अ
तोंगस्यदीर्घःस्यात्यञादौसार्वधातुकेपरे॥ भवामि॥ भवावः॥ भवामः॥ ॥सभवति॥ तौभवतः॥ तेभवंति॥ त्वंभवसि॥ अहंभवामि॥ एहि
मन्यओदनंभोक्ष्यसेभुक्तःसोतिथिभिः॥ एतं॥ एत॥ वामन्ये ओदनंभोक्ष्येथे॥ भोक्ष्यध्वे॥ भोक्ष्ये॥ भोक्ष्यावहे॥ भोक्ष्यामहे॥ इत्यादि॥ मन्य

सि॰ कौ॰ से॰ मन्ये॰ मन्यध्वे॰ इत्यादिरर्थः॥ युष्मद्युपपदे इत्याद्यनुवर्तते॥ तेनेहन॥ एतु सरान्मन्यते॥ ओदनं भोक्ष्यइति॥ प्रहासे किं॥ यथार्थे कथ ति॰ भ्वा॰
॥ २ ॥ नेमा भूत॥ एहि मन्यसे॰ ओदनं भोक्ष्यइति॥ भुक्तः सोतिथिभिरित्यादि॥ परोक्षे लिट्॥ भूतानद्यतनपरोक्षार्थवृत्तेर्धातोर्लिट् स्यात्॥ ल
स्यति वादयः॥ लिट् च॥ लिडादेशस्तिङार्धधातुकसंज्ञ एव स्यात् न तु सार्वधातुकसंज्ञः॥ तेन शबादयो न॥ परस्मैपदानां णलतु
सुस्थलथुसणल्वमाः॥ लिटस्तिबादीनां णलादयः स्युः॥ भू अ इति स्थिते॥ भुवो वुग्लुङ्लिटोः॥ भुवो वुगागमः स्याल्लुङ्लिटो
रचि॥ नित्यत्वाद्वुक् गुणवृद्धी बाधते॥ एकाचो द्वे प्रथमस्य॥ अजादेर्द्वितीयस्य॥ अधिकारोयं॥ लिटि धातोरनभ्यासस्य॥ लिटि परे अ
नभ्यासधात्ववयवस्यैकाचः प्रथमस्य द्वे स्त आदिभूतादचः परस्य तु द्वितीयस्य॥ भूव भूव इति स्थिते॥ पूर्वोभ्यासः॥ अत्र ये द्वे वि
हिते तयोः पूर्वोभ्याससंज्ञः स्यात्॥ हलादिः शेषः॥ अभ्यासस्यादिर्हल् शिष्यते अन्ये हलो लुप्यंते॥ इति वलोपः॥ ह्रस्वः॥ अभ्या
सस्याचो ह्रस्वः स्यात्॥ भवतेरः॥ भवतेरभ्यासोकारस्य अः स्याल्लिटि॥ अभ्यासे चर्च॥ अभ्यासे झलां चरः स्युर्जशश्च॥ झशां
जशः २ जशः खयां चरः॥ तत्रापि प्रकृतिजशां प्रकृतिजशः प्रकृतिचरां प्रकृतिचरः इति विवेक आंतरतम्यात्॥ असिद्धवदत्राभात्॥ इत्ऊ ॥ २ ॥
र्ध्वमाभाद परिसमाप्तेराभीयं समानाश्रये तस्मिन्कर्तव्ये तदसिद्धं स्यात्॥ इति वुको सिद्धत्वाद् उवङ् प्राप्ते॥ वुग्युटावुवङ्यणोः

सिद्धौ वक्ष्यो॥ बभूव॰ बभूवतुः॰ बभूवुः॥ आर्धधातुकस्येड्वलादेः॥ वलादेरार्धधातुकस्येडागमः स्यात्॥ बभूविथ॰ बभूवथुः॥ बभूव॥ बभूव॰ ब
भूविव॰ बभूविम॥ ॥ अनद्यतने लुट्॥ भविष्यत्यनद्यतनेर्थे धातोर्लुट् स्यात्॥ स्यतासी लृलुटोः॥ लृ इति लृङ्लृटोर्ग्रहणं॥ धातोः सामान्य॰
स्यतासी एतौ प्रत्ययौ स्तो लृलुटोः परतः शबाद्यपवादः॥ आर्धधातुकं शेषः॥ तिङ्शिद्भ्योन्यो धातोरिति विहितः प्रत्यय एतत्संज्ञः स्यात्॥
इट्॥ लुटः प्रथमस्य डारौरसः॥ डा रौ रस एते क्रमात्स्युः॥ डित्वसामर्थ्यादभस्यापि टेर्लोपः॥ पुगंतलघूपधस्य च॥ पुगंतस्य लघूपधस्य
चांगस्येको गुणः सार्वधातुकार्धधातुकयोः॥ येन नाव्यवधानं तेन व्यवहितेपि वचनप्रामाण्यात्॥ तेन भिनत्तीत्यादाविनक्ष्यवहितस्य
कोन गुणः॥ भवित आ॥ अत्र को गुणे प्राप्ते॥ दीधीवेवीटां॥ दीधीवेव्योरिटश्च गुणवृद्धी न स्तः॥ भविता॥ तासस्त्योर्लोपः॥ तासेरस्तेश्च लो
पः स्यात्सादौ प्रत्यये परे॥ रि च॥ रादौ प्रत्यये परे प्राग्वत्॥ भवितारौ॥ भवितारः॥ भवितासि॰ भवितास्थः॥ भवितास्थ॥ भवितास्मि॥ भवि
तास्वः॰ भवितास्मः॥ लृट् शेषे च॥ भविष्यदर्थे धातोर्लृट् स्यात् क्रियार्थायां क्रियायां सत्यामसत्यां वा॥ स्यः॥ इट्॥ भविष्यति॥ भविष्यतः॥
भविष्यंति॰ भविष्यसि॥ भविष्यथः॥ भविष्यथ॰ भविष्यामि॥ भविष्यावः॥ भविष्यामः॥ ॥ लोट् च॥ विध्यादिष्वर्थेषु धातोर्लो
ट् स्यात्॥ आशिषि लिङ्लोटौ॥ एरुः॥ लोट इकारस्य उः स्यात्॥ भवतु॥ तुह्योस्तातङ्ङाशिष्यन्यतरस्यां॥ आशिषि तुह्योस्तातङ् [illegible]

सिद्धां॰ कौ॰ वास्यात्॥ अनेकाल्शित्सर्वस्य॥ आदेशः॥ यद्यपि ङिच्चेत्ययमपवादस्तथापि अनन्त्यार्थं ङित्वमनङादिषु चरितार्थमिति गुणवृद्धिप्रतिषेधसंप्रसा ति॰ प्रा॰
॥३॥ रणादौ चर्यतया सावकाशप्रयोजनं ङकारे तातङिमं परं प्रवृत्तः परेण बाध्यते॥ इहोत्सर्गापवादयोरपि समबलत्वात्॥ भवतात्॥ लोटो लङ्व-
त्॥ लोटो लङ्वत्कार्यं स्यात्तेन तामादयः सलोपश्च॥ तथाहि॥ तस्थस्थमिपां तांतंतामः॥ ङितश्चतुर्णां तामादयः क्रमात्स्युः॥ नित्यं ङि-
तः॥ सकारांतस्य ङिदुत्तमस्य नित्यं लोपः स्यात्॥ अलोंत्यस्येति सस्य लोपः॥ भवतां॥ भवंतु॥ सेर्ह्यपिच्च॥ लोटः सेर्हिः स्यात्सोऽपिच्च॥ अ-
तो हेः॥ अतः पर स्य हेर्लुक् स्यात्॥ भव॥ भवतात्॥ भवतं॥ भवत॥ मेर्निः॥ लोटो मेर्निः स्यात्॥ आडुत्तमस्य पिच्च॥ लोडुत्तमस्याडा-
गमः स्यात्स पिच्च॥ हिन्योरुत्वं न इकारोच्चारणसामर्थ्यात्॥ भवानि॥ भवाव॥ भवाम॥ ॥ अनद्यतने लङ्॥ अनद्यतनभूतार्थवृ-
त्तेर्धातोर्लङ् स्यात्॥ लुङ्लङ्लृङ्क्ष्वडुदात्तः॥ एषु परेष्वंगस्याडागमः स्यात्स चोदात्तः॥ इतश्च॥ ङितो लस्य परस्मैपदमिकारांतं य-
त्तस्य लोपः स्यात्॥ अभवत्॥ अभवतां॥ अभवन्॥ अभवः॥ अभवतं॥ अभवत॥ अभवं॥ अभवाव॥ अभवाम॥ ॥ विधिनिमंत्र-
णामंत्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ्॥ एष्वर्थेषु धातोर्लिङ् स्यात्॥ विधिः प्रेरणं भृत्यादेर्निकृष्टस्य प्रवर्तनं॥ निमं- ॥३॥
त्रणं नियोगकरणं॥ आवश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनं॥ आमंत्रणं कामचारानुज्ञा॥ अधीष्टः सत्कारपूर्वको व्यापारः॥ प्र

एवं चतुर्वचनानामेकार्थे कृते प्रवर्तनार्थे एव चतुर्णां पृथगुपादानं प्रपंचार्थः ५ अनुबंधकार्ये अनल्विधाविति स्थानिवत्त्वाभावात्तु न ङित्करणं २५

वर्तनायां लिङ्॥ चतुर्णां पृथगुपादानं प्रपंचार्थं॥ यासुट् परस्मैपदेषूदात्तो ङिच्च॥ लिङः परस्मैपदानां यासुडागमः स्यात्स चोदात्तो ङिच्च॥ ङिच्चो-
क्तौ यत्नेन अनुबंधकार्येष्वनल्विधाविति प्रतिषेधः इति॥ आदेशस्य स्थानिवत्त्वेन शिलमपीह लिंगं॥ सुट् तिथोः॥ लिङस्तकारथकारयोः सुट्
स्यात्॥ सुटा यासुट् बाध्यते॥ लिङो यासुट् तकारस्य सुडिति व्याख्यानात्॥ लिङः सलोपोनंत्यस्य॥ सार्वधातुकलिङोनंत्यस्य सस्य लोपः स्या-
त्॥ इति सकारद्वयस्यापि निवृत्तिः॥ सुटः श्रवणं त्वाशीर्लिङि॥ स्फुटतरं तु तत्रात्मनेपदे॥ अतो येयः॥ अतः परस्य सार्वधातुकावयवस्य या-
स इत्यस्य इय् स्यात्॥ गुणः॥ यलोपः॥ भवेत्॥ सार्वधातुके किं॥ चिकीर्ष्यात्॥ मध्येपवादन्यायेन ह्यतो लोप एव बाध्यते॥ भवेदित्यादौ
तु परत्वाद्दीर्घः स्यात्॥ भवेतां॥ झेर्जुस्॥ लिङो झेर्जुस् स्यात्॥ उस्यपदांतात्॥ अपदांतादवर्णादुसि परे पररूपमेकादेशः स्यात्॥
इति प्राप्ते परत्वान्नित्यत्वाच्चातो येय इति प्राञ्चः॥ यद्यप्यंतरंगत्वात्पररूपत्वं न्याय्यं तथापि यास इत्यस्य इयिति व्याख्येयं॥ एवं च
सलोपस्याप्यपवादः इय्॥ अतो येय इत्यत्र तु संधिरार्षः॥ भवेयुः॥ भवेः॥ भवेतं॥ भवेत॥ भवेयं॥ भवेव॥ भवेम॥ ॥ लिङाशिषि॥ आशिषि
लिङ् स्तिङ् आर्धधातुकसंज्ञः स्यात्॥ किदाशिषि॥ आशिषि लिङो यासुट् कित् स्यात्॥ स्कोरिति सलोपः॥ क्ङिति च॥ गित्कित्ङिन्निमित्ते इ-
ग्लक्षणे गुणवृद्धी न स्तः॥ भूयात्॥ भूयास्तां॥ भूयासुः॥ भूयाः॥ भूयास्तं॥ भूयास्त॥ भूयासं॥ भूयास्व॥ भूयास्म॥ ॥ लुङ्॥ भूतार्थे ॥४॥
धातोर्लुङ् स्यात्॥ माङि लुङ्॥ सर्वलकारापवादः॥ स्मोत्तरे लङ् च॥ स्मोत्तरे माङि लङ् स्याल्लुङ् च॥ च्लि लुङि॥ शबाद्यपवादः॥ च्लेः सिच्॥

७ अतो दीर्घो यञि अतो येय इत्येतयोः समबलत्वात्परत्वाद्दीर्घः ८

॥ कौमु० ॥
॥ ४ ॥

र्वितेः ॥ गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु ॥ एभ्यः सिचो लुक् स्यात् परस्मैपदेषु ॥ गापाविहेणादेशपिबती गृह्येते ॥ भूसुवोस्तिङि ॥ भू ति० भ्वा०
सू एतयोः सार्वधातुके तिङि गुणो न स्यात् ॥ अभूत् ॥ अस्तिसिचोऽपृक्ते ॥ सिच् अस्ते इति समाहारद्वंद्वः ॥ सिच इत्यस्य सौत्रं भत्वं ॥ अस्तीत्यव्ययेन क-
र्मधारयः ॥ ततः पंचम्याः सौत्रो लुक् ॥ विद्यमानात् सिचो अस्तेश्च परस्यापृक्तस्य हल ईडागमः स्यात् ॥ इति इण्णे द ॥ सिचो लुप्तत्वात् ॥ अभूत् ॥ अभूत-
तां ॥ (अभूवन्) हल्ङ्याब्भ्यो दीर्घात् ॥ अभूतां ॥ सिजभ्यस्तविदिभ्यश्च ॥ सिचोऽभ्यस्ताद्विदेश्च परस्य ङित्संबंधिनो झेर्जुस् स्यात् ॥ इति प्राप्ते ॥
आतः ॥ सिज्लुकि आदंतादेव झेर्जुस् स्यात् ॥ अभूवन् ॥ अभूः ॥ अभूतं ॥ अभूत ॥ अभूवं ॥ अभूव ॥ अभूम ॥ नमाङ्योगे ॥ अडाटौ न स्तः ॥ मा
भवान् भूत् ॥ मास्म भवत् ॥ मास्म भूत् ॥ ॥ लिङ्निमित्ते लृङ् क्रियातिपत्तौ ॥ हेतुहेतुमद्भावादि लिङ्निमित्तं तत्र भविष्यत्यर्थे लृङ् स्यात्
क्रियाया अनिष्पत्तौ गम्यमानायां ॥ अभविष्यत् ॥ अभविष्यतां ॥ अभविष्यन् ॥ अभविष्यः ॥ अभविष्यतं ॥ अभविष्यत ॥ अभविष्यं ॥
अभविष्याव ॥ अभविष्याम ॥ ॥ ते प्राग्धातोः ॥ ते गत्युपसर्गसंज्ञा धातोः प्रागेव प्रयोक्तव्याः ॥ आनि लोट् ॥ उपसर्गस्थान्निमित्ता-
त्परस्य लोट आदेशस्यानीत्यस्य नस्य णः स्यात् ॥ प्रभवाणि ॥ दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्यः ॥ दुःस्थितिः ॥ दुर्भवानि ॥ अं- ॥ ४ ॥
तःशब्दस्याङ्किविधिणत्वेषूपसर्गत्वं वाच्यं ॥ अंतर्भवाणि ॥ शेषे विभाषा ॥ अकखादावषांत उपदेशे ॥ उपदेशे कादिः खादिः षांतश्च यो न गदनदा-
दैरन्यस्मिन्धातौ परे उपसर्गस्थान्निमित्तात्परस्य नेर्णत्वं वा स्यात् ॥ प्रणिभवति ॥ प्रनिभवति ॥ ॥ इहोपसर्गधात्वसमस्तत्वेपि संहि-
अंतर्धा॰ अंतर्धिः ॥

ता नित्या ॥ तदुक्तं ॥ संहितैकपदे नित्या नित्या धातूपसर्गयोः ॥ नित्या समासे वाक्ये तु सा विवक्षामपेक्षते इति ॥ १ ॥ सत्ताद्यर्थनिर्देशश्चोप- भूसत्तायामिति
लक्षणं ॥ यागादीनां भवतीत्यादौ बुधादीनां इत्याद्यर्थानां ॥ उपसर्गास्त्वर्थविशेषस्य द्योतकाः ॥ उपसर्गास्त्वर्थविशेषस्य द्योतकाः ॥ प्रभवति ॥
पराभवति ॥ संभवति ॥ अनुभवति ॥ उद्भवति ॥ परिभवतीत्यत्र विलक्षणार्थावगतेः ॥ उक्तं च ॥ उपसर्गेण धात्वर्थो बलादन्यत्र नीयते ॥ प्रहा-
राहारसंहारविहारप्रतिहारवत् ॥ १ ॥ ॥ एध वृद्धौ ॥ इत आरभ्य कृत्स्नांताः षट्त्रिंशदनुदात्तेतः ॥ टित आत्मनेपदानां टेरे ॥ टितो लस्यात्म-
नेपदानां टेरत्वं स्यात् ॥ एधते ॥ सार्वधातुकमपित् ॥ अपित्सार्वधातुकं ङिद्वत्स्यात् ॥ आतो ङितः ॥ अतः परस्य ङितामाकारस्य इय् स्यात् ॥
एधेते ॥ एधंते ॥ थासः से ॥ टितो लस्य थासः से स्यात् ॥ एधसे ॥ एधेथे ॥ एधध्वे ॥ अतो गुणे ॥ एधे ॥ एधावहे ॥ एधामहे ॥ ॥ इजादेश्च गुरुम-
तोऽनृच्छः ॥ इजादिर्यो धातुर्गुरुमानृच्छत्यन्यस्तत आम् स्याल्लिटि ॥ आमोऽमकारस्येत्त्वं ॥ आस्कासोराम्विधानान्मस्य नेत्त्वं ॥ आमः ॥
आमः परस्य लुक् स्यात् ॥ कृञ्चानुप्रयुज्यते लिटि ॥ आमंताल्लिट्पराः कृभ्वस्तयोऽनुप्रयुज्यंते ॥ आम्प्रत्ययवत्कृञोऽनुप्रयोगस्येति सूत्रे
कृञ्ग्रहणसामर्थ्यात्तु प्रयोगांतरस्यापि निवृत्तिर्ज्ञायते ॥ तेन कृभ्वस्तियोग इत्यतः कृञ् इति प्रत्याहाराश्रयणात् कृभ्वस्ति-
लाभः ॥ तेषां क्रियासामान्यवाचित्वात् कृञादीनां विशेषवाचित्वात् तदर्थयोरभेदान्वयः ॥ संपदिस्सप्रत्याहारं तस्मात् अनन्वितार्थत्वान्न
प्रयुज्यंते ॥ कृञ्स्तु क्रियाफलपरगामिनि परस्मैपदे प्राप्ते ॥ आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य ॥ आम्प्रत्ययो यस्मादित्यतद्गुणसंवि-

सि॰कौमु॰ ज्ञानोवद्व्रीहिः। आमः प्रकृत्यानुप्रयुज्यमानात्कृञोऽप्यात्मनेपदं स्यात्। ईहांचक्रे पूर्ववदनुप्रयोगस्य वाक्यभेदेन संबध्यते। पूर्ववदात्मने ति॰ १४

५ पदं न तु तद्विपरीतमिति। तेन कृञ् इंगितक्रियाफले ईहांचकार सार्वहेतलङ्। लिटस्तझयोरेशिरेच्। लिडादेशयोस्तझयोरेश् इरेच् एतौ

स्तः। एकारोच्चारणं ज्ञापकं नआदेशानां टेरेत्वं नेति। तेन डारौ रसौ न। हुएइत्तिच्छिते। असंयोगाल्लिट्कित्। असंयोगात्परो अपिल्लिट्कि

त्स्यात्। क्ङिति चेति निषेधात्सार्वधातुकार्धधातुकयोरिति गुणो न। द्वित्वात्परत्वाद्यणि प्राप्ते। द्विर्वचनेऽचि। द्वित्वनिमित्तेऽचि परे

आदेशो न स्याद्द्वित्वे कर्तव्ये। उरत्। अभ्यासऋवर्णस्य अत्स्यात्प्रत्यये परे। प्रत्यये किं। ववृश्च। रपरत्वं। हलादिः शेषः। कुहोश्चुः। अभ्या

सकवर्गहकारयोश्चवर्गादेशः स्यात्। एधांचक्रे। एधांचक्राते। एधांचक्रिरे। एकाच उपदेशेऽनुदात्तात्। उपदेशे यो धातुरेकाजनुदात्त

स्ततः परस्य वलादेरार्धधातुकस्येण्न स्यात्। उपदेशेऽत्वतुभयान्वयि। एकाच इति किं। यङ्लुगन्तान्निषेधो मा भूत्। स्मरंतीति

किपुग्रपानुबंधेन निर्दिष्टं यद्गुणेन च। यत्रैकाज्ग्रहणं चैव पंचैतानि न यङ्लुकि ॥१॥ एतच्च हैव काच्त्वेन ज्ञाप्यते। अत इत्येवक

त्वविहिताद्धातोर्ग्रहणेन च सिद्ध एकग्रहणसामर्थ्याद्देनेकाच्कोपदेशो व्यावर्त्यते। तेन वधेर्हद्रुपदेशएकाचोपि न निषेधः। आदेशो ॥५॥

पदेशेनेकाच्त्वात्। अनुदात्तश्चानुपदमेव संग्रहिष्यंते। एधांचकृषे। एधांचक्राथे। इणः षीध्वंलुङ्लिटां धोऽङ्गात्। इणंतादंगात्

परेषां षीध्वंलुङ्लिटां धस्य मूर्धन्यः स्यात्। एधांचकृढ्वे। एधांचक्रे। एधांचकृवहे। एधांचकृमहे। एधांबभूव। अनुप्रयोगसामर्थ्या

दस्तेर्भूभावो न। अन्यथा हि कृञ्स्वानुप्रयुज्यत इति ब्रूयात्। अत आदेः। अभ्यासस्यादेरतो दीर्घः स्यात्परस्यापवादः। एधामास।

एधामासतुरित्यादि। एधिता। एधितारौ। एधितारः। एधितासे। एधितासाथे। धि च। धादौ प्रत्यये परे सलोपः स्यात्। एधिताध्वे।

ह एति। तासस्त्योः सस्य हः स्यादेति परे। एधिताहे। एधितास्वहे। एधितास्महे। एधिष्यते। एधिष्येते। एधिष्यंते। एधिष्यसे। एधिष्येथे।

एधिष्यध्वे। एधिष्ये। एधिष्यावहे। एधिष्यामहे। आमेतः। लोट एकारस्य आम् स्यात्। एधतां। एधेतां। एधंतां। सवाभ्यां वामौ। सवाभ्यां

परस्य लोडेतः क्रमाद्व अम् इत्येतौ स्तः। एधस्व। एधेथां। एधध्वं। एत ऐ। लोडुत्तमस्य एत ऐ स्यादामोपवादः। एधै। एधावहै। एधामहै। आ

डजादीनां। अजादीनामाट् स्याल्लुङादिषु अटोपवादः। आटश्च। एधत। एधेतां। एधंत। एधथाः। एधेथां। एधध्वं। एधे। एधावहि। एधाम

हि। लिङः सीयुट्। सलोपः। एधेत। एधेयातां। एधेरन्। झस्य रन्। लिङो झस्य रन् स्यात्। एधेथाः। एधेयाथां। एधेध्वं। इटोत्। लिङादेश

स्य टोत्स्यात्। एधेय। एधेवहि। एधेमहि। आशीर्लिङि आर्धधातुकत्वाल्लिङः सलोपो न। सीयुट्सुटोः प्रत्ययावयवत्वात्षत्वं। एधि

षीष्ट। एधिषीयास्तां। एधिषीरन्। एधिषीष्ठाः। एधिषीयास्थां। एधिषीध्वं। एधिषीय। एधिषीवहि। एधिषीमहि। ऐधिष्ट। ऐधिषा

तां। आत्मनेपदेष्वनतः। अनकारात्परस्यात्मनेपदेषु झस्य अत् इत्यादेशः स्यात्। ऐधिषत। ऐधिष्ठाः। ऐधिषाथां। इणः षीध्वं। ऐधि

ढ्वं। इड्भिन्न एव इणिति ग्रहणमिति मते तु ऐधिध्वं। ढध्योर्वं स्यमस्य वद्धित्वविकल्पात्षोडशरूपाणि। ऐधिषि। ऐधिष्वहि। ऐधिष्महि।

१ लिङादेशानां सीयुडागमः स्यादात्मनेपदे ५

कौ० टी० रधिष्यत-रधिष्येतां-रधिष्यंत-रधिष्यथा। रधिष्येथां-रधिष्यध्वं-रधिष्ये-रधिष्यावहि-रधिष्यामहि। उदात्तत्वादिट्। प्रसंगात्तु दाताः नि० भ्वा०
९ संस्पर्धने। ॥ कवर्गादयः पवर्गान्ताः मशाषसहाः क्रमात्। कवर्गाणनटाः खंडगघआहस्वआः स्मृताः। ॥ इदित्वे योनिरुस्युगी स्तुसुतुष्वि
ङीश्विङिः। शुद्धस्यांशविनेकाशीडं तेषु निहताः स्मृताः। ॥ शक्लृ पत्लृ शुविरि ष्वष्वविश्सिश्रप्रच्छि त्यज निजिर्भजः। ॥ भंज भुज भ्रस्ज मस्जि
यजयुजरुजरंजविजिर्स्वंजिसंजसृजः। ॥ अद्क्षुद्खिद्छिद्तुदिनुदः पद्यभिद्विद्यतिर्विनद्। ॥ शद्सदी स्विद्यतिस्कंदिहदी क्रुधक्षुधिबुध्य
ती। ॥ ४ ॥ बंधिर्युधिरुधी राधिव्यधशुधः साधिसिध्यती। ॥ मन्यहन्नाप्क्षिप्छुपितप्तिपस्तृप्यतिदृप्यती। ॥ ५ ॥ लिपलुपवपशपस्वपसृपियभ्रम
भ्नमनम्यमोरमिः। ॥ कुशिदंशिदिशीदृशमृशरिशरुशलिशविशस्पृशः कृषिः। ॥ ६ ॥ त्विषतुषद्विषदुषपुष्यपिष्विषशिषशुषश्लिष्यतयो ७
घसिः। ॥ वसतिर्दहदिहिदुहो नहमिहरुहलिहविहिस्तथा। ॥ ७ ॥ अनुदात्ता हलंतेषु धातवो द्व्यधिकं शतं। ॥ तुदादौ मतभेदेनास्थिता ये च तु रादिषु
स्पृह्पी तो वार यितुं श्यना निर्देश आहतः। ॥ ९ ॥ किंच ॥ सिधपध्यो सिध्यबुध्यो मन्यपुष्यश्लिषः श्यना। ॥ वसिः शपालुका या तिर्निर्दिष्टान्य
निवृत्तये। ॥ ९ ॥ निजिर्विजिर्शक्लृ इति सानुबंधा उदात्तथा। ॥ विंदतिश्चांद्रदौर्गादिर्दिष्टोक्षा व्याघ्रभूतिदृश्यते। ॥ १० ॥ व्याघ्रभूत्या दयस्त्वेनंनह
पठुरितिरिक्तं। ॥ रंजिमस्जी अदिपदी तुदक्षुधशुषिपुषी शिषिः। ॥ भाष्यानुक्ता नवेहाक्षा व्याघ्रभूत्यादिसंमताः। ॥ ११ ॥ ॥ स्पर्ध संघ ८
र्षे। संघर्षः पराभिभवेच्छा। धात्वर्थेनोपसंग्रहादकर्मकः। ॥ स्पर्धते ॥ शर्पूर्वाः खयः। ॥ अभ्यासस्य शर्पूर्वाः खयः शिष्यंते हलादिः शे

षापवादः। पस्पर्धे। स्पर्धिता-स्पर्धिष्यते-स्पर्धतां-अस्पर्धत-स्पर्धेत-स्पर्धिषीष्ट। अस्पर्धिष्ट-अस्पर्धिष्यत। ॥ गाधृ प्रतिष्ठालिप्सयोर्ग्रंथे च। गाध
ते। जगाधे। बाधृ लोडने। लोडनं प्रतीघातः। बाधते। नाधृ नाथृ याच्ञोपतापैश्वर्याशीःषु। आशिषि नाथ इति वाच्यं। अस्याशिष्येवात्मनेपदं स्यात्। ना
हरि थते। अन्यत्र नाथति। नाधते। दध धारणे। अत एकहल्मध्येऽनादेशादेर्लिटि। लिण्निमित्तादेशादिकं न भवति यदंगं तदवयवस्यासंयुक्तहल्मध्यस्थस्या
कारस्य एकारः स्यादभ्यासलोपश्च किति लिटि। थलि च सेटि। तागुक्तं स्यात्। आदेशश्चेह वैरूप्यसंपादकस्त्वाश्रीयते। शसिदद्योः प्रतिषेधवचनात्ता
पकात्। तेन प्रकृतिजश्चरांतेषु सत्स्वपि एत्वाभ्यासलोपौ स्त एव। देधे। देधाते। देधिरे। अत एकहल्मध्येऽनादेशादेर्लिटि। तपरः किं। रराणे। एके स्यादिति। ... नतत्र
तु। अनादेशादेः किं। चकणतुः। लिटि आदेशविशेषणादिह स्यादेव। नेमिथ-सेहे। स्कुदि आप्रवणे। आप्लवनमुत्प्लवनमुद्धरणं च। इदितो नुम्धातोः।
स्कुंदते। चस्कुंदे। श्विदि श्वैत्ये। अकर्मकः। श्विंदते। शिश्विंदे। २० वदि अभिवादनस्तुत्योः। वंदते। ववंदे। भदि कल्याणे सुखे च। भंदते। बभंदे। मदि स्तुति
मोदमदस्वप्नकांतिगतिषु। मंदते। ममंदे। स्पदि किंचिच्चलने। स्पंदते। पस्पंदे। क्लिदि परिदेवने। शोकइत्यर्थः। सकर्मकः। क्लिंदते चैत्रं। चिक्लिंदे। मुद हर्षे।
मोदते। ददद दाने। ददते। न शसददवादिगुणानां। शसेर्ददेर्वकारादीनां च गुणशब्देन भावितस्य च यो अकारस्तस्य एत्वाभ्यासलोपौ न स्तः। ददद
ददाते। ददिरे। ष्वद स्वर्द आस्वादने। अयमनुभवे सकर्मकः। धात्वादेः षः सः। धातोरादेः षस्य सः स्यात्। सात्पदाद्योरिति षत्वनिषेधः। अनुस्वदते।
सस्वदे। स्वर्दते। सस्वर्दे। उर्द माने क्रीडायां च। उपधायां च। धातोरुपधाभूतयो रेफवकारयोर्हल्परयोः परत इको दीर्घः स्यात्। ऊर्दते। ऊर्दांचक्रे। कुर्द
ऊर्दते। ऊर्दांचक्रे। कुर्द
रुणावकर्मकः २

पूर्वत्रासिद्धमितिसिज्लोपस्यासिद्धत्वेप्राप्ते

कौमुदी० खुर्द गुर्द गुद क्रीडायामेव॥ कूर्दते॥ खूर्दते॥ गोर्दते॥ जुगुदे॥ षूद क्षरणे॥ सूदते॥ सुषूदे॥ ॥सेकसृपसृसृस्तृ: स्तृणात्येते स्यादंतसादय:॥ एकाच: षोपदेशाश्च टिप्पणी०
८१॥ ष्वदि स्वदि स्वंजस्यपरिषिद्ध:॥२॥ ह्रस्य: केवल ह्रस्य:॥ नतु दंतोष्ठजोपि॥ घञादीनां पृथक्ग्रहणात्॥ ह्लाद अव्यक्ते शब्दे॥ ह्लादते॥ जह्लादे॥ ह्ला
दी सुखे च॥ ह्लाद व्यक्ते शब्दे॥ स्वाद आस्वादने॥ स्वादते॥ पर्द कुत्सिते शब्दे॥ गुदरवे इत्यर्थ:॥ पर्दते॥ यती प्रयत्ने॥ यतते॥ येते॥ युत जुत भासने
योतते॥ युयुते॥ जोतते॥ जुजुते॥ विथृ वेथृ याचने॥ वेथते॥ विविथे॥ श्रथि शैथिल्ये॥ श्रंथते॥ ग्रथि कौटिल्ये॥ ग्रंथते॥ कत्थ श्लाघायां॥ कत्थ
ते॥ ३८॥ एधादयोनुदात्तेतोगता:॥ अथाष्टत्रिंशत्तवर्गीयांता: परस्मैपदिन:॥१॥ अत सातत्यगमने॥ अतति॥ अतआदे:॥ आत॥ आततु:॥
आतु:॥ लुङि आतिस् ई दिति स्थिते॥ इट ईटि॥ इट: परस्य सस्य लोप: स्यादीटि परे॥ सिज्लोप एकादेशे सिद्धो वाच्य:॥ आतीत्॥ आतिष्टां॥ आ
तिषु:॥ वदव्रजहलंतस्याच:॥ वदेर्व्रजेर्हलंतस्य चांगस्याच: स्थाने वृद्धि: स्यात्सिचि परस्मैपदेषु॥ इति प्राप्ते॥ नेटि॥ इडादौ सिचि प्रागुक्तं न स्यात्॥
मा भवानतीत्॥ अतिष्टां॥ अतिषु:॥ चिती संज्ञाने॥ चेतति॥ चिचेत॥ अचेतीत्॥ अचेतिष्टां॥ अचेतिषु:॥ च्युतिर् आसेचने॥ सेचनमार्द्रीकरणं॥ आ
ङीषदर्थेभिव्याप्तौ च॥ ह्रस्वं ह्रस्वा च्या॥ च्योतति॥ चुच्योत॥ इरितो वा॥ इरितो धातोश्च्लेरङ् वा स्यात्परस्मैपदेषु॥ अच्युतत्॥ अच्योतीत्॥ श्च्युति ८१॥
क्षरणे॥ श्च्योतति॥ चुश्च्योत॥ अश्च्युतत्॥ अश्च्योतीत्॥ शकाररहितोप्ययं॥ च्योतति॥ मंथ विलोडने॥ यासुट्॥ किदाशिषीति कित्वादनिदि:
तामिति न लोप:॥ मथ्यात्॥ षिध गत्यां॥ सेधति॥ सिषेध॥ सेधिता॥ असेधीत्॥ सात्पदाद्योरिति निषेधे प्राप्ते॥ उपसर्गात्सुनोतिसुवतिस्य॥

कुथि पुथि लुथि मथि हिंसासंक्लेशनयो:॥ इदित्वान्नलोपो न॥ कुंथ्यात्॥ मंथ्यात्॥

ति स्तौति स्तोभति स्थासेनयसेधसिचसंजस्वंजां॥ उपसर्गस्थान्निमित्तादेषां सस्य ष: स्यात्॥ सदिरप्रते:॥ प्रतिभिन्नादुपसर्गात्सदे: सस्य ष: स्यात्॥ स्तन
भे:॥ स्तन्भे: सौत्रस्य सस्य ष: स्यात्॥ योगविभाग उत्तरार्थ:॥ किंच॥ अप्रतेरितिनानुवर्तते॥ आङ्प्रतिष्टंभविष्टभमन्यु:॥ अवाच्चालंबनाविदूर्ययो:॥
अवात्स्तन्भेरेतयोरर्थयो: सस्य ष: स्यात्॥ वेश्च स्वनो भोजने॥ व्यवाभ्यां स्वनते: षत्वं स्यात् भोजने॥ परिनिविभ्य: सेवसितसयसिवुसहसुट्स्तुस्वं
जां॥ परिनिविभ्य: परेषामेषां सस्य ष: स्यात्॥ निषेधति॥ प्राक्सितादड्व्यवायेपि॥ सेवसितेत्यत्र सितशब्दात्प्रागेव सुनोत्यादयस्तेषामडव्यवा
येपि षत्वं स्यात्॥ एषामेव चाभ्यासस्य न तु सुनोत्यादीनां॥ न्यषेधत्॥ न्यषेधीत्॥ न्यषेधिष्यत्॥ स्थादिष्वभ्यासेन चाभ्यासस्य॥ प्राक्सितात्स्था
दिष्वभ्यासेन व्यवायेपि षत्वं स्यात्॥ निषिषेध॥ निषिषिधतु:॥ सेधतेर्गतौ॥ गत्यर्थस्य सेधते: षत्वं न स्यात्॥ गंगां विसेधति॥ षीधू शास्त्रे मांगल्ये
च॥ शास्त्रं शासनं॥ स्वरतिसूतिसूयतिधूञूदितो वा॥ स्वरत्यादेरूदितश्च परस्य वलादेरार्धधातुकस्येड्वा स्यात्॥ झषस्तथोर्धोध:॥ झष: परयो
स्तथोर्ध: स्यान्न तु दधाते:॥ सिषेद्ध॥ सिषेद्ध॥ सिषेधिथ॥ सेद्धा॥ सेधिता॥ सेत्स्यति॥ सेधिष्यति॥ असैत्सीत्॥ झलो झलि॥ झल: परस्य सस्य लोप:
स्याज्झलि॥ असैद्धां॥ असैत्सु:॥ असैत्सी:॥ असैद्ध॥ असैद्ध॥ असैत्सं॥ असैत्स्व॥ असैत्स्म॥ पक्षे असेधीत्॥ असेधिष्टां॥ इत्यादि॥ खादृ भक्षणे॥
खादति॥ चखाद॥ खद स्थैर्ये हिंसायां च॥ बाडू क्षणे॥ स्थैर्ये: कर्मक:॥ खदति॥ अत उपधाया:॥ उपधाया अतो वृद्धि: स्यात् ञिति णिति च प्र
त्यये परे॥ चखाद॥ णलुत्तमो वा॥ उत्तमो णल् णिद्वा स्यात्॥ चखाद॥ चखद॥ अतो हलादेर्लघो:॥ हलादेर्लघोरकारस्य इडादौ परस्मैपदे परे सि

कौमु० ‖ भिद्धिर्वस्यात्॥ अखादीत्। अखदीत्। बद स्थैर्ये। पवर्गीयादिः। बदति। बबाद। बेदतुः। बेदुः। बेदिथ। बबाद। बबद। बेदिव। बेदिम। अबादीत्। अब ति०व्या०
‖ ८ ‖ दीत्। गद व्यक्तायां वाचि। गदति। जगाद। नेर्गदनदपतपदघुमास्यतिहंतियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च। उप
सर्गस्थान्निमित्तात्परस्य नेर्णः स्याद्गदादिषु परेषु। प्रणिगदति। रद विलेखने। विलेखनं भेदनं। रराद। णद अव्यक्ते शब्दे। णोनः। धातोरादेर्णस्य
नः स्यात्॥ णोपदेशास्त्वनर्द्दनाटिनाथ्नाध्नन्दनक्कनॄनृतः॥ नाटेर्दीर्घोहस्य पर्युदासात् घटादिर्ण्योपदेशः एव। तवर्गचतुर्थान्ता धातेर्नट
स्कन्दर्दे॥ विण्णोपदेशता माङ्गः। उपसर्गादसमासेपि णोपदेशस्य। उपसर्गस्थान्निमित्तात्परस्य णोपदेशस्य धातोर्नस्य णः स्यात्समासेसमास
पि। प्रणदति। प्रणिनदति। अर्द गतौ याचने च। अत आदेः। तस्मान्नुड् द्विहलः। द्विहलो धातोर्दीर्घीभूतादकारात्परस्य नुट् स्यात्। आनर्द। आर्दन्
नर्द गर्द शब्दे। णोपदेशत्वाभावान्न णः। प्रनर्दति। गर्दति। जगर्द। तर्द हिंसायां। तर्दति। कर्द कुत्सिते शब्दे। कुत्सिते कोष्ठे। कर्दति। खर्द दंदशू कुत्सितं बंधे
के। दंदशूको हिंसादिरूपायां दंदशकक्रियायामित्यर्थः। खर्दति। चखर्द। अति अदि बंधने। अंतति। आनंत। अंदति। आनंद। इदि परमैश्वर्ये। इंद
ति। इंदांचकार। बिदि अवयवे। पवर्गीयादिः। बिंदति। अवयवं करोतीत्यर्थः। भिदीति पाठांतरं। गडि वदनैकदेशे। गंडति। अंतत्पादयोर्न
तिटुः विषयाभिज्ञकाश्यपः। अन्ये तु तिङमपी छंति। णिदि कुत्सायां। प्रणिंदति। टुनदि समृद्धौ। आदिर्ञिटुडवः। उपदेशे धातोराद्या एते इतः ‖ ८ ‖
स्युः। इदित्वान्नलोपो न। नंद्यात्। चदि आह्लादे। चचंद। त्रदि चेष्टायां। तत्रंद। कदि क्रदि क्लदि आह्वाने रोदने च। चकंद। चक्रंद। चक्लंद। क्लिदि

परिदेवने। चिक्लिंद। शुन्ध शुद्धौ। शुशुंध। नलोपः। शुध्यात्॥ ७५ ॥ अथ कवर्गीयांता अनुदात्तेतो द्विचत्वारिंशत्॥ शीकृ सेचने। तालव्यादिः। दंत्यादिरित्येके।
ग्रंथेष्वर शीकते। शिशीके। लोकृ दर्शने। लोकते। लुलोके। श्लोकृ संघाते। संघातो ग्रंथः। सचेहैमानस्य व्यापारो ग्रंथ्यमानस्य वा। आद्ये कर्मको द्वितीये सकर्मकः। श्लोकते।
द्रेकृ ध्रेकृ शब्दोत्साहयोः। उत्साहो वृद्धिरौद्धत्यं च। दिद्रेके। दिध्रेके। रेकृ शंकायां। रेकते। सेकृ स्रेकृ स्रकि श्रकि श्लकि गत्यर्थाः। त्रयो दंत्यादयः। द्वौ ता
लव्यादी। अणोपदेशत्वान्न षः। सिसेके। शकि शंकायां। शंकते। शशंके। अकि लक्षणे। अंकते। आनंके। वकि कौटिल्ये। वंकते। मकि मंडने। मंकते। ९०
कक लौल्ये। लौल्यं गर्वश्चापल्यं च। ककते। चकके। कुक वृक आदाने। कोकते। चुकुके। वर्कते। अदुपधत्वाल्लिटः कित्त्वं गुणात्पूर्वं विप्रतिषेधेन। व
वृके। चकट्टा प्रतीघाते च। चकते। चेके। कखि वकि श्वकि त्रकि ढौकृ त्रौकृ ष्वष्क वस्क मस्क टिकृ टीकृ तिकृ तीकृ रघि लघि गत्यर्थाः। कंकते। डुढौके। तुत्रौ
के। ष्वष्क धातुः षोपदेशः नासत्वप्रतिषेधात्। कष्यः। ष्वष्कते। षष्वष्के। अत्र त्वन्तीयो दंत्यादिरित्येके। लघि भोजननिवृत्तावपि। अघि वघि मघि गत्याक्षे
पे। आक्षेपो निंदा। गतौ गत्यारंभे चेत्यन्ये। अंघते। आनंघे। वंघते। मंघते। मघि कैतवे च। राघृ लाघृ द्राघृ सामर्थ्ये। राघते। द्राघृ इत्यायके। तिन्
द्राघृ आयामे च। श्लाघृ कत्थने। श्लाघते॥ ११५॥ अथ परस्मैपदिनः पंचाशत्। फक्क नीचैर्गतौ। नीचैर्गतिर्मन्दगमनमसद्व्यवहारश्च। फक्कति। तक
हसने। तकति। तकि कृच्छ्रजीवने। तंकति। बुक्क भषणे। भषणं श्वरवः। बुक्कति। कख हसने। प्रनिकखति। ओखृ राखृ लाखृ द्राखृ ध्राखृ शोषणा
लमर्थयोः। शाखृ श्लाखृ व्याप्तौ। शशाखति। उख उखि वख वखि मख मखि णख णखि रख रखि लख लखि इख इखि ईखि वल्ग रगि लगि अगि वगि मगि ईरित

उरवतुरित्यत्र अकः सवर्णे एकादेशो ह्रतेसति॰२

तगिलगिथगिग्लुगिष्टुगिरिगिलिङ्गिगत्यर्थाः। द्वितीयांता: पंचदश। त्वतीयांतास्त्रयोदश। उहस्वांते घुरिरवञ्जरवञ्जिशिशिरिवइत्यपिवतुरःके चित्पठं
ति। अभ्यासस्यासवर्णे। अभ्यासस्यइवर्णोवर्णयोरियङुवङौस्तोऽसवर्णेचि। उवोरव। सन्निपातपरिभाषयाइउआदेशस्याप्न। ईखतुः। ईखुः। इ
ह्सवर्णेदीर्घस्याभ्यासग्रहणेन ग्रहणात्तत्रहस्वः शास्त्रेन भवति। सहस्वस्यहस्वत्वात्। आंगत्वा द्विःपठेत्यवल्लक्षणपरस्याद्ह्रस्वेह्रतेततोदीर्घः। ना
णोदांगबलीयइतिन्यायात्परत्वाच्च उरवति। ववरवतुः। वंखति। मेखतुः। वगिकंपने। श्रुगिद्रुगिबुगिवर्जने। युंगति। घघहसने। घघति। ज
घाघ। मघिमंडने। मंघति। शिघिआघ्राणे। शिंघति। २७९ अथचवर्गीयांता:। तत्रानुदात्तेतएकविंशतिः। वर्चदीप्तौ। वर्चते। षचसेचने सेवने च
सचते। सेचे। सचिता। लोचृदर्शने। लोचते। लुलोचे। शचव्यक्तायांवाचि। शेचे। श्वचश्वचिगतौ। श्वचते। श्वंचते। कचबंधने। चकचे। कचिकाचिदीप्ति
बंधनयोः। चकंचे। चकांचे। मचमुचिकल्कने। कल्कनंदंभःशाठ्यं च। कथनमित्यन्ये। मेचे। मुमुंचे। मचिधारणोच्छ्रायपूजनेषु। ममंचे। पचिव्य
क्तीकरणे। पंचते। २८० ष्टुचप्रसादे। स्तोचते। तुष्टुचे। ऋजगतिस्थानार्जनोपार्जनेषु। अर्जते। उपधायोऋकारस्तदादेशोरपरत्वेनगुरुत्वात् नेत्
द्विहलुत्वान्नुट्। आनृजे। ऋजिभृजीभर्जने। ऋंजते। उपसर्गादृतीतिवृद्धिः। प्रार्जते। ऋंजांचक्रे। आनृंजे। भर्जते। बभृजे। अभर्जिष्ट। एजृ
भ्रेजृभ्राजृदीप्तौ। एजांचक्रे। ईजगतिकुत्सनयोः। ईजांचक्रे। २८१ अथाष्टिसप्ततिरजंता: परस्मैपदिनः। शुचशोके। शोचति। कुचशब्देतारे। कोच
ति। कुंचक्रुंचकौटिल्याल्पीभावयोः। अनिदितामितिनलोपः। कुच्यात्। क्रुच्यात्। लुंचअपनयने। अंचुगतिपूजनयोः। गतौनलोपः। अच्यात्। पूजा

यांतु। अंच्यात्। वंचुचंचुतंचुत्वंचुम्रुंचुम्लुंचुम्रुचुम्लुचुगत्यर्थाः। वच्यात्। चच्यात्। तच्यात्। त्वच्यात्। अम्रुंचीत्। अम्लुंचीत्। ग्रुचुग्लुचुकुजुखुजुस्तेयकरणे। अग्रुचत्। अग्रोचीत्।
ग्लुचिवाचस्थ। एभ्यश्च्लेरङ्वास्यात्। अम्रुचत्। अम्रोचीत्। अम्लुचत्। अम्लोचीत्। ग्रुचुग्लुचुकुजुखुजुस्तेयकरणे। जुग्रोच। अग्रुचत्। अग्रोचीत्।
जुग्लोच। अग्लुचत्। अग्लोचीत्। अकोजीत्। अखोजीत्। ग्लुंचुषस्जगतौ। अङ्। अग्लुचत्। अग्लुंचीत्। सस्यश्चुत्वेनशः। जश्त्वेनजः। सज्जति।
ससज्ज। अयमात्मनेपद्यपि। सज्जते। गुजिअव्यक्तेशब्दे। गुंजति। गुंज्यात्। अर्चपूजायां। आनर्च। २८२ म्लेच्छअव्यक्तेशब्दे। अस्फुटेअपशब्दे
चेत्यर्थः। म्लेच्छति। लछलाछिलक्षणे। ललच्छ। ललाच्छ। वाछिइच्छायां। वांछति। आछिआयामे। आंछति। अतआदेरित्यत्रतपरकरणंस्वा
भाविकह्रस्वपरिग्रहार्थं। तेनदीर्घाभावान्नुट्। आंछ। तपरकरणंमुखसुखार्थमितिमतेनुट्। आनांछ। ह्रीछलज्जायां। जिह्रीछ। हूर्छा
कौटिल्ये। कौटिल्यमपसरणमितिमैत्रेयः। उपधायांचेतिदीर्घः। हूर्छति। मूर्छामोहसमुच्छ्राययोः। मूर्छति। स्फूर्छाविस्तृतौ। स्फूर्छति। युछप्र
मादे। युछति। धृजधृजिध्रजध्रजिध्वजध्वजिगतौ। ध्रजति। ध्रंजति। धर्जति। धृंजति। ध्वजति। ध्वंजति। कुजकुडुकृच्छे। कूजः। कपाशआदानं। कशिशा
धर्जनेशिक्षमितिपाठः। उंछति। उंछांचकार। उछीविवासे। विवासः समाप्तिः। प्रायेणायंविपूर्वः। व्युछति। कूजअव्यक्तेशब्दे। चुकूज। अर्जषर्ज
अर्जने। अर्जति। आनर्ज। सर्जति। ससर्ज। गर्जशब्दे। गर्जति। तर्जभर्त्सने। तर्जति। कर्जव्यथने। खर्जपूजने। चकर्ज। चखर्ज। अजगतिक्षेप
णयोः। अजति। अजेर्व्यघञपोः। अजेर्वीरित्ययमादेशःस्यादार्धधातुके विषये घञंअपंचवर्जयित्वा। वेत्याहादायार्धधातुके वेष्यते। विवाय।

कृत्स्नत्वेअ
भ्यासस्यकृते ५

कौ॰टी॰ ॥१०॥ ति॰ध्वा॰

॥ विव्यतुः । विव्युः । अत्र वकारस्य हल्परत्वादुपधायां वेति दीर्घे प्राप्ते । अतः परस्मिन्निति स्थानिवद्भावेनाऽपरत्वं । नयपदांतेति निषेधः
स्वरदीर्घयलोपेषु लोपाजादेश एव न स्थानिवदिति सूत्रे ॥ थलि रकारवत्तीर्णनिषेधे प्राप्ते । कृसृभृवृस्तुद्रुस्रुश्रुवो लिटि । एभ्यो लिट इण्न स्यात्
कादीनां सवर्णग्रहणं नियमार्थं । प्रकृत्याश्रयः प्रत्ययाश्रयो वा यावान्निषेधः । स लिटि वेत्र्रीः क्रादिभ्य एव नान्येभ्य इति । नतश्च वुर्णाथ
लिभारद्वाजनियमप्रापितस्य क्रमादिषु नूदिनियमप्राप्तस्य वेटो निषेधार्थं । अचस्तास्वत्थल्यनिटो नित्यं । उपदेशेऽजंतो यो धातुस्तासौ नित्यानि
ट्तनः परस्य थल इण्न । उपदेशोक्तः । उपदेशेऽकारवतस्तासौ नित्यानिट्ततः परस्य थल इण्न स्यात् । ऋतो भारद्वाजस्य । तासौ नित्यानिट् ऋदं
तादेव थलो नेट् भारद्वाजस्य मतेन । तेनान्यस्य स्यादेव । अयमत्र संग्रहः ॥ अजंतोऽकारवान्वा यस्तास्यनिट् थलि वेडयं । ऋदंत ईदृङ्नित्यानिट् का
द्यन्यो लिटि सेड् भवेत् १ । न च स्तु द्रुवादीनामपि थलि विकल्पः शंक्यः । अचस्तास्वदिति उपदेश इत्युक्ते च योगद्वयप्रापितस्यैव सिद्धत्वात्प्रतिषेध
स्य भारद्वाजनियमो निवर्तकः । अनंतरस्येति न्यायात् । विव्ययिथ । विव्येथ । आविथ । विव्यथुः । विव्य । विव्याय । विव्यय । विव्यिव । विव्यिम । वे
ता । अजिता । वेष्यति । अजिष्यति । अजतु । आजत् । अजेत् । वीयात् । सिचि वृद्धिः परस्मैपदेषु । इगंतांगस्य वृद्धिः परस्मैपदपरे सिचि । अवैष
षीत् । आजीत् । अवेष्यत् । आजिष्यत् । तेज पालने । तेजति । खज मंथने । खजति । खजि गतिवैकल्ये । खंजति । एज कंपने । एजांचकार ॥ ॥१०॥
टुओस्फूर्जा वज्रनिर्घोषे । स्फूर्जति । पुस्फूर्ज । क्षि क्षये । अकर्मकः अंतर्भावितण्यर्थस्तु सकर्मकः ॥ क्षयति । चिक्षाय । चिक्षियतुः । चिक्षियुः । चि

कमु॰टी॰ ॥२२॥ ति॰ध्वा॰

क्षेट । क्षीवते । क्षीष्ट । कल्पने । क्षीभते । क्षीरस्वे रभ्य राद्धे । रिरभे । अतिरभी कृष्टि । विस्त्यक्येन । अंभते । रंभते । स्कभि स्कुभि प्रतिबंधे । स्तंभते उत्तंभ । उद
स्थासंस्तंभोः ॥ इतिनिपूर्वे सर्वधा । विस्तंभते । सन्नियोगिति षत्वं तु न भवति । श्रुविधौ निर्दिष्टस्य सौत्रस्य वर्थग्रहणात् । नत्वं तु उदस्कासं मोतेति पर्वगी
योपधः पाठः स्तन्मोरिति तन्वगीयोपधपाठश्चेति माधवः । केचित्तु स्थटकार औपदेशिक इत्याहुः ॥ नभते स्तंभते । टर्वभे । ऊसी अर्थगार्विनामे
रथिजभो रति । एनयो नुमागमस्यादचि । जंभते जजंभे । जंभिता । अजंभिष्ट । उद्भनने । जजंभे । शल्लकथने । शशले । वल्भभोजने । रंतो ध्या
दिः । ववभे । गल्भ धार्ष्ये । गल्भते । श्रंभु प्रमादे । मालव्यादिदंत्यादिश्च । श्रंभते । स्रंभते । सुसुस्रंभे । स्तोभते । विष्टोभते । तुष्टुभे । यतो भिष्ट ॥ ॥
अथ परस्मैपदिनः ॥ गुपू रक्षणे । गुपू धूपविच्छिपणिपनिभ्य आयः । एभ्य आयप्रत्ययः स्यात्स्वार्थे । पुगंते गुण ॥ सनाद्यंता धातवः ॥ सनादयः क
मेर्णिङंताः प्रत्ययाः अंते येषां ते धातुसंज्ञाः स्युः । धातुत्वाल्लडादयः ॥ गोपायति । आयादय आर्धधातुके वा । आर्धधातुकविवक्षायामायादयो वा
स्युः ॥ कास्प्रत्ययादाममंत्रे लिटि । कास्धातोः प्रत्ययांतेभ्यश्च आम् स्याल्लिटि न तु मंत्रे । कास्यनेकाच्ग्रहणं कर्तव्यं । सूत्रे प्रत्ययग्रहणमपनीयेत
स्थाने ऽनेकाज्ग्रहणं कर्तव्यमित्यर्थः ॥ अतो लोपः । आर्धधातुकोपदेशे यदकारांतं तस्याकारस्य लोपः स्यादार्धधातुके परे । गोपायांचकार । गोपा
यांबभूव । गोपायामास । जुगोप । जुगुपतुः । जुगुपुः । ऊदित्वाद्विड् । जुगोपिथ । जुगो ॰ प्थ । गोपायिता । गोप्ता । गोपिता । गोपायात् । गुप्यात् । अ ॥२२॥
गोपायीत् । अगोपीत् । अगौप्सीत् । धूप संतापे । धूपायति । धूपायांचकार । दुधूप । धूपायिता । धूपितासि । जप जल्प व्यक्तायां वाचि । जपमा

गोपिता

तुडिआलस्येप्रतियातेव॥ तुडि शोषणे॥ २५० रुडितु डिगतौ॥ तुडु भावकरणे॥ भावकरणमभिप्रायसूचनं॥ तुडुति॥ अडु अभियोगे॥ अडुति॥ आन ...पुंवदु॥
तु॥ कडु कार्कश्ये॥ कडुति॥ तुडु रहपरुषयोरोपधाः॥ तेन ढि पितुल अलकृत इत्यादि॥ क्रीडृ विहारे॥ चिक्रीडतु॥ तुडृ तोडने॥ तोडति॥ तुतोड॥ तड इत्येके॥
हूडृ हुडृ होडृ गतौ॥ हूडृ ह्वान॥ हुडृ ह्वान॥ होडृ ह्वान॥ रोडृ अनादरे॥ रोडृ लोडृ उन्मादे॥ अडउ घमे॥ अडति॥ आड॥ आडतु॥ आडुः॥ लड विलासे॥ ल
उति॥ लडयोरैक्यमित्येके तस्मात् ललनीतिस्वाम्यादयः॥ कडु मदे॥ कडति॥ कडि इत्येके॥ कंडति॥ गडि वदनैकदेशे॥ ॥ इति टवर्गीयांताः॥ गंडति॥
अथ पवर्गीयांता उच्यंते॥ तत्र अनुदात्तेत स्तोभत्यंताः षड् त्रिंशत्॥ तिपृतेपृ ष्टिपृ ष्टेपृ क्षरणार्थाः॥ आद्योनुदात्तः॥ क्षीरस्वामी त्वयं सेडिति बभ्राम
तेपते॥ तितेप॥ कादिनियमादिट्॥ तितिपिषे॥ तेप्ता॥ तेप्स्यते॥ तिङ्क्ष्वा वा आत्मनेपदेषु॥ इकः समीपाद्धलः परो झलादिर्लिङ् आत्मनेपदपरसिच्च
त्येतौ किं तो स्तः॥ किं वान्न गुणः॥ तिप्सीष्ट॥ तिप्सीयास्तां॥ तिप्सीरन्॥ अतिप्त॥ अतिप्सातां॥ अतिप्सत॥ तिष्टेप॥ तिष्टिपे॥ तिष्टिपाते॥ तिष्टिपिरे॥ २७० २५०
तिष्टेप॥ तिष्टिपाते॥ तिष्टिपिरे॥ तेपृ कंपने॥ ग्लेपृ दैन्ये॥ ग्लेपते॥ टुवेपृ कंपने॥ वेपते॥ केपृ गेपृ ग्लेपृ च॥ चात् कंपने गतौ च॥ मेपृ ... विसागादिति
स्वामी॥ मेपृ रेपृ लेपृ गतौ॥ त्रपूष् लज्जायां॥ त्रपते॥ तकारमंतरेण पठित्वा कंपन इत्यपरे न त्रप्यात्॥ ग्लेपृ पर्यभेदाल्लुनः पाठः॥ मेपृ रेपृ लेपृ गतौ॥ त्रपूष् लज्जायां॥ त्रपते॥ तफ व
भजत्रपश्च॥ एषामेत एकारोभ्यासलोपश्च किति लिटि सेटि थलि च॥ त्रेपे॥ त्रेपाते॥ त्रेपिरे॥ ऊदित्वादिड् वा॥ त्रपिता॥ त्रप्ता॥ त्रपिषीष्ट॥ त्रप्सी
ष्ट॥ कपि चलने॥ कंपते॥ रबि लबि अबि शब्दे॥ रंबे॥ लंबे॥ अंबे॥ लबि अवस्रंसने च॥ कबृ वर्णे॥ चकबे॥ क्लीबृ अधार्ष्ट्ये॥ चिक्लीबे॥ क्षीबृ

काटः सिषिअतो हलादेर्लघो रितीट् ईडो आत्मायां॥ इदंतक्षणश्वसजागृणिश्व्येदितां॥ हमयांतस्य क्षणादेर्ण्यंतस्य श्वयतेरेदितश्च वृद्धिर्नेटि सिचि
अकटीत्॥ ३०० अटपट गतौ॥ आट॥ आटतुः॥ आटुः॥ पपाट॥ पेटतुः॥ पेटुः॥ रट परिभाषणे॥ लुट वाल्ये॥ शट रुजा विसरण गत्यवसादनेषु॥ वट
वेष्टने॥ ववाट॥ ववटतुः॥ ववटिथ॥ किट खिट त्रासे॥ शिट षिट अनादरे॥ शेटति॥ शिशेट॥ सेटति॥ सिषेट॥ जट झट संघाते॥ भट भृतौ॥ तट उच्छ्रा
ये॥ खट कांक्षायां॥ नट नृतौ॥ नटति॥ पिट शब्दसंघातयोः॥ हट दीप्तौ॥ षट अवयवे॥ लुट विलोडने॥ अंतोयमित्येके॥ ३२० चिट परप्रेष्ये॥ चिटत
वि॥ विट आक्रोशे॥ बिरादिः॥ हिट इत्येके॥ इट किट कटी गतौ॥ एटति॥ केटति॥ ईकारः श्वीदितो निष्ठा ... या मितीणनिषेधार्थः॥ केचित्तु इदितं
मत्वा नुमि कृते कंटनीत्यादि वदंति॥ अंतेय इड्रुति प्रश्लिष्य॥ अयति॥ इयाय॥ इयतुः॥ इयुः॥ इययिथ॥ इयेथ॥ इयाय॥ इयय॥ दीर्घस्यति सादेरि
त्यामि अयांचकारेत्युदाहरंति॥ मडि भूषायां॥ कुडि वैकल्ये॥ कुंडति॥ कुंडलदृति हा हेगतं॥ मुट मर्दने॥ ३३० चुडि अल्पीभावे॥ मुडि खंडने॥ मुंडति॥
पुडि इत्येके॥ पुंडति॥ रुटि लुटि स्तेये॥ रुंटति॥ लुंटति॥ रुठि लुठि इत्येके॥ रुडि लुडि इत्यपरे॥ स्फुटिर् विशरणे॥ इरित्वादङ् वा॥ अस्फुटत्॥
अस्फोटीत्॥ स्फुटिरित्यपि केचित्॥ इदित्वान्नुम्॥ अस्फुंटीत्॥ पठ व्यक्तायां वाचि॥ पेठतुः॥ पेठुः॥ पेठिथ॥ अपठीत्॥ वठ स्थौल्ये॥ ववठतुः॥ मठ
मदनिवासयोः॥ कठ कृच्छ्रजीवने॥ रठ परिभाषणे॥ ३४० हठ प्लुतिशठत्वयोः॥ बलात्कार इत्येके॥ हठति॥ उठ रुठ लुठ उपघाते॥ ओ
ठति॥ उठ इत्येके॥ ऊठति॥ ऊठ ऊकार॥ पिठ हिंसासंक्लेशनयोः॥ शठ कैतवे च॥ शुठ प्रतिघाते॥ शोठति॥ शुठि इति स्वामी॥ शुंठति॥ कुठि च॥ कुंठति

अयागीत् ३

ष्टयिथ। विसेष। विशश्रिव विससिम। सेता। अर्हत्सार्वधातुकयोर्दीर्घः। अकृत्सार्वधातुकयोर्दीर्घः। अनंतांगस्य दीर्घः स्याद्यादौ प्रत्यये परे नतु कृत्सार्वधातुकयोः। शसीय
न। असैषीत। ष्ठीवु अव्यक्ते शब्दे। कूजि नासहायं पठितुं युक्तं। निलीयं। लडलज्ञिसर्जने। लज लाजि भर्त्सने च। जज जजि युद्धे। तुज हिंसायां।
तोजति। तुतोज। तुंजि पालने। गज गजि गृज गृंजि मुज मुंजि शब्दार्थाः। गज मदने च। वज व्रज गतौ। वदव्रजेति वृद्धिः। अव्राजीत्। ॥ अथ टव
र्गीयांताः शाड्वंताः अनुदात्तेतः षट्त्रिंशत्। अट्ट अतिक्रमणहिंसनयोः। दोपधोऽयं। तोपध इत्येके। अट्टते। आनट्टे। वेष्ट वेष्टने। चेष्ट चेष्टा
यां। अवेष्टिष्ट। गोष्ट लोष्ट संघाते। घुगोष्टे। लुलोष्टे। घट्ट चलने। ऊघट्टे। स्फुट विकसने। स्फोटते। पुस्फुटे। अठि गतौ। अंठते। आनंठे। वठि एका
र्थायां। ववंठे। मठि कठि शोके। शोकइहाध्यानं। मंठते। कंठते। २०। मुठि पालने। मुंठते। हेठ विबाधायां। जिहेठे। एठ च। एठांचक्रे। हिडि गत्यना
दरयोः। हिंडते। जिहिंडे। कुडि संघाते। कुंडते। कुडि दाहे। चुकुंडे। वडि विभाजने। मडि च। भडि परिभाषणे। परिहासः सनिंदोपलंभश्च परिभा
षणं। पिडि संघाते। पिपिंडे। मुडि मार्जने। मार्जनं शुद्धिर्न्यग्भावश्च। मुंडते। तुडि तोडने। तोडनं दारणं हिंसनं च। तुंडते। हुडि वरणे। हरण इत्येके। च
डि कोपने। शडि रुजायां संघाते च। तडि ताडने। पडि गतौ। कडि मदे। खडि मंथे। हेड होडृ अनादरे। जिहेडे। जुहोडे। बाडृ आप्लाव्ये। बशादिः। अ
प्लावमाप्लुवः। बाडते। द्राडृ ध्राडृ विशरणे। शाडृ श्लाघायां। ॥ ॥ अथ आ टवर्गीयांताः परस्मैपदिनः। शौटृ गर्वे। शौटति। युटा
टृ। योटृ बंधे। योटति। म्रेडृ म्रुडृ उन्मादे। द्वितीयो दांतः। टांतमध्ये पाठस्तु अर्थसाम्यात्। नाथति वत्। म्रेटति। म्रोटति। कटे वर्षावरणयोः। च
ट
चटे इत्येके।

ज २
ट

नसेव। रपसांत्वने। षु पसमवाये। समवायः संबंधः सम्यगवबोधो वा। सपति। रपलप व्यक्तायां वाचि। त्रुप मंदायां गतौ। त्रोपति। तु त्रोप। त्रो
पिता। तुप तुंप त्रुप त्रुंप तुफ तुंफ त्रुफ त्रुंफ हिंसार्थाः। तोपति। तुतोप। ३० तुंपति। तुतुंप। तुतुंपतुः। संयोगात्परस्य लिटः कित्त्वाभावान्नलोपो न। किंद्रा
शिषीति किल्त्वान्नलोपः। तुप्यात्। प्रात्तुंपतौ गवि कर्तरी। तिपारस्करादिगणपाठात्सुट्। प्रस्तुंपति गौः। शित्पानिर्देशान्नयङ् लुकि न। प्रतोतुंपीति। त्रो
पति। त्रुंपति। तोफति। तुंफति। तोफति। तुंफति। इहाद्यौ द्वौ पंचमषष्ठौ वनीरफौ। अन्ये सरेफाः। उकाराश्चत्वारः प्रथमांताः। ततो द्वितीयांताः। अ
ष्टावप्युकारवंतः। पर्व रफ रफि अर्ब पर्ब लर्ब बर्ब मर्ब कर्ब खर्ब गर्ब शर्ब षर्ब चर्ब गतौ। आद्यः प्रथमांतः। ततो द्वितीयांताः। द्वितीयत्रितीयौ सु
ख्यो सर्वे तोपधाः। पर्वति। पपर्व। रफति। रंफति। अर्बति। आनर्ब। पर्बति। लर्बति। बर्बति। पवर्गीयादिरयं। मर्बति। कर्बति। खर्बति। गर्बति।
शर्बति। सर्बति। ४० चर्बति। कुबि आच्छादने। कुंबति। लुबि तुबि अर्दने। लुंबति। तुंबति। चुबि वक्त्रसंयोगे। चुंबति। षृभु षृंभु हिंसार्थौ। सर्भति
ससर्भ। सर्भिता। सृंभति। ससृंभ। सृभ्यात्। षिभु षिंभु इत्येके। सेभति। सिंभति। शुभ शुंभ भाषणे। भासन इत्येके। हिंसायामित्यन्ये। ॥ अथा
नुनासिकांताः। ॥ ॥ तत्र क्रम्यंताः अनुदात्तेतो दश। घिणि घुणि घृणि ग्रहणे। घुम्। घुलां। घिण्णते। जिघिंणे। घुण्णते। जुघुंणे। घृण्णते। ऊ घृणे
घुण घूर्ण भ्रमणे। घोणते। घूर्णते। इतो तुदादौ परस्मैपदिनौ। पण व्यवहारे स्तुतौ च। पनते। स्तुतावित्येव संबध्यते। पृथक् निर्देशात्पनिसाहच
र्यात्पणे रपि स्तुतावेवायप्रत्ययः। व्यवहारे तु। पणते। पेणे। पणिले त्यादि। स्तुतावनुबंधस्य केवलेनचरितार्थत्वात्तायप्रत्ययांतात्मनेपदं।

स्तुस्तंतु ५

से

पणायति । पणायांचकार । पेणे । पणायितासि । पणितासि । पणायिता । पणिता । पणायीष्ट । पणिषीष्ट । पनायति । पनायांचकार । पेने । भाम क्रोधे । भामते । बभा
मे । क्षमूष् सहने । क्षमते । चक्षमे । चक्षमिषे । चक्षंसे । चक्षमिध्वे । चक्षंध्वे । चक्षमिवहे । चक्षण्वहे । मांतस्य धातोर्नकारादेशः स्यान्मकारवकारयोः परे
णत्वं । चक्षण्वहे । चक्षमिमहे । चक्षण्महे । क्षमिष्यते । क्षंस्यते । क्षमेत । आशिषि । क्षमिषीष्ट । क्षंसीष्ट । अक्षमिष्ट । अक्षंस्त । कमु कांतौ । कांति
रिच्छा । कमेर्णिङ् । स्वार्थे । ङि । वा नुङ् । कामयते । अयामन्ताल्वाय्येत्न्विष्णुषु । आम् अंत आलु आय्य इत्नु इष्णु एषु परे णेरयादेशः स्यात् ।
वक्ष्यमाणलोपापवादः । कामयांचक्रे । आयादय आर्धधातुके वा । चकमे । कामयिता । कमिता । कामयिष्यते । कमिष्यते । णिश्रिद्रुस्रुभ्यः क
र्तरि चङ् । ण्यंतात् श्र्यादिभ्यश्च च्लेश्चङ् स्यात् कर्त्रर्थे लुङि परे । काम् अ त इति स्थिते । णेरनिटि । अनिडादावार्धधातुके परे णेर्लोपः स्यात् । पर
त्वादेरनेकाच इति यणि प्राप्ते । णेर्लोपो वियङ् यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषेधेनेति वार्तिकं । णिलोपस्यापवादयनः पार्क्षि श्रित्यादि
अंतमेवावकाश इति भावः । चङ्कृते नित्य । अनिटीति वचनसामर्थ्यादार्धधातुकमात्रमस्य विषयः । तथा चेयङादेरपवादत्वायं । इयङ् । अतत
क्षत् । यण् । आटिटत् । गुणः । कारणा । वृद्धिः । कारकः । दीर्घः । कार्यते । णौ चङ्युपधाया ह्रस्वः । चङ्परे णौ यदंगं तस्योपधाया ह्रस्वः स्यात्
चङि । चङि परे अनभ्यासधात्ववयवस्यैकाचः प्रथमस्य द्वे स्तो आदेश्च द्वितीयस्य । सन्वल्लघुनि चङ्परेऽनग्लोपे । चङ्परे इति बहुव्रीहिः । ॥ ॥२३॥
सवांगस्येति इदमप्यावर्तते । अंगसंज्ञानिमित्तं यच्चङ्परं णिरिति यावत् । तस्मिन् यल्लघु तस्मिन् परेंगस्याभ्यासस्य सन्वत् कार्यं स्यादनग्लो

पे सति । अथवांगस्येति नावर्तते । चङ्परे णौ यदंगं तस्य योऽभ्यासो लघुपरस्तस्य सन्वत्स्यादिग्लोपे । सन्यतः । अभ्यासस्यात इकारः स्यात्सनि ॥
दीर्घो लघोः । लघोरभ्यासस्य दीर्घः स्यात्सन्वद्भावविषये । अचीकमत । णिङभावे कमेश्च्लेश्चङ् वाच्यः । णेरभावान्न दीर्घसन्वद्भावौ । अचकमत
॥ ॥ संज्ञायाः कार्यकालत्वाद्दंगं यत्र द्विरुच्यते । तत्रैव दीर्घः सन्वच्च नान्यत्रेति माधवः ॥ २ ॥ चकारस्यार्थापयलूर्णोत्यादीनां गं द्विरुच्यते । किंत
स्यावयवः कः श्विन्नमादेकाच्विदंद्वयं ॥ २ ॥ वस्तुतोंगस्यावयवो योऽभ्यास इति वर्णनात् । ऊर्णोर्दीर्घोर्थापपतौ ह्रस्वं स्यादिति मन्महे ॥ ३ ॥ चकारसोत्
सयभिदं न स्यात्स्या व्यवस्थया । योर्विशेष्यं सन्निहितं लघुनीत्यंगमेव वा ॥ ४ ॥ इति व्याख्याविकल्पस्य कष्टे नैव फणानात् । णेरग्लोपेपि संबं
धस्त्विगितां मपि सिद्धये । ५ ॥ ॥ अथ कम्यंतास्त्रिंशत्परस्मैपदिनः ॥ अण रण वण भण मण कण क्वण व्रण भ्रण ध्वण शब्दार्थाः । अणति । १
रणति । वणति । वकारादित्वादेत्वाभ्यासलोपौ न । ववणतुः । ववणिथ । भणिरपिकेचिन्मन्यते । भणति । ओणृ अपनयने । ओणति । ओणां च
कार । ५६ । शोणृ वर्णगत्योः । शोणति । शुशोण । श्रोणृ संघाते । श्रोणृच । शोणादयः स्युः षोडशीतालव्यौष्ठ्यादयः । पैणृ गतिप्रेरणश्लेषणेषु । पैपण
ध्रणा शब्दे । उपदेशे णो नोयं । रणाभ्यामिति णत्वं । ध्रणति । णोपदेशस्य फलं यङ्लुकि दंध्रन्ति । बणे स्वपि केचित् । बेणयुः । बेणिथ । कनी दीप्तिकांति
गतिषु । चकान । ष्टन वन शब्दे । स्तनति । तेनतिः । वन षण संभक्तौ । वनेरर्थभेदात्पुनः पाठः । सनति । ससान । सेनतुः । येविभाषा । अनसनख
नामात्वं वा स्याद्यादौ क्ङिति । सायात् । सन्यात् । ८०५ अम गत्यादिषु । कनी दीप्तिगते स्पच गतेः परयोः शब्दसंभक्तयोः शब्दवच्च यह । अमति । आम

॥ नश्चापदांतस्यापवादः ३ ॥

॥...दी०॥ यमहंसमीमृगतौ। इमति। इद्राम। एवं मेनिन वृद्धिः। अइमीत्। जहंम। मीमति। मिमीम। अयंशब्दे च। चमुक्रमु रक्रमु स्त्रमु अदने। षिवु क्लमु मग्ना शिमिति। ॥तिणन्त॥
॥२४॥ एषामचो दीर्घः स्यात् छिति। आङः चमइति वक्तव्यं। आचामति। आङः किं। चमति। विचमति। अचमीत्। ञिमिं केलिप्वनि। नमति। कमुपा
दविक्षेपे। वाम्लाशम्लाशम्बमुक्रमुक्लमुत्रसित्रुटिलषः। एभ्यः श्यन्वा कर्त्रर्थे सार्वधातुके परे। क्रमः परस्मैपदेषु। क्रमेर्दीर्घः स्यात् परस्मैपदे शिति
क्राम्यति। कामति। चक्राम। क्राम्यतु। कामतु। स्नुक्रमोरनात्मनेपदनिमित्ते। अत्रैवेट्। अक्रामीत्। ॥ अथ वेत्संज्ञा अनुदात्तेतः॥ अय
वयपयमयचयतयणयगतौ। दयादानगति... दय अय आस्लम्भ आम्स्या ल्लिटि। अयांचके। अयेत। अधिषीष्ट। विभाषेटः। इणः षीध्वं
लुङ् लिटां धस्य वा मूर्धन्यः स्यात्। अयिषीढ्वं। अयिषीध्वं। आयिष्ट। आयिढ्वं। आयिध्वं। उपसर्गस्यायतौ। अयतिपर
स्योपसर्गस्य यो रेफस्तस्य लत्वं स्यात्। प्लायते। पलायते। निस्दुसोरुत्वस्यासिद्धत्वान्न लत्वं। निरयते। दुरयते। निर्दुरोरुत्व। निलयते। दुलय
यते। प्रत्ययइति विणो रूपं। अयपरूयमुदयति वितनोर्धरशिमरञ्जाविनिमाधः॥ इदं किदकदीत्यत्र प्रत्यिलिङ स्य संचिप्यति। यद्वा अनुदा
त्तेत्वलक्षणमात्मनेपदमनित्यं। वरिति खो ङिःकरणात् ज्ञापकात्। वौ द्वित्वां विचये। धेय। मेय। चेय। नेय। प्रणयते। नेय। दयदानगति
निरक्षणहिंसादानेषु। आदानं ग्रहणं। दयांचके। रयगतौ। रयते। ऊयी तंतुसंताने। ऊयांचक्रे। पूयी विशरणे दुर्गंधे च। पूयते। पुपूये
क्नूयी शब्दे उंदे च। चुक्नूये। क्ष्मायी विधूनने। चक्ष्माये। स्फायी ओप्यायी वृद्धौ। स्फायते। पस्फाये। प्यायते। लिङ्यङोश्च। लिटि यङि ॥२५॥
॥ वक्राद्देवान्नसप्तेति एताश्यासलोपनावः॥

व्यायः पी भावः स्यात्। पुनःप्रसंगविज्ञानात् पी शब्दस्य द्वित्वं॥ एरनेकाच इति यण्। पिप्ये। पिप्याते। पिप्यिरे। दीपजनबुधपूरितायिप्यायिभ्यो
न्यतरस्यां। एभ्यश्च्लेश्चिण्वास्यादेकवचनेन शब्दे परे। चिणो लुक्। चिणः परस्य लुक् स्यात्। अप्यायि। अप्यायिष्ट। तायृ संतानपालनयोः॥ संता
संबंध: नः प्रबंधः। तायते। ततायं। अतायि। अतायिष्ट। शल्ववल्ल संवरणे च॥ शेल्ले। वल्लवल्लु संवरणे संवरणेच। ववल्ले। ववल्ले। मल्लमल्लु धारणे। मे
ल्ले। ममल्ले। भल्लभल्लु परिभाषणहिंसादानेषु। बभल्ले। बभल्ले॥ कल्लशब्दे संख्याने च॥ कल्लते। चकल्ले। कल्लुअव्यक्ते शब्दे॥ कल्लुते। चकल्ले। अशब्दे
इतिस्वामी। अशब्दस्तूष्णींभाव इति वा। तेवृ देवृ देवने। तितेवे। दिदेवे। षेवृ गेवृ ग्लेवृ पेवृ मेवृ म्लेवृ सेवने। परिनिविभ्य इति षत्वं। परिसेवते। सिषेवे। अ
यं सोपदेशोऽपि जिन्धासकाशादयः। न द्रुष्यवि... जेगेवे। जिगेवे। पिपेवे॥ २० मेवते। म्लेवते। शेवृखेवृकेवृ इत्यप्येके। रेवृ प्लवगतौ। प्लवगतिः प्लुत
गतिः। रेवते। ॥ अथावत्संज्ञाः परस्मैपदिनः॥ मव्य बंधे। ममव्य। सूर्क्ष्य ईर्क्ष्य ईर्ष्य ईर्ष्यार्थाः। हयगतौ। अहयीत्। यांतस्यान्यद्वृद्धिः। शुच्य अ
भिषवे। अवयवानां शिथिलीकरणं सुरया संधानं वा। अभिषवः स्नानं च। शुशुच्य। चुच्य इत्येके। हर्य गतिकांत्योः। जहर्य। २० अल भूषण
पर्याप्तिवारणेषु। अलति। आल। अतोल्लांतस्य। अत इति कृतवृद्धीकं। अतः समीपो योल्लोलदंतस्यांगस्यातोवृद्धिः स्यात् परस्मैपदपरे सिचि। नेटीति
निषेधस्यानोहल्वादेर्लघोरित्ति विकल्पस्य चापवादः॥ मा भवानालीत्। अयं स्वरितेदित्येके। तन्मते अलते इत्याद्यपि। ञिफला विशरणे। इट्। फ
लिष्टकं। फलतुः। अफालीत्। मीलश्मील्स्मील् क्ष्मील् निमेषणे। निमेषणं संकोचः। द्विती यस्ता लव्यादिः। ष्टक्वी श्लो दंत्यादिः। पील प्रतिष्टंभे। प्रतिष्टोरा

॥क्षी०त०॥ धनं।नील वर्णे॥मिमील॥शील समाधौ।शीलति।शिशील॥कील बंधे॥ ५९० कूल आवरणे॥शल्ल कुमायां संघोषेच।तल्ल निष्कर्षे॥निष्कर्षो निष्कोष तिङ्ग०
॥२५॥ णं।तस्यांतर्गतस्य बहिर्निःसारणं॥तुल्लु॥पूल संघाते॥मूल प्रतिष्ठायां॥फल निष्पत्तौ॥फेलतु॥फेल्व॥गुल्लु भावकरणे॥भावकरणमभिप्राय
विकारः॥फुल्ल विकसने॥विल्लु शैथिल्ये भावकरणेच॥तिल्ल गतौ॥तेल्लति॥तिल्लु स्नेहे॥तिल्लति॥ ६०० वेल्ल वेल्ल केल खेल क्षेल्ल चेल्ल चलने॥पं
वल्ल द्वितीयः॥षष्ठोदोपधः॥पेल फेल शेल गतौ॥षेल्ल इत्येके॥स्खल संचलने॥चस्खाल॥अस्खालीत्॥ ६१० खल संचये॥गल्ल अदने॥गल्लति अतोलोपस्ये
अगालीत्॥षल्ल गतौ॥सल्लति॥दल विशरणे॥श्वल्ल श्वल्ल आशुगमने॥श्वाल॥अश्वालीत्॥शश्वल्ल॥अश्वल्लीत्॥खोल खोर ऋ गतिप्रतिघाते॥ तिनिलंब०
खोलति॥खोरति॥धोर्ऋ गतिचातुर्ये॥धोरति॥त्सर छद्मगतौ॥तत्सार॥अत्सारीत्॥क्मर हूर्छने॥चक्मार॥अक्मारीत्॥अभ्र वभ्र मभ्र चर गत्य
र्थाः॥चरतिर्भक्षणेपि॥अभ्रति॥आनभ्र॥माभवानभ्रीत्॥अंगात्परस्य रेफस्यानःसमीपत्वाभावान्न वृद्धिः॥ष्ठिवु निरसने॥ष्ठिवु क्षिवु इति द्वी र्घ
ष्ठीवति॥अस्य द्वितीयष्ठकारष्टकारोवेति वृत्तिः॥तिष्ठेव॥तिष्ठिवतुः॥तिष्ठिवुः॥टिष्ठेव॥टिष्ठिवतुः॥टिष्ठिवुः॥क्षीवति॥क्षीव्यात्॥जि जये॥अय
मकर्मकोपि त्वंतुंपृक्ष्यतु इत्युत्कर्षप्राप्तिः॥सकर्मकोप्ययं॥जयति॥सन्नलिटोर्जेः॥जयतेः सन्लिटोर्णिमित्तो यो अभ्यासस्तस्मात्परस्य कुत्वं स्यात्॥जि ॥२५॥
गाय॥जिग्यतुः॥जिग्युः॥जीयात्॥अजैषीत्॥जीवप्राणधारणे॥जिजीव॥पीव मीव तीव नीव स्थौल्ये॥पिपीव॥मिमीव॥ ६२० तितीव॥निनी
व॥क्षीवु क्षेवु निरसने॥उर्वी तुर्वी थुर्वी दुर्वी धुर्वी हिंसार्थाः॥उर्वी वकारः॥तुतूर्व॥गुर्वी उद्यमने॥गूर्वति॥ ६३० मुर्वी बंधने॥पुर्व पर्व मर्व पूरणे॥चर्व अदने॥

४ असंयोगपूर्वोपःप्रत्ययोकारस्तदंतस्यांगस्य लोपो वास्यान्म्वोःपरयोः॥धिन्वः॥धिनुवः॥धिन्मः॥धिनुमः॥मिपि तु परत्वाद्गुणः॥धिनोमि॥उतश्च प्रत्ययादसंयोगपूर्वात्
५५
गर्वहिंसायां॥कर्व खर्व गर्व दर्पे॥अर्व शर्व षर्व हिंसायां॥आनर्व॥ ६४० शर्वति॥सर्वति॥इवि व्याप्तौ॥इन्वति॥इन्वांचकार॥पिवि मिवि णिवि सेचने॥द्व
तीया मूर्धन्योष्मादिरित्येके॥सेवन इति तरंगिण्यां॥पिन्वति॥पिपिन्व॥हिवि दिवि धिवि जिवि प्रीणनार्थाः॥हिन्वति॥दिन्वति॥धिन्वि कृण्व्योरच॥अ
धु नयोरकारोंतादेशः स्यात् प्रत्ययश्च शब्विषये॥अतोलोपः॥तस्य स्थानिवद्भावाल्लघूपधगुणो न उप्रत्ययस्य पित्सु गुणः॥धिनोति॥धिनुतः॥
धिन्वंति॥लोपश्चास्यान्यतरस्यांम्वोः॥असंयोगपूर्वो यःप्रत्ययोकारस्तदंतादंगात्परस्य हेर्लुक्॥धिनु॥नित्यत्वादुकारलोपात्पूर्वमाट्॥धिन
वाव॥धिनवाम॥जिन्वतीत्यादि॥ ६५० रिवि रवि धवि गत्यर्थाः॥रिण्वति॥रण्वति॥धन्वति॥कृवि हिंसाकरणयोश्च॥वकाराद्गतौ॥कृणोतीत्या
दि॥धिनोतिवत्॥अयं स्वादौच॥मव बंधने॥मेवतुः॥मेवुः॥अमवीत्॥अमावीत्॥अव रक्षणगतिकांतिप्रीतितृप्त्यवगमप्रवेशश्रवणस्वाम्य
र्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिंगनहिंसादानभागवृद्धिषु॥अवति॥आव॥मास वान्॥वीत्॥धावु गतिशुद्ध्योः॥स्वरितेत्॥धावति॥धाव
ते॥दधाव॥दधावे॥ ॥अथोष्मांता आत्मनेपदिनः॥धुक्ष धिक्ष संदीपनक्लेशनजीवनेषु॥धुक्षते॥दुधुक्षे॥धिक्षते॥दिधिक्षे॥वृक्ष वरणे॥
ववृक्षे॥ववृक्षे॥ ६७० शिक्ष विद्योपादाने॥शिक्षते॥भिक्ष भिक्षायामलाभे लाभेच॥भिक्षते॥क्लेश अव्यक्तायां वाचि॥बाधने इति दुर्गः॥क्लेशते
विक्लेशे॥दक्ष वृद्धौ शीघ्रार्थेच॥दक्षते॥ददक्षे॥दीक्ष मौंड्येज्योपनयननियमव्रतादेशेषु॥दीक्षते॥दिदीक्षे॥ईक्ष दर्शने॥ईक्षांचक्रे॥ईष गति

॥कौ०टी०॥ हिंसासंर्शनेषु। ईर्षा वक्ते। भाषध्य न्नायांवा कि। भाषते। वर्षस्नेहने। दंतोष्ठ्यादिः। गेहृ अन्विच्छायां। ग्लेषृ इत्येके। अन्विच्छा अन्वेषणं। जिगेषते॥ १०॥ येषृ प्रय ति०प्र०
॥२६॥ त्ने। जेषृ णेषृ एषृ प्रेषृ गतौ। जेषते। नेषते। एषांचक्रे। पिप्रेषे। रेषृ हेषृ हेकृ षृ अव्यक्ते शब्दे। आद्यौ रकशब्दे। तनो हावरवशब्दे। रेषते। हेषते। कासृ शब्दकु
त्सायां। कासांचक्रे। भासृ दीप्तौ। बभासे॥ २० णासृ रासृ शब्दे। णौ सते। प्रणासते। णसकौटिल्ये। नसते। भ्यसभये। भ्यसते। बभ्यसे। आङः श
सु इच्छायां। आशंसते। आशशंसे। ग्रसु ग्लसु अदने। ग्रसते। ग्लसते। ईह चेष्टायां। ईहांचक्रे। बहि महि वृद्धौ। बंहते। बबंहे। मंहते॥ अहि गतौ
अंहते। आनंहे। गर्ह गल्ह कुत्सायां। जगर्हे। जगल्हे। बर्ह बल्ह प्राधान्ये। ओ प्राधान्ये ही। वर्ह वल्ह परिभाषणहिंसाच्छादनेषु। दंतोष्ठ्यादी। के चित्तु पूर्वयो
र्दंत्योष्ठ्यादी। नामनयोरोष्ठ्यादिनां चाङ्कः। प्लिह गतौ। पिप्लिहे। वेहृ जेहृ बाहृ प्रयत्ने। आद्योर्हस्यो ष्ठ्यादिः। अंत्यः केवलोष्ठ्यादिः। उभावप्योष्ठ्यादीत्ये
के। दंत्योष्ठ्यादीत्यपरे। जेहतिर्गत्यर्थोपि॥ ३० बबाहे। द्राहृ निद्राक्षये। निक्षेप इत्येके। काष्ठदीहौ। वकारोपि इदित् किल। केचिद् ईहांचक्रे। गाहू विलोड
ने। गाहते। जगाहे। जगाहिषे। जघाक्षे। जगाहिढ्वे। जगाहिध्वे। जघाढ्वे। गाहिता। ढोढे लोपः। ढस्य लोपः स्याद् ढे परे। गाढा। गाहिष्यते। घाक्ष्यते। गाहिष्येते
गाहिषीष्ट। घाक्षीष्ट। अगाहिष्ट। अगाढ। अघाक्षातां। अघाक्षत। अगाढाः। अगाढ्वं। अघाक्षि। ग्रहू ग्रहणे। गर्हते। जगर्हे। ग्रहु उपधेभ्यो लि
टः कित् संयुगात् पूर्वे विप्रतिषेधेन। जगृहिषे। जघृक्षे। जगृढ्वे। गर्हिता। गर्ढा। गर्हिष्यते। घर्क्ष्यते। गर्हिषीष्ट। घृक्षीष्ट॥ लुङि। अगर्हिष्ट। इट्पक्षे ॥२६॥
ते। शल इगुपधादनिटः क्सः। इगुपधो यः शलंतस्तस्मादनिटश्च्लेः क्सादेशः स्यात्। अघृक्षत। क्सस्याचि। अजादौ तङि क्सस्य लोपः स्यात्

अज्जोयस्य। अघृक्षातां। ग्लह च। ग्लहते। घुषि कांतिकरणे। घुंषते। जुघुंषे। केचित्त्विमं घुषं पठंति॥ ॥ अथार्हंत्याः परस्मैपदिनः॥ घुषिर् अ
विशब्दने। विशब्दनं प्रतिज्ञानं ततोन्यस्मिन्नर्थ इत्येके। शब्द इत्यन्ये पेठुः। घोषति। घोषिता। इरित्वादङ् वा। अघुषत्। अघोषीत्। अक्षू व्याप्तौ। अ
क्षोन्यतरस्यां। अक्ष्णोतेर्वा श्नुप्रत्ययः स्यात् कर्त्रर्थे सार्वधातुके परे। पक्षे शप्। अक्ष्णोति। अक्ष्णुतः। अक्ष्णुवंति। अक्षति। अक्षतः। अक्षंति। आ
नक्ष। आनक्षिथ। आनष्ठ। अक्षिता। अष्टा। अक्षिष्यति। स्कोः संयोगाद्योरंते च इति कलोपः। षढोः कः सि। अक्ष्यति। अक्ष्णोतु। अक्ष्णुहि। अक्ष्णवानि। अ
क्ष्णोत्। आक्षत्। अक्ष्णुयात्। अक्ष्यात्। अक्ष्यास्तां। ऊदित्वादिड् वा। नेटि। मा भवान् अक्षीत्। अक्षिष्टां। अक्षिषुः। इट् अभावे तु। मा भवान् आक्षीत्। आ
क्षां। आक्षुः। तक्षू त्वक्षू तनूकरणे। तनूकरणं तक्षः। श्नुः स्यात् शब्दविषये। तक्ष्णोति। तक्षति। काष्ठं। ततक्षिथ। ततष्ठ। आतक्षीत्। अ
तक्षिष्टां। अताक्षीत्। आताष्टां। तनूकरणे किं। वाग्भिः संतक्षति भर्त्सयतीत्यर्थः। उक्ष सेचने। उक्षांचकार। रक्ष पालने। णिक्ष चुंबने। प्रणिक्ष
ति। त्रक्ष ष्ट्रक्ष णक्ष गतौ। त्रक्षति। स्तृक्षति। नक्षति। वक्ष रोषे। संघात इत्येके। म्रक्ष संघाते। मक्ष इत्येके॥ ६०॥ तक्ष त्वक्ष त्वचने। त्वचनं संवरणं। त्वचो
ग्रहणं वा। पक्ष परिग्रह इत्येके। सूर्क्ष आदरे। सुसूर्क्ष। अनादर इति केचित्। विष्कोपपाठः॥ अवज्ञा हेलनं सूर्क्षणमित्यमरः। काक्षि वाक्षि माक्षि कांक्ष ...
क्षायां। द्राक्षि ध्राक्षि ध्वाक्षि घोरवासिते च। चूष पाने। चुचूष। तूष तुष्टौ॥ पूष वृद्धौ। मूष स्तेये। लूष रूष भूषायां। शूष प्रसवे। यूष जूष
प्यादिः। यूष हिंसायां। जूष च। भूष अलंकारे। भूषति। ऊष रुजायां। ऊषांचकार। ईष उंछे॥ ७०॥ कष खष शिष जष झष शष वष मष रुष रिष ॥२॥ ति०प्र०

॥कौ०टी०॥ हिंसार्थाः॥ तनीयषधौ तालव्योष्मादी। ससमोर्दंतोष्म्यादिः। चकाष। चखाष। शिशेष। शिशेषिथ। शेष्टा। क्तः। अशिक्षत्। अशेक्ष्यत्। शेषतु। नि० प्र०

॥२७॥ लक्ष्षतुः। शेषतुः। ववषतुः। मेषतुः। नीषसहलुस रुषरिषः। इकत्यादेः परस्यतादेरार्धधातुकस्य इट् स्यात्। रेषिता। रोष्टा। रोषिष्यति। रे

षिता। रेष्टा। रेषिष्यति। १०० भषभर्त्सने। भर्त्सनं श्वरवः। भषति। बभाष। उषदाहे। ओषति। उषविदजागृभ्योन्यतरस्यां। एभ्यो लिट्याम्

वा स्यात्। ओषांचकार। उवोष। ऊषतुः। उवोषिथ। जिषु विषु मिषु सेचने। जिजेष। कादिनियमादिट्। विवेषिथ। मिमिषिथ। वेष्टा। वेक्ष्यति

अविक्षत्। पुषपुष्टौ। पोषति। पुपोष। पोषिता। पोषिष्यति। अपोषीत्। अनिट्के पुष्य इति श्यना निर्देशादयं सेट्। अतो न क्तः। अङ्विधौ

दैवादिकग्रहणान्नाङ्। श्रिषुश्लिषुप्रुषुप्लुषुदाहे। श्रेषति। शिश्रेष। श्रेषिता। श्लेषति। शिश्लेष। श्लेषिता। अयमपि सेट्। अनिट्सु दैवादिक

भिषुश्लिषुरत्नको० स्यैव ग्रहणमिति कैय्यटादयः। यत्वनिट्कारिकान्यासे द्वयोर्ग्रहणमिति तत्। तत्त्वाक्षिविरोधाद् ग्रंथांतरविरोधाच्चोपेक्ष्यं। पुप्रोष। पुप्लोष

२० पृषुवृषुमृषुसेचने। मृषुसहनेच। इतरौ हिंसासंक्लेशनयोश्च। पर्षति। पपर्ष। पृष्यात्। घृषुसंघर्षे। हृषु अलीके। तुसह्रसह्लसरसशब्दे।

तुतोस। जह्रास। जह्लास। ररास। लसश्लेषणक्रीडनयोः। २० घस्लृ अदने। अयंन सार्वत्रिकः। लिट्यन्यतरस्यामिति सूत्रे घस्लादेशविधाना

त्। तत्तश्च यत्रलिंगंवचनं वा सूत्रितं तत्रैवास्य प्रयोगः। अत एव पाठः शपि परस्मैपदे लिंगं। लृदित्करणमङि। अनिट्कारिकासु पाठो वल्लादार्धधा

तुके। स्मरंति तु द्विविधोपादानं। घसति। घस्ता। सस्यार्धधातुके। सस्यतः स्यात् स्तादावार्धधातुके। घत्स्यति। घसतु। अघसत्। घसेत्।

॥२७॥

स्वघस्याः कारवृ। घस्लृ अदनइत्यस्यग्रहणं॥

लिंगाद्यभावादाशिष्यस्याप्रयोगः। पुषादिद्युताद्यॢदितः परस्मैपदेषु। श्यन्विकरणपुषादेर्द्युतादेर्लृदितश्च परस्य च्लेरङ् स्यात्परस्मैपदेषु। अघ

सत्। ऊर्जं चर्व हर्ष परिभाषणहिंसातर्जनेषु। पिसृपेसृगतौ। पिपिसतुः। पिपिसुः। हसेहसने। एदित्वान्न वृद्धिः। अहसीत्। णिशसमाधौ।

तालव्योष्मांतः। प्रणोशति। मिशमशशब्दे रोषकृते च। तालव्योष्मांतौ ३० शवगतौ। दंत्योष्मांतः। तालव्योष्मादिः। शवति। अशावीत्। शर्बुन

गतौ। तालव्योष्मांतः। शशाश। शेशतुः। शेशुः। शेशिथ। शसुहिंसायां। दंत्योष्मांतः। न शसददवादिगुणानां। शशसतुः। शशसुः। शशसिथ। शंसु

स्तुतौ। अयं दुर्गतावपीति दुर्गः। नृशंसो घातुकः क्रूर इत्यमरः। शशंस। आशिषि नलोपः। शस्यात्। चहपरिकल्कने। कल्कनं शाठ्यं। अचहीत्

महपूजायां। अमहीत्। रहत्यागे। रहिगतौ। रंहति। रंहात्। दृहदृहिबृहबृहि वृद्धौ। दर्हति। ददर्ह। ददृहतुः। दृंहति। ४० बर्हति। बृंहति। बृहिशब्दे

च। बृंहितं करिगर्जितं। उहिर् इत्येके। उहिर्अर्दने। ओहति। उवोह। ऊहतुः। औहीत्। अद्दुहत्। अर्हपूजायां। आनर्ह। ॥ अथ कृप

तु। अनिट्कारिकास्वस्य दुहेर्ग्रहणं नेच्छंति। ओहति। उवोह। ऊहतुः। ओहिता। आसयानुहत्। ओहीत्। अर्हपूजायां। आनर्ह। ॥ अघकूप

र्यंता अनुदात्तेतः। द्युतदीप्तौ। द्योतते। द्युतिस्वाप्योः संप्रसारणं। अनयोरभ्यासस्य संप्रसारणं स्यात्। दिद्युते। दिद्युताते। द्योतिता

द्युभ्यो लुङि। द्युतादिभ्यो लुङः परस्मैपदं वा स्यात्। पुषादीति सूत्रेण परस्मैपदेऽङ्। अद्युतत्। अद्योतिष्ट। श्विता वर्णे। श्वेतते। शिश्विते

अश्वितत्। अश्वेतिष्ट। ञिमिदास्नेहने। मेदते। मिदेर्गुणः। मिदेरिको गुणः स्यादित्संज्ञकशकारादौ प्रत्यये परे। एशोआदिशित्वाभावा

एशद्भेतदं स्मर्तितं॥

कौ०द्वि।। न्नानेनगुणः। मिमिदे। अमिदत्। अमेदिष्ट। ञिष्विदा स्नेहनमोचनयोः। मोहनयोरित्येके। स्वेदते। सिष्विदे। अस्विदत्। अस्वेदिष्ट। ञिक्ष्विदा ति०भा०
।।१८।। चेत्येके। अक्ष्विदत्। अक्ष्वेदिष्ट। ७५० रुच दीप्तावभिप्रीतौ च। रोचते। हरये रोचते भक्तिः। अरुचत्। अरोचिष्ट। घुट परिवर्तने। घोटते। जुघुटे। अ
घुटत्। अघोटिष्ट। रुट लुट लुठ प्रतीघाते। अरुटत्। अरोटिष्ट। शुभ दीप्तौ। क्षुभ संचलने। णभ तुभ हिंसायां। आद्यः अभावेऽपि। नभन्तामन्य
के। समे। मा सम्बध्नन्त्वन्यके सर्वे इति निरुक्तं। अनभत्। अनभिष्ट। अतुभत्। अतोभिष्ट। इमौ दिवादौ क्र्यादौ च। स्रंसु ध्वंसु भ्रंसु अवस्रंसने।
ध्वंसु गतौ। अनिदितां नलोपः। अस्रसत्। अस्रंसिष्ट। नाससत्करिणां ग्रैवमिति रघुः। ७६० स्रंभु इत्यपि केचित्। विश्वासे। अचलत्नीयत एव नालध्यान
इत्यन्ये। भ्रंशु भ्रंसु अधःपतन इत्यन्ये दिवादौ। स्रंभु विश्वासे। अस्रभत्। अस्रंभिष्ट। इत्यादि रूपं। नालध्यादिस्तु प्रमादेगनः। वृतु वर्तने।
वर्तते। ववृते। वृद्भ्यः स्यसनोः। वृतादिभ्यः परस्मैपदं वा स्यात्स्यसनोः। न वृद्भ्यश्चतुर्भ्यः। एभ्यः सकारादेरार्धधातुकस्येण्न स्यात् तङानयोरभावे।
वर्त्स्यति। वर्तिष्यते। अवृतत्। अवर्तिष्ट। अवर्त्स्यत्। अवर्तिष्यत। वृधु वृद्धौ। शृधु शब्दकुत्सायां। इमौ वृतिवत्। स्यन्दू प्रस्रवणे। स्यन्दते।
सस्यन्दे। सस्यन्दिषे। सस्यन्त्से। सस्यन्दिध्वे। सस्यन्ध्वे। स्यन्दिता। स्यन्ता। वृद्भ्यः स्यसनोरिति परस्मैपदे कृते ऊदित्त्वलक्षणमन्तरंगमपि वि
कल्पं बाधित्वा वृतुर्ग्रहणसामर्थ्यान्न वृद्भ्य इति निषेधः। स्यन्त्स्यति। स्यन्दिष्यते। स्यन्त्स्यते। स्यन्दिषीष्ट। स्यन्त्सीष्ट। द्युद्भ्यो लुङीति प।। १८।।
रस्मैपदपक्षे अङ्। नलोपः। अस्यदत्। अस्यन्दिष्ट। अस्यन्त। अस्यन्त्साताम्। अस्यन्त्सत। अस्यन्त्स्यत्। अनुविपर्यभिनिभ्यः स्यन्दतेर
अस्यन्दिष्यत। अस्यन्त्स्यत।।

प्राणिषु। एभ्यः परस्याप्राणिकर्तृकस्य स्यन्दतेः सस्य षो वा स्यात्। अनुष्यन्दते। अनुस्यन्दते वा जलं। अप्राणिषु किं। अनुस्यन्दते हस्ती।
अप्राणिष्विति पर्युदासान्मत्स्योदके अनुष्यन्दते इत्यत्र अपि पक्षे षत्वं भवत्येव। अप्राणिषु नेत्युक्तौ तु न स्यात्।। कृपू सामर्थ्ये। कृपो रो लः।
कृप उः इति छेदः। कृपेति लुप्तषष्ठीकं। तस्यावर्तते। कृपेर्योरेफस्तस्य लः स्यात्। कृपेर्ऋकारस्यावयवो यो रः रेफसदृशस्तस्य लृकारसदृशः स्यात्।
कल्पते। चक्लृपे। चक्लृपिषे। चक्लृप्से। इत्यादि स्यन्दिवत्। लुटि च क्लृपः। लुटि स्यसनोश्च क्लृपेः परस्मैपदं वा स्यात्। तासि च क्लृपः। क्लृपेः परस्य तासेः
सादेरार्धधातुकस्येण्न स्यात् तङानयोरभावे। कल्प्तासि। कल्प्तास्थः। कल्पितासे। कल्प्तासे। कल्प्स्यति। कल्पिष्यते। कल्प्स्यते। कल्पिसी
ष्ट। क्लृप्सीष्ट। अक्लृपत्। अकल्पिष्ट। अक्लृप्त। अकल्प्स्यत्। अकल्पिष्यत्। अकल्प्स्यत।। वृत्। वृतः संपूर्णो द्युतादिर्वृतादिश्चेत्यर्थः।। अथ त्व
रन्तास्त्रयोदशानुदात्तेतः षितश्च।। घट चेष्टायां। घटते। जघटे। घटादयः षित इति वक्ष्यमाणेन मित्संज्ञा। तत्फलं तु णौ।। मितां ह्रस्वः इति
णिच्युपधाया ह्रस्वः। घटयति। विघटयति। कथं तर्हि कमलवनोद्घाटनं कुर्वते ये। प्रविघाटयिता समुत्पतन्हरिदश्वः क
मलाकराणि वेत्यादि। शृणु। घट संघात इति चौरादिकस्येदं। न च तस्यैवार्थविशेषे मित्त्वार्थमनुवादोऽयमिति वाच्यं। नान्ये मितोऽहेताविति
निषेधात्। अहेतौ स्वार्थे णिचि रूपादिदं न तु हेतुमणिचि ... योमितो नेत्यर्थः। व्यथ भयसंचलनयोः। व्यथते। व्यथो लिटि। व्यथो
ऽभ्यासस्य संप्रसारणं स्याल्लिटि। हलादिःशेषापवादः। अस्य हलादिःशेषेण निवृत्तिः। विव्यथे। ७० प्रथ प्रख्याने। पप्रथे। प्रस विस्तारे। प
थकारस्य।।

॥कौ०टी०॥ प्रसे॥ मृद मर्दने॥ स्वद स्वर्दने॥ स्वर्दनं प्रशावणं॥ द्रजि गति हानयोः॥ मित्वसामर्थ्याद्दनुपधात्वेऽपि विण्णमुलोरितिदीर्घविकल्पः॥ असञ्जि॥ ति०प्र०
॥२९॥ असञ्जि॥ संञ्जं॥ सञ्जं॥ सञ्जं॥ सञ्जं॥ रसगतिहिंसनयोः॥ योयं रस्त्रिते प्यार्थयोरनुदात्तेनुपठितस्तस्येदार्थविशेष इत्यर्थमनुवादः॥ क्रप
कृपायां गतौ॥ कदि क्रदि क्लदि वैक्लव्ये॥ वैक्लव्यं इत्येके॥ त्रयोप्यनिदित इति मंडी॥ इदित इति स्वामी॥ कन्दिः क्रन्दिः इदितो॥ कन्दकन्देति यानिदितामि
तिमैत्रेयः॥ कदि क्रदि क्लदी नामाह्वानरोदनयोः परस्मैपदिषु कानां पुनरिहपाठो मित्वार्थ आत्मनेपदार्थश्च॥ ९० ञित्वरा संभ्रमे॥ घटादयः
षितः॥ षित्वादङ्‌॥ त्वरा॥ वक्ष्यते॥ ॥अथ फणांताः परस्मैपदिनः॥ ज्वर रोगे॥ ज्वरति॥ उज्ज्वार॥ गड सेचने॥ गडति॥ जगाड॥ हेड वेष्टने॥ हेड अ पुनरुच्यते ६
धात्वर्थसंग्रहः नादर इति आत्मनेपदिषु गतः स एवोक्तः सानुबंधोऽनेन पाते अर्थविशेष इत्यार्थो॥ परस्मैपदिस्पोऽज्वरादिष्वः प्रागेवानुवादे कर्तव्ये तन्न्यायेन त
हसामर्थ्यात् परस्मैपदं॥ हेडति॥ जिहेड॥ हिडयति॥ अहिडि॥ अहीडि॥ अनादरे तु हेडयति॥ वट भट परिभाषणे॥ वटे वेष्टने॥ भट स्व वापिति पठितयोः
रिभाषणेमित्वार्थोनुवादः॥ णट नृत्तौ॥ इत्थमेव पूर्वमेव पठितं॥ न चायं द्विरुक्तः॥ पूर्वं पठितस्य नाद्यमित्यर्थः॥ यत्कारि पुनरव्यपदेशः॥ पदार्था भि नाथकारिषु ४
नयोन्नत्वं॥ गात्रविक्षेपमात्रं नृत्तं॥ केचित्तु घटादौ तु नट नताविति पठंति॥ गतारित्यन्ये॥ णोपदेशपर्युदासवाक्ये भाष्यकृता नाटी तिदीर्घपाठ
॥२९॥ न्यायादिर्णोपदेश एव॥ स्तक प्रतीघाते॥ स्तकति॥ यकुल्तप्तौ॥ त्कषि प्रतिघातयोः पूर्वं पठितस्य त्कषिमानित्यर्थोऽनुवादः॥ आत्मनेपदिषु प
ठितस्य परस्मैपदिष्वनुवादात् परस्मैपदं॥ कस्वेह हसने॥ ल्दिन्वान्न वृद्धिः॥ अकस्वीत्॥ रग शंकायां॥ लग संगे॥ हगे ह्लगे षगे ष्टगे संवरणे॥ कगे नो
×वाक्यार्थोत्तिनयोनाद्यं घटादौ तु नृत्तं न तु वार्थः ४

पते॥ अस्यायमर्थ इति विशिष्य नोच्यते॥ क्रियासामान्यार्थत्वात्॥ अनेकार्थत्वादित्यन्ये॥ अक अग कुटिलायां गतौ॥ कण रण गतौ॥ चका
ण॥ ९०० ररास॥ चण शण श्रण दाने च॥ शण गतावित्यन्ये॥ श्रथ क्नथ क्रथ क्लथ हिंसार्थाः॥ आसिनि प्रहणेति सत्रेक्राथेति मित्वेपि इदित्
पात्यते॥ क्राथयति॥ मित्वं तु निपातनात्परत्वाच्चिण्णमुलोरिति दीर्घे चरितार्थं॥ अक्रथि॥ अक्राथि॥ क्रथं क्रथं॥ क्राथं क्राथं॥ वन व॥ हिंसा
यामिति शेषः॥ वनुश्च नोच्यते॥ वनु इत्यपूर्वत्वाद्यं धातुर्न तनादिकस्यानुवादः॥ उदित्करणसामर्थ्यात्॥ तेन क्रियासामान्ये वनतीत्यादि॥ प्रव
नयति॥ अनुपसर्गस्य तु मित्वविकल्पो वक्ष्यते॥ ९० ज्वल दीप्तौ॥ प्रत्ययार्थे पठिष्यमाणस्य यायमित्यर्थमनूद्यते॥ प्रज्वलयति॥ ह्वल ह्मल
चलने॥ प्रह्वलयति॥ प्रह्मलयति॥ स्मृ आध्याने॥ चिंतायां पठिष्यमाणस्याध्याने मित्वार्थोनुवादः॥ आध्यानमुत्कंठापूर्वकं स्मरणं॥ दृ भये
दृ विदारण इति क्र्यादेस्यमनुवादः॥ दरणं भयं दरयति दरयति॥ भयादन्यत्र दारयति॥ धात्वंत रमेवेदमिति मते तु दरती त्यादि॥ केचिदटादौ अ
स्य दृ त्वरेतिस त्रेचदृतिदीर्घस्यानेदृ स्वं पठंति तन्मे तिमाधवः॥ नृ नये॥ क्र्यादिषु पठिष्यमाणस्यानुवादः॥ नयादन्यत्र नारयति॥ श्रा पाके
श्रैतिसूत्रात्तस्यश्राइति आदादिकस्य च सामान्येनानुकरणं॥ लुग्विकरणालुग्विकरणयोरलुग्विकरणस्य॥ लक्षणप्रतिपदोक्तस्येति परि
भाषाभ्यां श्रपयति॥ विक्लृ दयती त्यर्थः॥ पाकादन्यत्र श्रापयति॥ स्वेदयती त्यर्थः॥ मारण तोषण निशामनेषु ज्ञा॥ निशामनं चाक्षुषज्ञानमिति मि
धवः॥ आपनमात्रमित्यन्ये॥ निशाने धिति पाठांतरं॥ एषु चार्थेषु निशानं तीक्ष्णीकरणं॥ एषु चार्थेषु ज्ञा नातिर्मित्स्यात्॥ मापमिति तु राद्धे॥ सा

॥कौ॰टी॰॥ णाधातु॰ ॥२०॥ नं मारणादिकं च तस्यार्थः कार्यः। विज्ञापनामर्त्ये बुसिद्धमे नीनि। तज्ज्ञापयत्याचार्य इति च। ज्ञपु। माध चमने तासु षकाने मित्वाभावान्ना नि॰ प्रा॰
पनमा त्रे मित् त्वमिति मतेस्तु ज्ञा नियोगे चौरादिकस्य। धातूनामनेकार्थत्वात्। निशाने चिति पठनात् रदनादीनां मतेस्तु न कापत्यनुपपत्तिः। कंपन
वल्लिः। चल कंपने इति ज्वलादिः। चलयति शाखां। कंपनादन्यत्र तु शीलं चालयति। अन्यथा करोतीत्यर्थः। रत्नीत्यर्थ इति स्वामी। मत्रं चाल्लय
ति। क्षिपतीत्यर्थः। छदिर् ऊर्जने। छद अपवारण इति यो ऽदादिकस्य स्वार्थे णिजभावे मित्वार्थो यमनुवादः। अनेकार्थत्वादूर्जे स्वेर्थे वृत्तिः। छ
दंनं प्रयुंक्ते छदयति। बलवंतं प्राणवंतं वा करोतीत्यर्थः। अन्यत्र छादयति। अपवारयंतं प्रयुंक्त इत्यर्थः। स्वार्थे णिचि तु छादयति। प्रबलीभ
वति। प्राणी भवति। अपवारयति वेत्यर्थः। जिह्वोन्मथने लुडिः। लुडि विन्यास इति पठितस्य मित्वार्थो नुवादः। उन्मथनं ज्ञापनं। जिह्वाशब्देन त पष्ठी
त्पुरुषः। लडयति जिह्वां। लतीयात्कुरुषो वा। लाडयति जिह्वया। अन्ये तु डि ह्रा शब्देन तद्व्यापारो लक्ष्यते। सभातरद्धं द्वयं। लडयति र
त्तुं। लडयति दृष्टिः। अन्यत्र लाडयति पुत्रं। मदी हर्षग्लेपनयोः। ग्लेपनं दैन्यं। दैवादिकस्य मित्वार्थो यमनुवादः। मदयति। हर्षयति ग्लेपय
तीत्यर्थः। अन्यत्र मादयति। चित्तविकारमुत्पादयतीत्यर्थः। ध्वन शब्दे। भ्वादौ पठितस्य मित्वार्थमनुवादः। ध्वनयति घंटां। अन्यत्र ध्वानयति। ध
अस्पष्टस्वरमुच्चारयतीत्यर्थः। अत्र भोजः। दलि वलि स्खलि रणि ध्वनि त्रपि क्षपयश्चेति पपाठ। तत्र ध्वनिरणी उदाहृतौ। दल विदारणे। सं ॥२०॥
संवरणे। स्खल संचलने। त्रपूष् लज्जायां। इत्येते। तेषां णौ दलयति। वलयति। ... स्खलयति। त्रपयति। ते सर्वे इति वक्ष्यमाणस्य

हृतात्वस्य पुकान्निर्देशः। स्वपयति। स्वन अवतंसने। शब्द इति पठिष्यमाणस्यानुवादः। स्वनयति। अन्यत्र स्वानयति। घट्टादयो मितः। मित्संज्ञा
इत्यर्थः। जनी जृष् क्नसु रंजोऽमंताश्च। मित इत्यनुवर्तते। जन जिति क्षिणि देशाज्जीर्यते ग्रहणं। जनयति। जरयति। केचित्तु जनी जृष् क्नसु इति पठिता
वस्तु निरसने इति दैवादिकपुरारंति। ज्वल ह्वल ह्मल नमामनुपसर्गाद्वा। एषां मित्त्वं वा। ज्ञाप विभाषेयं। ज्वलयति। ज्वालयति। उपस
र्गात्तु नित्यं मित्त्वं। प्रज्वलयति। कथं तर्हि प्रज्वालयति। उन्नामयतीति। घञंता ह्वा करोतीति णौ। कथं संक्रामयतीति। मितां ह्रस्व
इति सूत्रे वा चित्तविरागे इत्यतो वेत्यनुवर्त्य व्यवस्थितविभाषाश्रयणादिति हरदत्तः। शालेन रजो विश्रामयनाहं॰ धुयोन्वि
श्रामयेति स इति व्याख्यातं। ग्ला स्ना वनु वमां च। अनुपसर्गादेषां मित्त्वं वा स्यात्। आद्ययोरप्राप्ते इतरयोः प्राप्ते विभाषा। न
कम्यमिचमां। अमंतत्वात् प्राप्तं मित्त्वमेषां न स्यात्। कामयते। आमयति। चामयति। शमो दर्शने। शाम्यतिर्दर्शने मिन्न स्यात्
निशामयति रूपं। अन्यत्र तु प्रणिधिनो निशमय्य रघूः कथाः। कथं तर्हि निशामयत् इत्यपि विस्तराः दत्तो मम इति। शम
आलोचने इति चौरादिकस्य। धातूनामनेकार्थत्वात् श्रवणे वृत्तिः। शामयति चक्षुः। यमोऽपरिवेषणे। यच्छतिर्भोजनातोऽन्यत्र मिन्न
स्यात्। आयामयति। दीर्घयति व्यापारयति वेत्यर्थः। परिवेषणे तु यमयति ब्राह्मणान् भोजयतीत्यर्थः। चर्षेव सितं निशमय
न्नित्यादिनियमवतः शब्दान्तरतोनीतिर्णीतो बोध्यं। स्खदिर् अवपरिभ्यां च। मिन्न स्यात्। अवस्खादयति। परिस्खादयति। अपा

॥कौ०टी०॥ ॥२४॥

वपरित्यइति न्यासकारः॥स्वामी तु नकर्मा तिन अंउ इत्र रचसू भ्वामनुस्वर्खेशम उदर्शनिइनिविकेल्ला यमस्व परिवे षणो मित्यमाह॥ तन्मते पर्यव ॥ति०भ्वा०॥
सितंनियमयन्नित्यादिसम्यगेव॥ उपसर्ग स्य सवरेम्वेदवादि पूर्वस्येति नियमात् प्रसादयती त्याह॥ तस्मा त्सूत्र इपेउदाहरणप्रत्युदाहरण यो र्व्य
त्ययः फलितः॥ इदं च मतं हन्निन्यासादिविरोधादुपेक्ष्यं॥ फणागतौ॥ नेतिनिवृत्तं॥ असंभवात्॥ निषेधात्पूर्वमसौ पठितः फणादिकार्यानुरोधात्॥ फ
णां च समानां॥ एषां वा एत्वाभ्यासलोपौ स्तः किति लिटि सेटि थलि च॥ फेणतुः॥ पफणतुः॥ फेणिथ॥ पफणिथ॥ पफणतुः॥ फणयति॥ वन्॥ समासेन घटादि
फणेः प्रागेव वृद्धिः स्यैवे॥ तन्मते फाणयती त्येव॥ राजृ दीप्तौ॥ स्वरितेत्॥ राजति॥ राजते॥ रेजतुः॥ रराजतुः॥ रेजे॥ रराजे॥ अनदित्त्वनुवृत्तिर पि विधा
नसामर्थ्यादत्र एत्वं॥ टुभ्राजृ टुभ्राशृ टुभ्लाशृ दीप्तौ॥ अनुदात्तेतः॥ भ्राजृ ने ति पाठः फणादिकार्यार्थः॥ पूर्वं पाठस्तु अभ्याद्वि पत्वा सार्थः॥
नत्र राजिसाहचर्यात् फणादेरग्र ... हणं॥ भ्रेजे॥ बभ्राजे॥ वाभ्राशोति श्यन्वा॥ भ्राश्यते॥ भ्राशते॥ भ्रेशे॥ बभ्राशे॥ भ्लाश्यते॥ बभ्ला
शे॥ भ्लेशे॥ द्वावपीमौ तालव्योष्मान्तौ॥ स्यमु स्वन ध्वन शब्दे॥ स्यमादयः स्रुत्यंताः परस्मैपदिनः॥ ॥ स्यमतुः॥ सस्यमतुः॥ अस्यमीत्॥ स्वेन ४ स्यंतेतिनवृद्धिः
तुः॥ सस्वनतुः॥ अस्वानीत्॥ अस्वनीत्॥ विध्वनयति॥ अवध्वनति॥ सशब्द मुक्ते इत्यर्थः॥ वेश्व सनेति षत्वं॥ फणादयो गताः॥ ॥ ध्वन ॥२१॥
तुः॥ १० — २० षम ष्टम अवैकल्ये॥ ससाम॥ तस्ताम॥ ज्वल दीप्तौ॥ अज्वालीत्॥ चल कंपने॥ जल घातने॥ घातनं तैक्ष्ण्यं॥ जलति॥ टल ट्वल वै
क्लव्ये॥ ष्टल स्थाने॥ हल विलेखने॥ णल गंधे॥ बंधन इत्येके॥ २० ॥ पल गतौ॥ पलति॥ बल प्राणने धान्यावरोधे॥ बेलतुः॥ बेलुः॥ पुल महत्वे॥ पोल

॥ ...॥

ति॥ कुल संस्त्याने बंधुषु च॥ संस्त्यानं संघातः॥ बंधुशब्देन तद्व्यापारो गृह्यते॥ कोलति॥ चुकोल॥ शल हुल पत्लृ गतौ॥ शशाल॥ जुहोल॥ पपात
पेततुः॥ पतिता॥ पतन्पुम्॥ अङि॥ अपप्तत्॥ नेर्गदेति णत्वं॥ प्रणिपतति॥ क्वथे निष्पाके॥ क्वथति॥ चक्वाथ॥ अक्वथीत्॥ पथे गतौ॥ अपथीत्
मथे विलोडने॥ मेथतुः॥ अमथीत्॥ ७० टुवमु उद्गिरणे॥ इहैव निपातनात् हन इत्वमिति सुधाकरः॥ ववाम॥ ववमतुः॥ वादित्वादेत्वाभ्यासलो
पौ न॥ भोजस्तु वेमतु रित्याद्युदाहृतवान्॥ तद्भाष्यादौ न दृष्टं॥ भ्रमु चलने॥ वाभ्राशेति श्यन्वा॥ भ्रम्यति॥ भ्रमति॥ भ्राम्यतीति तुदिवादेर्देवस्य
ते॥ वाजॄभ्रमुत्रसां॥ एषामेत्वाभ्यासलोपौ वा स्तः किति लिटि सेटि थलि च॥ भ्रेमतुः॥ बभ्रमतुः॥ अभ्रमीत्॥ क्षर संचलने॥ अक्षारीत्॥ अथ
द्वावनुदात्तेतौ॥ षह मर्षणे॥ परिनिविभ्य इति षत्वं॥ परिषहते॥ सेहे॥ सहिता॥ तीषसहेति वेट्॥ ढ्रुभावेढत्व धत्व ष्टुत्वढलोपाः॥ सहिरसो
रोदवर्णस्य॥ अनयोर्वर्णस्य ओत्स्यात् ढलोपे॥ सोढः॥ सोढुपस्य सहेः सस्य षत्वं न स्यात्॥ परिसोढा॥ सिवादीनां वाड्व्यवायेपि॥ परिनिवि
भ्यः परेषां सस्य षो वा स्यात् अड्व्यवाये॥ पर्यषहत॥ पर्यसहत॥ रमु क्रीडायां॥ रेमे॥ रेमिषे॥ रंता॥ रंस्यते॥ रंसीष्ट॥ अरंस्त॥ ॥ अथ
कुसंताः परस्मैपदिनः॥ षद्लृ विशरणगत्यवसादनेषु॥ पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्य ॥ ५०॥६०
र्छधौशीयसीदाः॥ पादीनां पिबादयः स्युरित्संज्ञकशकारादौ प्रत्यये परे॥ सीदति॥ ससाद॥ सेदतुः॥ सेदिथ॥ ससत्थ॥ सत्ता॥
सत्स्यति॥ लृदित्वादङ्॥ असदत्॥ सदिरप्रतेः॥ निषीदति॥ न्यषीदत्॥ सदेः परस्य लिटि॥ सदेरभ्यासात्परस्य षत्वं न स्याल्लिटि॥ नि
अनेन वोदस्येति यक्क व्येवर्णग्रहणं तात्परोपि अक्कमकालोपपाद:५॥

॥ कौमु॰ ॥ षसाद॥ निषेदतुः॥ शद्लृ शातने॥ विशीर्णा नायामयं॥ शातनं तु विषयतया निर्दिश्यते॥ शदेः शितः॥ शिद्भाविनोऽस्माद् आत्मनेपदं स्यात्॥ शी ति॰ १३॰
॥२२॥ यते॥ शशाद॥ शेदतुः॥ शेदिथ॥ शशाथ॥ शत्ता॥ अशदत्॥ क्रुश आह्वाने रोदने च॥ क्रोशति॥ क्रोष्टा॥ कुशः क्सः॥ अक्रुक्षत्॥ कुच संपर्चन कौ
टिल्यप्रतिष्टंभविलेखनेषु॥ कोचति॥ चुकोच॥ बुध अवगमने॥ बोधति॥ बोधिता॥ बोधिष्यति ८५० रुह बीजजन्मनि प्रादुर्भावे च॥ रोह
ति रुरोह॥ रुरोहिथ॥ रोढा॥ रोक्ष्यति॥ अरुक्षत्॥ कस गतौ॥ अकसीत्॥ अकासीत्॥ समाप्ता यं च्वः ञ्यादिगणः॥ अथ परस्मैपदिनः स्वरि
तेतः॥ ॥हिक्क अव्यक्ते शब्दे॥ हिक्कति॥ हिक्कते॥ अंचु गतौ याचने च॥ अंचति॥ अंचते॥ अचुस्त्येके॥ अचि इत्यपरे॥ टु याचृ याच्ञायां॥
याचति॥ याचते॥ रेटृ परिभाषणे॥ रेटति रेटते॥ चते चदे याचने॥ चचात॥ चेते॥ अचतीत्॥ चचाद॥ चेदे॥ अचदीत्॥ प्रोथृ पर्याप्तौ॥ पु
प्रोथ॥ पुप्रोथे॥ मिदृ मेदृ मेधा हिंसनयोः॥ मिमेद॥ मिमिदे॥ मिमेदे॥ ८६० थांता विमा विति स्वामी॥ नमा मि मेथृ धांता विति न्यासः॥ मे
ने धृ संगमे च॥ मेधति॥ मिमेधे॥ णिदृ णेदृ कुत्सासंनिकर्षयोः॥ निनिदतुः॥ निनिदे॥ निनेदतुः॥ निनेदे॥ शृधु मृधु उंदने॥ उंदनं क्लेदनं॥ श
र्धति॥ शर्धते॥ शर्धिता॥ मर्धति॥ मर्धते॥ बुधिर् बोधने॥ बोधति॥ इरितो वा॥ अबुधत्॥ अबोधीत्॥ अबोधिष्ट॥ दीपजन इति चिण् तु न भव
ति॥ पूर्वेण साहचर्याद्दैवादिकस्यैव तद्ग्रहणात्॥ उबुंदिर् निशामने॥ निशामनं ज्ञानं॥ बुबुंद॥ बुबुंदे॥ अबुदत्॥ अबुंदीत्॥ वेणृ गतिज्ञा ॥२२॥
नचिंतानिशामनवादित्रग्रहणेषु॥ वेणति॥ वेणते॥ ७० खनु अवदारणे॥ खनति॥ खनते॥ गमहनजनखनघसां लोपः क्ङित्य
नजिहीकएपा ५॥

नङि॥ एषामुपधाया लोपोऽजादौ क्ङित्यनङि॥ चख्नतुः॥ ये विभाषा॥ खायात्॥ खन्यात्॥ चीवृ आदानसंवरणयोः॥ चिचीव॥ चिचीवे॥ चायृ पू
जानिशामनयोः॥ व्यय गतौ॥ अव्ययीत्॥ दाशृ दाने॥ ददाश॥ ददाशे॥ भेषृ भये॥ गतावित्येके॥ भेषति॥ भेषते॥ भ्रेषृ भ्लेषृ गतौ॥ असगति
दीप्त्यादानेषु॥ असति॥ असते॥ आस॥ आसे॥ अयं षोपदेशोपि॥ स्पश बाधनस्पर्शनयोः॥ स्पर्शनं ग्रथनं॥ स्पशति॥ स्पशते॥ लष कांतौ॥ वाभ्रा
शभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलष इति श्यन्वा॥ लष्यति॥ लषते॥ लेषे॥ चष भक्षणे॥ छष हिंसायां॥ चछषतुः॥ चछषे॥ झष आदानसंवरणयोः॥
म्लक्ष भक्ष अदने॥ दास दाने॥ माह माने॥ गुहू संवरणे॥ ऊदुपधाया गोहः॥ गुहेरुपधाया ऊत्स्यादगुणहेतावजादौ प्रत्यये परे॥ गूहति॥
६१॥८१ गूहते॥ ऊदित्वादिड्वा॥ गूहिता॥ गोढा॥ गूहिष्यति॥ घोक्ष्यति॥ गूहेत्॥ गुह्यात्॥ अगूहीत्॥ इड्भावपक्षे॥ अघुक्षत्॥ लुग्वा दुहदिहलिह
गुहामात्मनेपदे दंत्ये॥ एषां क्सस्य लुग्वा स्याद्दंत्ये तङि॥ लोपस्त्वनुमाने लुग्ग्रहणं सर्वलोपार्थं॥ ढत्वधत्वष्टुत्वढलोपदीर्घाः॥ अगूढ॥ अघु
अगूढ्वं क्षत॥ क्सस्याचि॥ लोपः॥ अघुक्षातां॥ अघुक्षत॥ अगूहिढ्वं॥ अघुक्षाध्वं॥ अघुक्षामहि॥ अथाजंता उभयपदिनः॥ ॥ श्रिञ् सेवा
यां॥ श्रयति॥ श्रयते॥ शिश्राय॥ शिश्रियतुः॥ श्रयिता॥ णिश्रीति चङ्॥ अशिश्रियत्॥ ८९० हृञ् भरणे॥ भरति॥ बभार॥ बभ्रतुः॥
बभर्थ॥ बभृव॥ बभृम॥ बभ्रे॥ भर्ता॥ ऋद्धनोः स्ये॥ ऋतो हन्तेश्च परस्य स्यस्य इट् स्यात्॥ भरिष्यति॥ रिङ्शयग्लिङ्क्षु॥ शयक्यादा १५०॥८१
र्धधातुके लिङि च ऋतो रिङ् स्यात्॥ रीङृतः इति रिङ्विधिसामर्थ्याद्दीर्घो न॥ भ्रियात्॥ उश्च॥ ऋवर्णात्परो झलादिर्लिङ् तङ्परः

॥सि०कौ०॥ ॥२३॥

सिचुरेसे नौ क्तिनौ स्तः॥ भ्रषीष्ट॥ भ्रषीयास्तां॥ अभार्षीत्॥ अभार्ष्टां॥ अभार्षुः॥ ह्रस्वादंगात्॥ सिचो लोपः स्याज्झलि॥ अभृत॥ अभृषातां॥ अभ
रिष्यत॥ हृञ् हरणे॥ हरणं प्रापणं स्वीकारः स्तेयं नाशनं च॥ अहर्थ॥ जह्रिव॥ जह्रिम॥ हर्ता॥ हरिष्यति॥ धृञ् धारणे॥ धरति॥ अधार्षीत्॥ अ
धृत॥ णीञ् प्रापणे॥ निनयिथ॥ निनेथ॥ निन्यिषे॥ अथाजंताः परस्मैपदिनः॥ ॥ धेट् पाने॥ धयति॥ आदेच उपदेशेऽशिति॥ उपदे
शे एजंतस्य धातोरात्वं स्यान्न तु शिति॥ आत औ णलः॥ आदंताद्धातोर्णल औकारादेशः स्यात्॥ दधौ॥ आतो लोप इटि च॥ अजाद्योरा
र्धधातुकयोः क्ङिदिटोः परयोरातो लोपः स्यात्॥ द्वित्वात्परत्वाल्लोपे प्राप्ते द्विर्वचनेऽचीति निषेधः॥ द्विर्वचने कृते आल्लोपः॥ दधतुः॥ दधुः॥ दधि
थ॥ धाता॥ दाधा घ्वदाप्॥ दारूपा धारूपाश्च धातवो घुसंज्ञाः स्युर्दाप्दैपौ विना॥ एर्लिङि॥ घुसंज्ञानां मास्थादीनां च एत्वं स्यादार्धधातु
के किति लिङि॥ धेयात्॥ धेयास्तां॥ धेयासुः॥ विभाषा धेट्श्व्योः॥ आभ्यां च्लेश्चङ् स्यात्कर्त्रर्थे लुङि परे॥ चङीति द्वित्वं॥ अदधत्॥ अद
धतां॥ विभाषा घ्राधेट्शाच्छासः॥ एभ्यः सिचो लुग्वा स्यात्परस्मैपदे॥ अधात्॥ अधातां॥ अधुः॥ यमरमनमातां सक् च॥ एषां सक् स्या
देभ्यः सिच इट् परस्मैपदेषु॥ अधासीत्॥ अधासिष्टां॥ अधासिषुः॥ ग्लै म्लै हर्षक्षये॥ हर्षक्षयो धातुक्षयः॥ ग्लायति॥ जग्लौ॥ जग्लि ॥२३॥
थ॥ जग्लाथ॥ वान्यस्य संयोगादेः॥ घुमास्थादेरन्यस्य संयोगादेर्धातोरात एत्वं वा स्यादार्धधातुके किति लिङि॥ ग्लायात्॥ ग्लेयात्॥ अ
ग्लासीत्॥ द्यै न्यक्करणे॥ न्यक्करणं तिरस्कारः॥ द्रै स्वप्ने॥ ध्रै तृप्तौ॥ ध्यै चिंतायां॥ रै शब्दे॥ स्त्यै ष्ट्यै शब्दसंघातयोः॥ स्त्यायति॥

दधाथ

षोपदेशस्यापि सत्वे कृते रूपं तुल्यं॥ षोपदेशफलं तु निष्ट्यासति॥ अतिष्ट्यौ॥ इत्यत्र षत्वं॥ खै खदने॥ क्षै जै षै क्षये॥ क्षायति॥ जज्ञौ॥ ससौ
घुमास्थेत्यत्र विभाषा घ्राधेडिति च वस्य तेरेव ग्रहणं न त्वस्य॥ तेन एत्वसिज्लुकौ न॥ सायात्॥ असासीत्॥ कै गै शब्दे॥ गेयात्॥ अगासी
त्॥ ॥२०॥ श्रै श्रा पाके॥ पै ओवै शोषणे॥ पायात्॥ अपासीत्॥ घुमास्थेतीत्वं लदपवाद एर्लिङि इत्येत्वं गातिस्थेति सिज्लुक् च न॥ पारूप
स्य लाक्षणिकत्वात्॥ ष्टै वेष्टने॥ स्तायति॥ ष्णै वेष्टने॥ शोभायां चेत्येके॥ स्नायति॥ दैप् शोधने॥ दायति॥ अघुत्वादेत्वसिज्लुकौ न॥ दा
यात्॥ अदासीत्॥ पा पाने॥ पाघ्रेति पिबादेशः॥ तस्यादंतत्वान्न लोपधागुणः॥ पिबति॥ पेयात्॥ अपात्॥ घ्रा गंधोपादाने॥ जिघ्र
ति॥ घ्रेयात्॥ घ्रायात्॥ अघ्रासीत्॥ अघ्रात्॥ ध्मा शब्दाग्निसंयोगयोः॥ धमति॥ ष्ठा गतिनिवृत्तौ॥ तिष्ठति॥ स्थादिष्वभ्यासेन चेति ष गातिस्थेति सिज्लुक् च
त्वं॥ अधितष्ठौ॥ उपसर्गादिति षत्वं॥ अधिष्ठाता॥ स्थेयात्॥ २० म्ना अभ्यासे॥ मनति॥ दाण् दाने॥ प्रणियच्छति॥ देयात्॥ अदात्॥
ह्वृ कौटिल्ये॥ ह्वरति॥ ऋतश्च संयोगादेर्गुणः॥ ऋदंतस्य संयोगादेरंगस्य गुणः स्याल्लिटि॥ किदर्थमपीदं परत्वात्कित्यपि भवति॥ रप
रत्वं॥ उपधावृद्धिः॥ जह्वार॥ जह्वरतुः॥ जह्वरुः॥ जह्वर्थ॥ ह्वर्ता॥ ऋद्धनोः स्ये॥ ह्वरिष्यति॥ गुणोऽर्तिसंयोगाद्योः॥ अर्तेः संयोगादेरृदंतस्य
च गुणः स्याद्यकि यादावार्धधातुके लिङि च॥ ह्वर्यात्॥ अह्वार्षीत्॥ अह्वार्ष्टां॥ अह्वार्षुः॥ स्वृ शब्दोपतापयोः॥ स्वरतीति वेट्॥ सस्वरि
थ॥ सस्वर्थ॥ [illegible]॥ श्र्युकः किति॥ श्रिञ् एकाच उगंताच्च परयोर्गित्कितोरिण्न स्यात्॥ परमपि स्वरत्यादिविकल्पं बाधित्वा पुरस्ता

स्वरितिसूतीति विकल्पेप्राप्ते॰ ॥

॥सि॰उ॰त्ति॥ अनिषेधः कांशारम्भसामर्थ्यात्। अनेन प्रतिषेधे प्राप्ते॰ क्रादिनियमान्नित्यमिट्। सस्वरिथ। सस्वरिम। परत्वादृद्धनोः स्य इति नित्यमि ति॰भ्वा॰

ट्। स्वरिष्यति। स्वर्यात्। अस्वारीत्। अस्वारिष्टां। अस्वार्षीत्। अस्वार्ष्टां। स्मृ चिंतायां॥ दॄ संवरणे। स्मृ गतौ। क्रादित्वान्नेट्। सस्मर्थ।

॥२५॥ सस्मरिव। रिङ्। स्मियात्। असार्षीत्। असार्ष्टां। सर्तिशास्त्यर्तिभ्यश्च। एभ्यश्च्लेरङ् स्यात्कर्तरि लुङि। इह लुपा शास्तिना साहचर्यात् सर्त्ये

तौ जुहोत्यादिकावेव गृह्येते। न तु भ्वादेर्नाङ्। शीघ्रगतौ तु धावादेशः॥ धावति। ऋ गतिप्रापणयोः॥ ऋच्छत्यृतां। तौदा

दिक ऋच्छतेर्ऋ धातोर्ऋतां च गुणो लिटि। तात्स्थान्युपधावृद्धिः। आर। आरतुः। आरुः। इडत्यर्तिव्ययतीनां। अद् ऋ व्येञ् एभ्यस्थलो

६ ऋदुतोसे नित्यमिट् स्यात्। आरिथ। अर्ता। अरिष्यति। अर्यात्। आर्षीत्। आर्ष्टां। गृ सेचने॥ गरति। जगार। जगर्थ। जघ्रिव। रिङ्। घ्रियात्

अगार्षीत्। ९३० ध्रु स्थैर्ये। स्रु गतौ। सुस्रोथ। सुस्रुव। स्रूयात्। णिश्रिद्रुस्रुभ्यः कर्तरि चङ्। लघूपधगुणात् पूर्वं उवङ्। असुस्रुवत्। षु प्रसवै

श्वर्ययोः। प्रसवोऽभ्यनुज्ञानं। सुषाव। सुषविथ। सुषुविव। सोता। स्तुसुधूञ्भ्यः परस्मैपदेषु। एभ्यः सिच इट् स्यात्परस्मैपदेषु। असावीत्

पूर्वोत्तराभ्यां निरनुबन्धसाहचर्यात्। नोतेर्वग्रहणमिति पक्षे असौषीत्। श्रु श्रवणे। श्रुवः शृ च। श्रुवः शृ इत्यादेशः स्यात् श्नुप्रत्ययश्च। रा ॥२५॥

पोऽपवादः। श्नो ङित्त्वाद्गुणो न। शृणोति। शृणुतः। हुश्नुवोः सार्वधातुके। जुहोतेः श्नुप्रत्ययान्तस्यानेकाचोऽसंयोगपूर्वोवर्णस्य य

ण् स्यादजादौ सार्वधातुके। उवङोऽपवादः। शृण्वंति। शृणोमि। शृण्वः। शृणुवः। शृण्मः। शृणुमः। शुश्रोथ। शुश्रुव। शृणु। शृणवानि।

शृणुयात्। श्रूयात्। अश्रौषीत्। ध्रु स्थैर्ये। ध्रुवति। अयं कुटादौ गत्यर्थोऽपि। दुद्रु गतौ। दुद्रोथ। दुद्रविथ। दुद्रुविव। दुद्रोथ। दुद्रुव। णिश्रीति चङ्। अ

दुद्रुवत्। जि जि अभिभवे। अभिभवो न्यूनीकरणं न्यूनीभवनं च। आद्ये सकर्मकः॥ शत्रून् जयति। द्वितीये त्वकर्मकः॥ अध्ययनात्पराजयते।

अभ्येतुं ग्लायतीत्यर्थः। विपराभ्यां जेरिति तङ्। पराजेरसोढ इत्यपादानत्वं। ॥ अयादीर्ङ्। नाद्गितः॥ ॥ ष्मिङ् ईषद्धसने॥ स्मयते। सिष्मिये ईषद्धासे॰१

सिष्मियिढ्वे। सिष्मियिध्वे। ९४० गुङ् अव्यक्ते शब्दे। गवते। जुगुवे। गाङ् गतौ॥ गाते। गातां। गाते। इटएत्वे कृते वृद्धिः। गे। ऋदुः इटि। अगेगेत

गेयातां। गेरन्। गासीष्ट। गाङ्कुटादिसूत्रे इङादेशस्यैव गाङो ग्रहणं न तस्य तेन ङित्त्वाद् घुमास्थेतीत्वं न। अगास्त। आदादिकोयमिति हर

दत्तादय। फलं तु न भेदः। कुङ् घुङ् उङ् ङुङ् शब्दे। अन्ये तु उङ् कुङ् खुङ् गुङ् घुङ् ङुङ् इत्याहुः॥ कवते। चुकुवे। घवते। अवते। ऊवे। वार्णादाङ्गं बलीय इ

युवङ्। ततः सवर्णदीर्घः। ओता। ओष्यते। ओषीष्ट। औष्ट। ङवते। जुङुवे। ङोता। च्युङ् ज्युङ् प्रुङ् प्लुङ् गतौ॥ कुङ् इत्येके। ९५० रुङ् गतिरेषणयोः

रेषणं हिंसा। रवते। रुरुवे। रविता। से। धृङ् अवध्वंसने। धरते। दध्रे। मेङ् प्रणिदाने। प्रणिदानं विनिमयः प्रत्यर्पणं च। प्रणिमयते। नेर्गदेति णत्वं

तत्र घुप्रकृतिमाङिति पठित्वा ङितो माग्रहणेन रपि ग्रहणस्येष्टत्वात्। देङ् रक्षणे। दयते। दयतेर्दिगि लिटि। दिग्यादेशेन द्विर्वचनमिष्यते इ

तिवृत्तिः॥ दिग्ये। दिग्यिरे। स्थाध्वोरिच्च। अनयोरिदादेशः स्यात् सिच्च कित्स्यात्। अदित। अदिषातां। अदिषि। श्यैङ् गतौ। श्यायते। शश्ये

श्ये। प्यैङ् वृद्धौ। प्यायते। पप्ये। प्याता। त्रैङ् पालने। त्रायते। तत्रे। पूङ् पवने। पवते। पुपुवे। मूङ् बंधने। डीङ् विहायसा गतौ। डयते। डिड्ये

सार्वधातुका॰ भवते॰ ।

गुपेस्तः पत्स्यते

॥कौ० सि०॥ उषिता ॥९९६॰ तॄ प्लवनतरणयोः ॥ ऋत इद्धातोः ॥ ऋदंतस्य धातोरंगस्य इः स्यात् ॥ इत्वोत्वाभ्यां गुणवृद्धी विप्रतिषेधेन ॥ तरति ॥ ऋच्छत्यॄतामि सि०भा०
॥२५॥ तिगुणः ॥ तॄफलेत्येत्वं ॥ तेरतुः ॥ तेरुः ॥ तरिता ॥ वृतो वा ॥ वृङ्वृञ्भ्यामॄदंताच्चेटो दीर्घो वा स्यान्न तु लिटि ॥ तरिता ॥ तरीता ॥ अलिटीति किं ॥ तेरिथ ॥ लिङि
चेति दीर्घः ॥ तीर्यात् ॥ सिचि च परस्मैपदेषु ॥ अत्र वृत इटो दीर्घो न ॥ अतारिष्टां ॥ ॥ अथात्मनेपदिनः ॥ ॥ गुप गोपने ॥ तिज नि
शाने ॥ मान पूजायां ॥ बध बंधने ॥ गुप्तिज्किद्भ्यः सन् ॥ मान्बधदान्शान्भ्यो दीर्घश्चाभ्यासस्य ॥ सूत्रद्वयोक्तेभ्यः सन्नादीनामाभ्यासस्य
कारस्य दीर्घश्च ॥ गुपेर्निंदायां ॥ तिजेः क्षमायां ॥ कितेर्व्याधिप्रतीकारे निग्रहे अपनयने नाशने संशये च ॥ माने र्जिज्ञासायां ॥ बधेश्चित्तविका
रे ॥ दाने रार्जवे ॥ शाने र्निशाने ॥ सनाद्यंता धातवः ॥ सन्नाद्यंताः ॥ सन्नंतस्य धातुसंज्ञा ॥ तस्य च प्रथमस्यैकाचो द्वे स्तो अजादेर्द्वितीयस्य ॥ अभ्यासकार्यं ॥
जुगुप्सते ॥ किल्विधा निंदाद्यर्थकात्स्वार्थे सनिति ॥ दानशानवान स्वरितेतौ एते नित्यं सनंताः ॥ अर्थांतरे त्वननुबंधकात्सुरादय ॥ अनु
बंधस्य केवलेऽचरितार्थत्वात्सनंतत्वं ॥ धातोरित्यविहितत्वात्सनो आर्धधातुकत्वं ॥ तेन गुणो न ॥ जुगुप्सते ॥ जुगुप्सांचक्रे ॥ अनु
जुगुप्सित ॥ तितिक्षते ॥ मीमांसते ॥ भष्भावः ॥ बीभत्सते ॥ रक्ष पालने ॥ आरभते ॥ आरेभे ॥ रब्धा ॥ रप्स्यते ॥ अरब्ध ॥ अरप्सातां ॥ डुलभ
ष प्राप्तौ ॥ लभते ॥ ष्वंज परिष्वंगे ॥ दंशसंजस्वंजां शपि ॥ रंजेश्च ॥ एषां शपि नलोपः ॥ स्वजते ॥ परिष्वजते ॥ श्विषिचिदेविधिदंभि स्वंजीनां लिटः
कित्त्वं वेति व्याकरणांतरं ॥ इष्टं तु सस्वजे इति भाष्योदाहरणादेकदेशानुमतस्याऽऽहात्प्यादौश्रीयते ॥ सदेः परस्य लिटीति सूत्रे स्वंजेरुपसंख्या २५

नं ॥ अतोभ्यासात्परस्य षत्वं न ॥ परिषस्वजे ॥ परिषस्वजे ॥ सस्वजिषे ॥ सस्वंजिषे ॥ स्वंक्ता ॥ स्वंक्ष्यते ॥ स्वजेत ॥ स्वंक्षीष्ट ॥ प्रत्यषङ्क्त ॥
प्राक्सितादड्व्यवायेपीति षत्वं ॥ परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वंजां ॥ एभ्यः परेषां सितादीनां वेति विकल्पः ॥ एतदर्थमेवोपसर्गात्सुनोतीत्येव सिद्धे स्वंजेग्रहणं ॥ परिनिविभ्य इत्युपरूपादानं
जहदे पर्यषंक्त ॥ पर्यस्वङ्क्त ॥ हद पुरीषोत्सर्गे ॥ हदते ॥ हत्ता ॥ हत्स्यते ॥ हदेत ॥ हत्सीष्ट ॥ अहत्त ॥ ॥ अथ परस्मैपदिनः ॥ ॥ ञिक्ष्विदा अव्यक्ते शब्
दे ॥ ७० स्कंदिर् गतिशोषणयोः ॥ चस्कंदिथ ॥ चस्कंथ ॥ स्कंता ॥ स्कंत्स्यति ॥ नलोपः ॥ स्कद्यात् ॥ इरित्वाद्वाङ् ॥ अस्कदत् ॥ अस्कांत्सीत् ॥ अस्कं
त्स्यत् ॥ वेः स्कंदेरनिष्ठायां ॥ षत्वं वा स्यात् ॥ विष्कंदति ॥ अनिष्ठायामिति पर्युदासात् ॥ विष्कंता ॥ विस्कंता ॥ निष्ठायां तु विस्कन्नः ॥ षत्वपक्षे
णत्वं ॥ परेश्च ॥ अस्मात्परस्य स्कंदेः सस्य षो वा ॥ योगविभागादनिष्ठायामिति न संबध्यते ॥ परिष्कंदति ॥ परिस्कंदति ॥ परिष्कण्णः ॥ परिस्क
न्नः ॥ षत्वपक्षे णत्वं ॥ न च पदद्वयाश्रयत्वाद्बहिरंगत्वादसिद्धत्वं ॥ धात्वुपसर्गयोः कार्यमंतरंगमित्यभ्युपगमात् ॥ पूर्वं धातुरुपसर्गे
ण युज्यते पश्चात्साधनेनेति भाष्यं ॥ पूर्वं साधनेनेति मतांतरेनुनयात्वं ॥ यभ मैथुने ॥ यभति ॥ ययंभ ॥ येभिथ ॥ ययब्ध ॥ यब्धा ॥ यप्स्यति ॥ अयाप्सीत् ॥ णम
प्रह्वत्वे शब्दे च ॥ नेमिथ ॥ ननंथ ॥ नंता ॥ अनंसीत् ॥ अनंसिष्टां ॥ गम्लृ सृप्लृ गतौ ॥ इषुगमियमां छः ॥ एषां छः स्याच्छिति परे ॥ गच्छति ॥
जगाम ॥ जग्मतुः ॥ जगमिथ ॥ जगंथ ॥ गंता ॥ गमेरिट् परस्मैपदेषु ॥ गमेः परस्य सकारादेरार्धधातुकस्येट् स्यात् ॥ गमिष्यति ॥ लृदि
त्वादङ् ॥ अगमत् ॥ गमहनेति पर्युदासान्नोपधालोपः ॥ अगमत ॥ सर्पति ॥ ससर्प ॥ अनुदात्तस्य चर्दुपधस्यान्यतरस्यां ॥ उपदेशेऽनुदात्तोय

॥सि॰कौ॰॥ ऋदुपधस्यान्यतरस्याम्वा स्यात् झलादावकिति परे। स्रप्ता। सर्प्ता। स्रप्स्यति। सर्प्स्यति। असृपत्। यम उपरमे। यच्छति। येमिथ। ययंथ। यंता। अ ति॰भ्वा॰
॥२९॥ यंसीत्। अयंसिष्टां। तप संतापे। तप्ता। अताप्सीत्। निसस्तपतावनासेवने। षः स्यात्। आसेवनं पौनःपुन्यं ततोऽन्यस्मिन्विषये। निष्टपति।
त्यज हानौ। तत्यजिथ। तत्यक्थ। त्यक्ता। अत्याक्षीत्। षंज संगे। दंशसंजस्वंजां शपि लोपः। सजति। संक्ता। असांक्षीत्। दृशिर् प्रेक्षणे। पश्यति। वि
भाषा सृजिदृशोः। आभ्यां थल इड्वा स्यात्। सृजिदृशोर्झल्यमकिति। अनयोरमागमः स्यात् झलादावकिति। ददृष्ठ। ददर्शिथ। द्रष्टा। द्रक्ष्यति।
दृश्यात्। इरित्वादङ्वा। ऋदृशोऽङि गुणः। ऋवर्णान्तानां दृशेश्च गुणः स्यादङि। अदर्शत्। अङभावे। न दृशः। दृशः क्सो न। अद्राक्षीत्। अद्राष्टां।
दशनमित्यत्र ८० दंश दशने। दंशनं दंष्ट्राव्यापारः। पृषोदरादित्वादनुनासिकलोपः। अत एव निपातनादित्येके। तेषामप्ययमेव तात्पर्यं। अर्थनिर्देशस्याधु दृपोदरादि त्वएव॰
निकत्वात्। दंशसंजेति नलोपः। दशति। ददंशिथ। ददंष्ठ। दंष्टा। दंक्ष्यति। दशेत्। दश्यात्। अदांक्षीत्। अदांष्टां। कृष विलेखने। विलेख
नमाकर्षणं। क्रष्टा। कर्ष्टा। क्रक्ष्यति। कर्क्ष्यति। स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वाच्यः। अक्राक्षीत्। अक्राष्टां। अकार्क्षीत्। अकार्ष्टां। अकार्क्षुः।
पक्षे क्सः। अकृक्षत्। अकृक्षतां। अकृक्षन्। दह भस्मीकरणे। देहिथ। ददग्ध। दग्धा। धक्ष्यति। अधाक्षीत्। अदाग्धां। अधाक्षुः। मिह सेचने। मि
मेहिथ। मिमिहिव। मेढा। मेक्ष्यति। अमिक्षत्। ॥ कित निवासे रोगापनयने च। चिकित्सति। संशये प्रायेणायं विपूर्वः। विचिकित्सा तु संश ॥२९॥
य इत्यमरः। अस्यानुदात्तेत्त्वमाश्रित्य चिकित्सते इत्यादिकमुदाजहार। निवासे तु केतयति। दान खंडने। शान तेजने। ॥ अथानुदात्तेतः स्व
गुप्तिजितिसन्२॥

रितेतः॥ ॥ दीदांसति। दीदांसते। शीशांसति। शीशांसते। अर्थविशेषे सन्। अन्यत्र दानयति। शानयति। डुपचष् पाके। पचति। पचते।
पेचिथ। पपक्थ। पेचे। पक्ता। पक्षीष्ट। षच समवाये। सचति। सचते। सचिता। सचिष्यति। भज सेवायां। भजति। भजते। बभाज। भेज
तुः। भेजिथ। बभक्थ। भक्ता। भक्ष्यति। भक्ष्यते। अभाक्षीत्। अभक्त। अभक्षातां। शप आक्रोशे। आक्रोशो विरुद्धानुध्यानं। शशाप। शेपे।
अशाप्सीत्। अशप्त। ॥ ८० त्विष दीप्तौ। त्वेषति। त्वेषते। तित्वेष। तित्विषे। त्वेक्ष्यति। त्वेक्ष्यते। त्विष्यात्। त्विक्षीष्ट। अत्विक्षत्। अत्विक्षतां। अ
त्विक्षन्। अत्विक्षत। अत्विक्षातां। यज देवपूजासंगतिकरणदानेषु। यजति। यजते। लिड्यभ्यासस्योभयेषां। वच्यादीनां ग्रह्यादीनां चाभ्या
सस्य संप्रसारणं स्याल्लिटि। इयाज। वचिस्वपियजादीनां किति। वचिस्वपियजादीनां संप्रसारणं स्यात् किति। पुनः प्रसंगविज्ञानाद्द्वित्वं। न॰
ईजतुः। ईजुः। इयजिथ। इयष्ठ। ईजे। यष्टा। यक्ष्यति। यक्ष्यते। इज्यात्। यक्षीष्ट। अयाक्षीत्। अयष्ट। डुवप् बीजसंताने। बीजसंतानं क्षेत्रे वि
करणं गर्भाधानं वा। उप्तं कृष्णेऽपि। केशान्वपति। वपते। उवाप। ऊपे। वप्ता। उप्यात्। वप्सीष्ट। अवाप्सीत्। अवप्त। वह प्रापणे। उवाह। उव
हिथ। सहिवहोरोदवर्णस्य। उवोढ। वोढा। वक्ष्यति। वक्ष्यते। अवाक्षीत्। अवोढां। अवाक्षुः। अवोढ। अवक्षातां। अवक्षत। अवोढाः। अवोढ्वं। व
स निवासे। परस्मैपदी। वसति। उवास। शासिवसिघसीनां च। इण्कुभ्यां परस्यैषां सस्य षः स्यात्। ऊषतुः। ऊषुः। उवसिथ। उवस्थ। वस्ता। स स्या
र्धधातुके। वत्स्यति। उष्यात्। अवात्सीत्। अवात्तां। वेञ् तंतुसंताने। वयति। वयते। वेञो वयिः। वा स्याल्लिटि। इकार उच्चारणार्थः। उवाय। ग्रहि

॥सि॰ कौ॰॥ ज्या वयि व्यधि वष्टि विचति वृश्चति पृच्छति भृज्जतीनां ङिति च ॥ एषां किति ङिति च संप्रसारणं स्यात् ॥ यकारस्य ग्रहणे ॥ लिटि वयो यः ॥ वयो यस्य संप्रसा सि॰ कौ॰
रणं न स्याल्लिटि ॥ ऊयतुः ॥ ऊयुः ॥ वश्चास्यान्यतरस्यां किति ॥ वयो यस्य वो वा स्याल्लिटि किति ॥ ऊवतुः ॥ ऊवुः ॥ वयस्थाने भारद्वाजनियमात्थलि नित्यमिट् ॥ उवयि
॥२७॥ थ ॥ स्थानिवद्भावेन नित्यानिट्त्वान्नेट् ॥ ऊयिथ ॥ ऊवे ॥ वयादेशाभावे ॥ वेञः ॥ वेञो न संप्रसारणं स्याल्लिटि ॥ ववौ ॥ ववतुः ॥ ववुः ॥ वविथ ॥ ववाथ ॥ ववे ॥ ववा
ते ॥ वाता ॥ ऊयात् ॥ वासीष्ट ॥ अवासीत् ॥ अवासिष्टां ॥ व्येञ् संवरणे ॥ व्ययति ॥ व्ययते ॥ न व्यो लिटि ॥ व्येञ आत्वं न स्याल्लिटि ॥ वृद्धिः ॥ परमपि हल्
ादिःशेषं बाधित्वा यस्य संप्रसारणं उभयेषां ग्रहणसामर्थ्यात् ॥ अन्यथा व्यादीनां ग्रहादीनां चानुवृत्त्यैव सिद्धं किं तेन ॥ विव्याय ॥ विव्यतुः ॥ वि
व्युः ॥ इडत्यर्तीति नित्यमिट् ॥ विव्ययिथ ॥ विव्याय ॥ विव्ये ॥ विव्याते ॥ विव्यिरे ॥ व्याता ॥ वीयात् ॥ व्यासीष्ट ॥ अव्यासीत् ॥ अव्यास्त ॥ ह्वेञ् स्पर्धायां श
ब्दे च ॥ अभ्यस्तस्य च ॥ अभ्यस्तीभविष्यतो ह्वेञः संप्रसारणं स्यात् ॥ ततो द्वित्वं ॥ जुहाव ॥ जुहुवतुः ॥ जुहुवुः ॥ जुहोथ ॥ जुहविथ ॥ जुहुवे ॥ ह्वाता ॥ हू
यात् ॥ ह्वासीष्ट ॥ लिपिसिचिह्वश्च ॥ एभ्यश्च्लेरङ् स्यात् ॥ आत्मनेपदेष्वन्यतरस्यां ॥ आतो लोपः ॥ अह्वत् ॥ अह्वतां ॥ अह्वन् ॥ अह्वत ॥ अह्वास्त
॥ अथ द्वौ परस्मैपदिनौ ॥ वद व्यक्तायां वाचि ॥ वदति ॥ उवाद ॥ ऊदतुः ॥ उवदिथ ॥ वदिता ॥ उद्यात् ॥ वदव्रजेति वृद्धिः ॥ अवादीत् ॥ टुओ
श्वि गतिवृद्ध्योः ॥ श्वयति ॥ विभाषा श्वेः ॥ श्वयतेः संप्रसारणं वा स्याल्लिटि यङि च ॥ शुशाव ॥ शुशुवतुः ॥ श्वयतेर्लिड्यभ्यासलक्षणप्रतिषेधः ॥ २७
तेन न लिड्यभ्यासस्येति संप्रसारणं न ॥ शिश्वाय ॥ शिश्वियतुः ॥ शिश्वियुः ॥ श्वयिता ॥ श्वयेत् ॥ शूयात् ॥ जृस्तम्भु॰ श्विरङ् वा ॥ श्वयतेरः ॥ श्वयते

रिकारस्य अकारः स्यादङि ॥ पररूपं ॥ अश्वत् ॥ अश्वतां ॥ अश्वन् ॥ विभाषा धेट्श्व्योः इति चङ् ॥ इयङ् ॥ अशिश्वियत् ॥ अशिश्वियतां ॥ ह्यंते
ति वृद्धिर्न ॥ अश्वयीत् ॥ अश्वयिष्टां ॥ हल् यजादयो वृत्ताः ॥ ॥ भ्वादिस्त्वाकृतिगणः ॥ ॥ तेन चुलुम्पतीत्यादिसंग्रहः ॥ ॥ इति
भ्वादिगणः समाप्तः ॥ ॥ श्रीः ॥ ॥ श्रीः ॥ ऋतेरीयङ् ॥ ऋतिः सौत्रो धातुः ॥ तस्मादीयङ् स्यात् स्वार्थे ॥ जुगुप्सायामयं धातुरि
ति बहवः ॥ कृपायामित्येके ॥ सनाद्यन्ता धातव इति धातुत्वं ॥ ऋतीयते ॥ ऋतीयां चक्रे ॥ आयादय आर्धधातुके वेतीयङभावे शेषात्क
र्तरीति परस्मैपदं ॥ आनर्त ॥ अर्तिष्यति ॥ आर्तीत् ॥ ॥ अद भक्षणे ॥ द्वौ परस्मैपदिनौ ॥ ॥ अदिप्रभृतिभ्यः शपः ॥ लुक् स्यात् ॥ अत्ति
अत्तः ॥ अदन्ति ॥ लिट्यन्यतरस्यां ॥ अदो घस्लृ वा स्याल्लिटि ॥ जघास ॥ गमहनेत्युपधालोपः ॥ तस्य चर्विधिं प्रति स्थानिवद्भावनि
षेधात् घस्य कत्वं ॥ शासिवसिघसीनां च इति षत्वं ॥ जक्षतुः ॥ जक्षुः ॥ घसस्तासावनिट्त्वाद्भारद्वाजनियमात्थलि नित्यमिट् ॥ जघसिथ ॥ आद ॥ आदतुः ॥ इडत्यर्ति
व्ययतीति नित्यमिट् ॥ आदिथ ॥ अत्ता ॥ अत्स्यति ॥ हुझल्भ्यो हेर्धिः ॥ होर्झलन्तेभ्यश्च हेर्धिः स्यात् ॥ अद्धि ॥ अत्तात् ॥ अदानि ॥ अदः
सर्वेषां ॥ अदः परस्यापृक्तसार्वधातुकस्याडागमः स्यात् सर्वमतेन ॥ आदत् ॥ आत्तां ॥ आदन् ॥ आदः ॥ आत्तं ॥ आत्त ॥ आदं ॥ आद्व

उत्त्वपदांतादितिपरत्वं

॥सि॰कौ॰॥ आय॥ अघात्। अघातां। अघुः। अघाः॥ अघातं। अघात। लुङ्॥ हनो र्घस्त्र॥ अहोपस्त्वस्या लुङि सन्निपा॰ स्टिलादर्॥ अपसत्॥ ३॥ ह ॥ति॰आ॰॥
॥२८॥ नहिंसागत्योः॥ प्रणिहंति॥ अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो झलि क्ङिति॥ अनुनासिकांतस्योपधा॰ कं॥ वनतीतरे
षां शिरोवणं॥ अनुनासिकांतानामेषां वनतेश्च लोपः स्यात् झलादौ क्ङिति परे॥ गमिरमिनमिगमिहनिमन्यत योनुदात्तोपदेशाः॥ त
नुक्षणुक्षिणुऋणुतृणुघृणुवनुमनुतनोत्यादयः॥ हतः॥ घ्नंति॥ वमोर्वा॥ उपसर्गस्थान्निमित्तात्परस्य हंते र्नस्य णो वास्याद्वमयोः परः
तः॥ प्रहण्मि। प्रहन्मि॥ प्रहण्वः। प्रहन्वः॥ हो हंते र्ञ्णिन्नेषु॥ जघान। जघ्नतुः॥ जघ्नुः॥ अभ्यासाच्च॥ अभ्यासात्परस्य हंते र्हस्य कुत्वं स्या
त्॥ जघनिथ। जघंथ॥ हंता॥ ऋद्धनोः स्ये इति इट्॥ हनिष्यति॥ हंतु। हतात्॥ घ्नंतु॥ हंतेर्जः॥ हौ परे॥ आभीयत्वेनास्यासिद्धत्वाद्धेर्न लुक्॥
जहि॥ हनानि। हनाव। हनाम॥ अहन्। अहतां। अघ्नन्। अहनं॥ आर्धधातुके इत्यधिकृत्य॥ हनो वध लिङि॥ लुङि च॥ वधादेशोदं
तः॥ आर्धधातुक इति विषयसप्तमी॥ तेनार्धधातुकोपदेशे अकारांतत्वादतो लोपः॥ वध्यात्। वध्यास्तां॥ आर्धधातुके किं॥ विध्या
दिलभ्यात्॥ हंते र्हिति णत्वं॥ हन्यात्॥ अवधीत्॥ अपरस्तारः स्वरितेतः॥ द्विष अप्रीतौ॥ द्वेष्टि। द्विष्टः। द्विषंति। द्वेक्षि। द्वेक्षि॥ ॥२८॥
द्विष्ठः॥ द्वेषाणि। द्वेष। द्वेषाव। अद्वेट्। अद्विष्टां। लङः शाकटा॰ इः सवास्यात्॥ अद्विषुः॥ अद्विषन्॥ अद्वेषं॥ द्विषीत। द्विक्षीष्ट॥ अद्विक्षत्॥

अल्लोपस्य स्थानिवत्त्वाद् तो हलादेरिति न वृद्धिः २

दुह प्रपूरणे॥ दोग्धि। दुग्धः॥ धोक्षि॥ दुग्धे॥ धुक्षे॥ धुग्ध्वे॥ दोग्धु॥ दुग्धि॥ दोहानि॥ धुक्ष्व॥ धुग्ध्वं॥ दोहै॥ अधोक्॥ अदोहं॥ अदुग्ध॥ अ
धुग्ध्वं॥ अधुक्षत्॥ अधुक्षत॥ लुग्वा दुहदिहलिहगुहामात्मनेपदे दंत्ये॥ तथास्थ ध्वं वहिषु लक्षण दर्पि॥ दिह उपचये॥ प्रणिदेग्धि॥ दिग्धे॥ लिह आस्वादने॥ ले
ढि॥ लीढः॥ लिहंति॥ लेक्षि॥ लेढे॥ लिक्षे॥ लीढ्वे॥ लेढु॥ लीढि॥ लेहानि॥ अलेट्॥ अलिक्षत्॥ अलीढ॥ अलिक्षावहि॥ अलिक्ष्वहि॥
चक्षिङ् व्यक्तायां वाचि॥ अयं दर्शनेपि॥ इकार इदित्॥ डकारोनुदात्तेत्वार्थः॥ विशेषणः प्रथयन्॥ तुमस्तुन्॥ अनेकदितदि॥ नित्यास्यान्नात्॥ थाड का र
स्य अनुदात्तत्वप्रयुक्तमात्मनेपदमनित्यमिति ज्ञापनार्थः॥ तेन स्फायंते निर्मोक संधीत्यादि सिध्यति॥ चष्टे॥ चक्षाते॥ आर्धधातुके॥ च
क्षिङः ख्याञ्॥ वालिटि॥ अत्र भाष्ये खशादिरयमादेशः॥ असिद्धकांडशस्य यो वेति सिद्धं॥ जिवास्पदद्वयं॥ चख्यौ॥ चख्ये॥ चक्शौ॥
चक्शे॥ चयोर्द्वितीयाः शरि पौष्करसादेः॥ वर्जस्यासिद्धत्वात्॥ चक्षे॥ ख्याता। क्शाता॥ ख्यास्यति। ख्यास्यते॥ क्शास्यति॥ क्शास्यते॥ अचक्षत॥
सीत्॥ ख्यायात्। ख्येयात्। क्शायात्। क्शेयात्॥ अस्यतिवक्तिख्यातिभ्योङ्॥ शास्य भ्रूरजुः॥ अख्यत्। अख्यत॥ अक्शासीत्॥ अ
क्शास्त॥ वर्जने क्शाञ्नेष्टः॥ समचक्षि इत्यादि॥ अथ षयंता अनुदात्तेतः॥ ईर गतौ कंपने च॥ ईर्ते॥ ईराञ्चक्रे॥ ईर्ता॥ ईर्ष्व॥ ईर्ध्वे॥ ऐ
रिष्ट॥ ईड स्तुतौ॥ ईट्टे॥ ईशःसे॥ ईडजनोर्ध्वे च॥ ईशीडजनां से ध्वे शब्दयोः सार्वधातुकयोरिट् स्यात्॥ योगविभागोवैचित्र्यार्थः॥ ईडिषे॥ ॥५० ३०॥

भागद्वयविकृतत्वान्नोडिलर्थः

॥सि०कौ०॥ ईडिध्वे॥ एकदेशविकृतस्यानन्यत्वात्॥ ईडिषे॥ ईडिध्वं॥ विकृतिग्रहणेन प्रकृतेरग्रहणात्॥ ईड्ध्वं॥ ईश ऐश्वर्ये॥ ईष्टे॥ ईशिषे॥ ई ति०अ०
शिध्वे॥ आस उपवेशने॥ आस्ते॥ दयायासश्च॥ आसांचक्रे॥ आस्स्व॥ आध्वं॥ आसिष्ट॥ आङः शासु इच्छायां॥ आशास्ते॥ आशा
॥२९॥ साते॥ आङ्पूर्वत्वं प्रायिकं॥ तेन नमोवाकं प्रशास्महे इति सिद्धं॥ वस आच्छादने॥ वस्ते॥ वस्से॥ वध्वे॥ ववसे॥ वसिता॥ कसि गतिशास
नयोः॥ कंस्ते॥ कंसाते॥ कंसते॥ अयमनिदित्सेके॥ कस्ते॥ तालव्यान्तोप्यनिदित्॥ कष्टे॥ कशाते॥ कड्ढ्वे॥ णिसि चुंबने॥ निंस्ते॥
दंत्यांतोयं॥ आभरणकारस्तु तालव्यांत इति बभ्राम॥ णिजि शुद्धौ॥ निंक्ते॥ निंक्षे॥ निंजिता॥ शिजि अव्यक्ते शब्दे॥ शिंक्ते॥ पिजि
वर्णे॥ संपर्चन इत्येके॥ उभयत्रेत्यन्ये॥ अवयवे इत्यपरे॥ अव्यक्ते शब्दे इतीतरे॥ पिंक्ते॥ वृजी इत्येके॥ वृंक्ते॥ वृजी वर्जने॥ दंतोष्ठादिः॥
ईदित्॥ वृंक्ते॥ वृजाते॥ वृक्षे॥ इदिदित्यन्ये॥ वृंक्ते॥ पृची संपर्चने॥ पृक्ते॥ षूङ् प्राणिगर्भविमोचने॥ सूते॥ सुषुविषे॥ सोता॥ सविता॥
सूसुवोरिति गुणनिषेधः॥ सुवे॥ सविषीष्ट॥ सोषीष्ट॥ असविष्ट॥ असोष्ट॥ शीङ् स्वप्ने॥ शीङः सार्वधातुके गुणः॥ क्ङितिचेत्य
स्यापवादः॥ शेते॥ शयाते॥ शीङो रुट्॥ शीङः परस्य झादेशस्यातो रुडागमः स्यात्॥ शेरते॥ शेध्वे॥ शये॥ शेवहे॥ शिश्ये॥ शयि ॥२९॥
ता॥ अशयिष्ट॥ अथ कोत्यंताः परस्मैपदिनः॥ ऊर्णुस्तु उभयपदी॥ युमिश्रणे अमिश्रणे च॥ उतो वृद्धिर्लुकि हलि॥ लुग्विषय

उकारस्य वृद्धिः स्यात् पिति हलादौ सार्वधातुके न त्वभ्यस्तस्य॥ यौति॥ युतः॥ युवंति॥ युयाव॥ यविता॥ युयात्॥ इह उतो वृद्धिर्न॥ भाष्ये
पिच्च ङिन्न ङिच्च पिन्नेति व्याख्यानात्॥ यिशेषविहितेन ङित्वेन पित्त्वस्य बाधनात्॥ यूयात्॥ अयावीत्॥ रु शब्दे॥ तुरुस्तुशम्यमः सार्व
धातुके॥ एभ्यः परस्य सार्वधातुकस्य हलादेस्तिङ ईड् वा स्यात्॥ नाभ्यस्तस्येत्यतो नुवृत्तिसंभवे पुनः सार्वधातुकग्रहणमपिदर्थं॥ र
वीति॥ रौति॥ रुवीतः॥ रुतः॥ रुङ्गादिः क्ङिं॥ रुवंति॥ लिङः किंशाम्यति॥ सार्वधातुके किं॥ आशिषि रूयात्॥ विध्यादौ तु रुयात्॥ रुवी
यात्॥ अरावीत्॥ अरविष्यत्॥ तु इति सौत्रो धातुः॥ गतिवृद्धिहिंसासु॥ अयं च लुग्विकरण इति स्मरंति॥ तवीति॥ तौति॥ तुवी
तः॥ तुतः॥ तोता॥ तोष्यति॥ णु स्तुतौ॥ नौति॥ नुवः॥ नविता॥ टुक्षु शब्दे॥ क्षौति॥ क्षविता॥ क्ष्णु तेजने॥ क्ष्णौति॥ क्ष्णविता॥ ष्णु प्रस्र
वणे॥ स्नौति॥ सुष्णाव॥ स्नविता॥ स्नुयात्॥ स्नूयात्॥ ऊर्णुञ् आच्छादने॥ ऊर्णोतेर्विभाषा॥ वृद्धिर्वा स्याद् हलादौ पिति सार्वधा
तुके॥ ऊर्णौति॥ ऊर्णोति॥ ऊर्णुतः॥ ऊर्णुवंति॥ ऊर्णुते॥ ऊर्णुवाते॥ ऊर्णुवते॥ ऊर्णोतेराम्नेति वाच्यं॥ नन्द्राः संयोगादयः॥ अ
चः पराः संयोगादयो नदराः द्विर्न भवंति॥ नुशब्दस्य द्वित्वं॥ णत्वस्यासिद्धत्वान्नपूर्वस्यासिद्धीयमद्विर्वचनेति त्वनित्यं॥
उसो सार्वधातुकस्येति लिङ्गात्॥ ऊर्णुनाव॥ ऊर्णुनुवतुः॥ ऊर्णुनुवुः॥ विभाषोर्णोः॥ इडादि प्रत्ययो ङिद्वा स्यात्॥ ऊर्णुनुविथ॥ ऊर्णुन

॥सि॰ कौ॰॥ विथ॥ ऊर्णुविता॥ ऊर्णुवितासि॥ ऊर्णुवै॥ गुणोऽपृक्ते॥ ऊर्णोतेर्गुणः स्यादपृक्ते हलादौ पिति सार्वधातुके॥ वृद्ध्यपवादः॥ और्णोत्॥ और्णोः॥ ऊर्णुयात्॥ ति॰ अ॰
॥३०॥ ऊर्णुयाः॥ इह ह्रस्वादिष्टे ङिदपिन्नेति भाष्यात्॥ ऊर्णूयात्॥ ऊर्णविषीष्ट॥ ऊर्णुविषीष्ट॥ और्णुवीत्॥ और्णुविष्टां॥ ऊर्णोतेर्विभाषा॥ इडादौ सस्थप
रस्मैपदे परे वृद्धिर्वा स्यात्॥ पक्षे गुणः॥ और्णावीत्॥ और्णाविष्टां॥ और्णवीत्॥ और्णविष्टां॥ और्णुवीत्॥ और्णुविष्टां॥ और्णुविषुः॥ द्यु अभिगमने॥ द्यौति॥ द्योता॥
षु प्रसवैश्वर्ययोः॥ प्रसवोऽभ्यनुज्ञानं॥ सोता॥ असावीत्॥ कु शब्दे॥ कोता॥ ष्टुञ् स्तुतौ॥ स्तौति॥ स्तवीति॥ स्तुवीत॥ स्तुवतः॥ स्तुवे॥ स्तु॰ वी
ते॥ स्तुसुधूञ्भ्यः परस्मैपदेषु इति इट्॥ अस्तावीत्॥ प्राक्सितादड्व्यवायेऽपि इति षत्वं॥ अभ्यष्टौत्॥ सिचादीनां वा॥ पर्यष्टौत्॥ पर्यस्तौत्॥ ब्रूञ् व्यक्तायां वाचि॥ ब्रुवः पं
चानामादित आहो ब्रुवः॥ ब्रुवो लटः परस्मैपदानामादितः पंचानां णलादयः पंच वा स्युर्ब्रुवश्चाहादेशः॥ अकार उच्चारणार्थः॥ आह॥ आ
हतुः॥ आहुः॥ आहस्थः॥ झलि परे॥ चर्त्वं॥ आत्थ॥ आहथुः॥ ब्रुव ईट्॥ ब्रुवः परस्य हलादेः पित ईट् स्यात्॥ आत्थेत्यत्र स्थानिवद्भावात्प्राप्तो
यं॥ झलीति चर्त्वविधानान्न भवति॥ ब्रवीति॥ ब्रूतः॥ ब्रुवंति॥ ब्रूते॥ आर्धधातुकाधिकारे॥ ब्रुवो वचिः॥ उवाच॥ ऊचतुः॥ ऊचुः॥ उवचिथ
उवक्थ॥ ऊचे॥ वक्ता॥ ब्रूतात्॥ ङिदपिन्नेति अपित्त्वादीण्न॥ ब्रवाणि॥ ब्रवै॥ ब्रूयात्॥ उच्यात्॥ अस्यतिवक्तिख्यातिभ्योऽङ्॥ वच उम्॥ अवोच ॥३०॥
त्॥ अवोचत॥ ॥ अथ शास्त्यन्ताः परस्मैपदिनः॥ इङ् आत्मनेपदी॥ इण् गतौ॥ एति॥ इतः॥ इणो यण्॥ अजादौ प्रत्य
अभ्यासस्यासवर्णे ये॥ इयङोऽपवादः॥ यन्ति॥ इयाय॥ ईयतुः॥ इययिथ॥ इयेथ॥ एता॥ एतु॥ आयन्॥ इयात्॥ ईयात्॥ एतेर्लिङि॥ उपसर्गात्परस्य इणो
दीर्घ इणः किति॥ इणोऽभ्यासस्य दीर्घः स्यात्किति लिटि

णोऽह्रस्वः स्यादार्धधातुके किति लिङि॥ निरियात्॥ समियात्॥ उभयत आश्रयणे नांतादिवत्॥ अभीयात्॥ अणः किं॥ समेयात्॥ समीयादिति मतिद्दति॰
प्रयोगस्तु आर्षत्वादिकस्य॥ इणो गा लुङि॥ गातिस्थेति सिचो लुक्॥ अगात्॥ अगातां॥ अगुः॥ इङ् अध्ययने॥ नित्यमधिपूर्वः॥ अधीते॥
अधीयाते॥ अधीयते॥ गाङ् लिटि॥ इङो गाङ् स्याल्लिटि॥ लावस्थायां विवक्षितेवा॥ अधिजगे॥ अधिजगाते॥ अधिजगिरे॥ अध्येता॥ अ गा
ध्येष्यते॥ अध्ययै॥ गुणायादेशयोः कृतयोरुपसर्गस्य यण्॥ पूर्वं धातुरुपसर्गेणेति दर्शनेंतरंगत्वात् गुणः पूर्वं सवर्णदीर्घः प्राप्तः॥
णेरध्ययने वृत्तमिति निर्देशान्न भवति॥ अध्यैत॥ परत्वादि यङ्॥ न तु आट्॥ वृद्धिः॥ अध्यैयातां॥ अध्यैयत (अध्यैयन्त) अध्ये
यि॥ अध्यैवहि॥ अधीयीत॥ अधीयीयातां॥ अधीयीध्वं॥ अधीयीय॥ अध्येषीष्ट॥ विभाषा लुङ्लृङोः॥ इङो गाङ् वा स्यात्॥ गाङ्
कुटादिभ्योऽञ्णिन्ङित्॥ गाङादेशात् कुटादिभ्यश्च परोऽञ्णितः प्रत्ययो ङिद्वत्स्यात्॥ घुमास्थागापाजहातिसां हलि॥ एषामा
त ईत्स्यात् हलादौ क्ङित्यार्धधातुके॥ अध्यगीष्ट॥ अध्यैष्ट॥ अध्यगीष्यत॥ अध्यैष्यत॥ इक् स्मरणे॥ अयमप्यधिपूर्वः॥ अधी
गर्थदयेशां कर्मणीति लिंगात्॥ अन्यथा ह्यधीगर्थेत्येव ब्रूयात्॥ इण्वदिक इति वक्तव्यं॥ अधियंति॥ अध्यगात्॥ के चित्तु आर्धधातुका
इणो यण्णिति धिकारोक्तस्यैवातिदेशमाहुः॥ तन्मते यण्न॥ तथा च भट्टिः॥ मसीतयोराघवयोरधीयन्॥ इति॥ वी गतिव्याप्तिप्रजनकांत्यसनखा ॥४०॥

दृनेषु ॥ पुरजनोगर्भग्रहणं ॥ असनं क्षेपणं ॥ वेति ॥ वीतः ॥ वियंति ॥ वेषि ॥ वेभि ॥ वीहि ॥ अवेत् ॥ अवैतां ॥ अवियन् ॥ अआगमे सत्यनेकाज्ञत्वा

द्रणिनिके विति ॥ अव्यन् ॥ अत्र ईकारोपि धात्वंतरं प्रश्लिष्यते ॥ एति ॥ ईतः ॥ इयंति ॥ ईयात् ॥ ऐषीत् ॥ या प्रापणे ॥ प्रापणमिह गतिः
प्रणियाति ॥ प्रनि यातः ॥ यांति ॥ लङः शाकटायनस्यैव ॥ आदंतात्परस्य लङो झेर्जुस् वा स्यात् ॥ अयुः ॥ अयान् ॥ यायातां ॥ यायासं ॥
वागतिगंधनयोः ॥ भाति ॥ भा ॥ ख्या शौचे ॥ श्रा पाके ॥ द्रा कुत्सायां गतौ ॥ प्सा भक्षणे ॥ पा रक्षणे ॥ पायास्तां ॥ अपासीत् ॥ रा दाने ॥ ला
आदाने ॥ द्रा॰ पि दान इति पृथ्वीचंद्रः ॥ दाप् लवने ॥ प्रणिदाति ॥ प्रनिदाति ॥ दायास्तां ॥ अदासीत् ॥ ख्या प्रकथने ॥ अयं सार्वधातु
कमात्रविषयः ॥ सस्थानत्वं नमः ख्यात्र इति वार्तिकं तद्भाष्ये वैकल्पिक हल्लिंगं ॥ सस्थानो डिद्दामूर्द्धीयः ॥ सनेति ख्युशा आदेश
स्य स्वश्चादित्वे प्रयोजनमित्यर्थः ॥ संपूर्वस्य ख्यातेः प्रयोगो नेति न्यासकारः ॥ प्रा पूरणे ॥ मा माने ॥ अकर्मकः ॥ न नोममुक्त त्र ॥
उपसर्गवशेन अर्थांतरे सकर्मकः ॥ उदरं परिमाति मुष्टिना ॥ नेगद इत्यत्र नास्य ग्रहणं ॥ प्रणिमाति ॥ प्रनिमाति ॥ वच परिभाषणे ॥ ॥ ३१ ॥
वक्ति ॥ वक्तः ॥ अयमंतिपरो न प्रयुज्यते ॥ बहुवचनपर इत्यन्ये ॥ झिपर इत्यपरे ॥ वग्धि ॥ वच्यात् ॥ उच्यात् ॥ अवोचत् ॥ विद ज्ञाने ॥
विदोलटो वा ॥ वेत्तेर्लटः परस्मैपदानां णलादयो वा स्युः ॥ वेद ॥ विदतुः ॥ विदुः ॥ वेत्थ ॥ विदथुः ॥ विद ॥ वेद ॥ विद्व ॥ विद्म ॥ पक्षे वेत्ति ॥

वित्तः ॥ स्यादि ॥ विवेद ॥ विविदतुः ॥ उषविदेत्याम् परस्मै ॥ विदेत्यकारांतनिपातनान्नलघूपधगुणः ॥ विदांचकार ॥ वेदिता ॥ विदांकुर्वंतिव
त्व न्यतरस्यां ॥ वेत्तेर्लोट्याम् गुणाभावो लोटो लुक् लोडंतकरोत्यनुप्रयोगश्च वा निपात्यते ॥ पुरुषवचने न विवक्षिते इति राद्धांतः ॥ तनादिकृभ्य
उः ॥ तनोतेः कृञश्च उप्रत्ययः स्यात् ॥ शपोपवादः ॥ तनादित्वादेव सिद्धे कृञ्ग्रहणं गणकार्यस्यानित्यत्वे लिंगं ॥ तेन न विश्वसेदविश्वस्तमित्या
दि सिद्धं ॥ विदांकरोतु ॥ अतउत्सार्वधातुके ॥ उप्रत्ययांतकृञोऽकारस्य उत्स्यात्सार्वधातुके क्ङिति ॥ उदितिन तपरसामर्थ्यान्न गुणः ॥ वि
दांकुरुतात् ॥ विदांकुरुतां ॥ उतश्चनिहेर्लुक् ॥ आभीयत्वेन लुकोऽसिद्धत्वादुत्वं ॥ विदांकुरु ॥ विदांकरवाणि ॥ अवेत् ॥ अवित्तां ॥ सि
जभ्यस्तविदिभ्यश्च जुस् ॥ अविदुः ॥ दस्य ॥ धातोर्दस्य पदांतस्य सिपि परे रुः स्याद्वा ॥ अवेः ॥ अवेत् ॥ अस भुवि ॥ अस्ति ॥ श्नसोरल्लोपः ॥ श्न
स्यास्तेश्चाकारस्य लोपः स्यात्सार्वधातुके क्ङिति ॥ स्तः ॥ संति ॥ तासस्त्योरिति सलोपः ॥ असि ॥ स्थः ॥ स्थ ॥ अस्मि ॥ स्वः ॥ स्मः ॥ आर्द्धधा
तुके इत्यधिकृत्य ॥ अस्तेर्भूः ॥ बभूव ॥ भविता ॥ अस्तु ॥ स्तात् ॥ स्तां ॥ संतु ॥ घ्वसोरेद्धावभ्यासलोपश्च ॥ घोरस्तेश्चैत्वं स्याद्धौ परे अ
भ्यासलोपश्च ॥ आभीयत्वेन एत्वस्यासिद्धत्वाद्धिः ॥ श्नसोरित्यल्लोपः ॥ एधि ॥ तातङ्पक्षे एत्वं न ॥ परेण तातङा बाधनात् ॥ [illegible]
विति न्यायात् ॥ स्तात् ॥ स्तं ॥ स्त ॥ असानि ॥ असाव ॥ असाम ॥ अस्तिसिचोऽपृक्ते इति ईट् ॥ आसीत् ॥ श्नसोरित्यल्लोपस्याभीयत्वेनासिद्धत्वादा
ट् ॥ आस्तां ॥ आसन् ॥ स्यात् ॥ स्यातां ॥ स्युः ॥ भूयात् ॥ अभूत् ॥ सिचोऽस्तेर्विद्यमानत्वेन विशेषणादीण्न ॥ उपसर्गप्रादुर्भ्यामस्तिर्यच्परः ॥

॥सि॰कौ॰॥ उपसर्गेणः प्रादुःसम्प्रपरस्यास्तेः सस्य षः स्याद्यकारेऽचि परे ॥ निष्यात् ॥ प्रादुःष्यात् ॥ निषन्ति ॥ प्रादुःषन्ति ॥ यच्परः किं ॥ अभिस्तः ॥ मृजूष् शुद्धौ ॥ सि॰ अदा॰
॥३२॥ मृजेर्वृद्धिः ॥ मृजेरिकोवृद्धिः स्याद्धातुप्रत्यये परे ॥ क्ङित्यजादौ वेष्यते ॥ वेत्यनिषः ॥ मार्ष्टि ॥ मृष्टः ॥ मृजंति ॥ मार्जंति ॥ ममार्ज तुः ॥ ममृजतुः ॥ ममा धातोर्विहिते प्रत्यये परे
र्जिथ ॥ ममार्ष्ठ ॥ मार्जिता ॥ मार्ष्टा ॥ मृड्ढि ॥ अमार्ट् ॥ अमार्जं ॥ अमार्जीत् ॥ अमार्क्षीत् ॥ रुदिर् अश्रुविमोचने ॥ रुदादिभ्यः सार्वधातुके ॥ रुद् स्वप्
श्वस् अन् जक्ष एभ्यो वलादेः सार्वधातुकस्येट् स्यात् ॥ रोदिति ॥ रुदितः ॥ हो परत्वाद्वृद्धिर्धत्वं न ॥ रुदिहि ॥ रुदः पंचभ्यः ॥ हलादेः पितः सा
र्वधातुकस्यापृक्तस्य ईट् स्यात् ॥ अड्गार्ग्यगालवयोः ॥ अरोदीत् ॥ अरुदत् ॥ अरुदितां ॥ अरुदन् ॥ अरोदीः ॥ अरोदः ॥ प्रकृतिप्रत्ययविशे
षापेक्षाभ्यामडीड्भ्यामंतरंगत्वाद्यासुट् ॥ रुद्यात् ॥ अरुदत् ॥ अरोदीत् ॥ ञिष्वप् शये ॥ स्वपिति ॥ स्वपितः ॥ सुष्वाप ॥ सुषुपतुः ॥ सुषुपुः ॥ सु
ष्वपिथ ॥ सुष्वप्थ ॥ सुविनिर्दुर्भ्यः सुपिसूतिसमाः ॥ एभ्यः सुपादेः सस्य षः स्यात् ॥ पूर्वं धातुरुपसर्गेण युज्यते ॥ किन्तिङ्सिट्परत्वात् संप्रसा
रणात् प्राक् तेन द्वित्वं ॥ पूर्वत्रासिद्धीयमद्विर्वचने ॥ सुषुषुपतुः ॥ सुषुषुपुः ॥ अकितिनु द्वित्वे अभ्यासस्य संप्रसारणं ॥ षत्वस्यासिद्धत्वात् ततः
पूर्वं हलादिः शेषः ॥ नित्यत्वाद्वा ॥ ततः सुपिरूपाणां वा न्नषः ॥ सुषुषाप ॥ सुस्वप्ता ॥ अस्वपीत् ॥ अस्वपत् ॥ स्वप्यात् ॥ सुप्यात् ॥ सुषुप्यात् ॥ अ
स्वाप्सीत् ॥ श्वस प्राणने ॥ श्वसिति ॥ श्वसिता ॥ अश्वसीत् ॥ अश्वसत् ॥ श्वस्यातां ॥ श्वस्यास्तां ॥ ह्म्यंतेति न वृद्धिः ॥ अश्वसीत् ॥ अन च ॥ अनि ॥३२॥
ति ॥ आन ॥ अनिता ॥ आनीत् ॥ आनत् ॥ अनितेः ॥ उपसर्गस्थान्निमित्तात्परस्यानितेर्नस्य णः स्यात् ॥ प्राणिति ॥ जक्ष भक्षहसनयोः ॥ जक्षि

ति ॥ जक्षितः ॥ अदभ्यस्तात् ॥ झस्य अत् स्यात् तदंतापवादः ॥ जक्षति ॥ सिजभ्यस्तेति जुस ॥ अजक्षुः ॥ अयमंतर्गणो जक्षादिरित्युच्यते नोवधाम ॥
रुदादयः पंच गताः ॥ जागृ निद्राक्षये ॥ जागर्ति ॥ जागृतः ॥ जाग्रति ॥ उषविदेत्याम्वा ॥ जागरांचकार ॥ जजागार ॥ जाग्रोऽवि[illegible]विण
ल्ङित्सु ॥ जागर्तेर्गुणः स्याद्विचिण्णल्ङिङ्भ्योन्यस्मिन् वृद्धिविषये प्रतिषेधविषये च ॥ जजागरतुः ॥ जजागरुः ॥ अजागः ॥ अजाग्र
तां ॥ अभ्यस्तत्वात् जुस् ॥ जुसि च ॥ अजादौ जुसि इगंतांगस्य गुणः स्यात् ॥ अजा[illegible]गरुः ॥ अजाहोकिं ॥ जागृयुः ॥ आशिषि तु जा
गर्यात् ॥ जागर्यास्तां ॥ जागर्यासुः ॥ लुङि अजागरीत् ॥ जागृ इ स् ई त् इत्यत्र यण् प्राप्तः ॥ तं सार्वधातुकगुणो बाधते ॥ तं सिचि वृद्धिः ॥ तां
जागर्ति गुणः ॥ तत्र हलंतलक्षणा वृद्धिः प्राप्ता ॥ नेटीति निषिद्धा ॥ ततोऽतो हलादेरिति बाधित्वाऽतो ल्रांतस्येति प्राप्ता ॥ ह्म्यंतेति निषि
ध्यते ॥ तत्राहुः ॥ गुणो वृद्धिर्गुणो वृद्धिः प्रतिषेधो विकल्पनं ॥ पुनर्वृद्धिर्निषेधोऽतो यण्पूर्वाः प्राप्तयो नवेति ॥ १ दरिद्रा दुर्गतौ ॥ दरिद्रा
ति ॥ इद्दरिद्रस्य ॥ दरिद्रातेरिकारः स्याद्धलादौ क्ङिति सार्वधातुके ॥ दरिद्रितः ॥ श्नाभ्यस्तयोरातः ॥ अनयोरातो लोपः स्यात् क्ङिति
सार्वधातुके ॥ दरिद्रति ॥ अनेकाच्त्वादाम् ॥ दरिद्रांचकार ॥ आत औ णलः इत्यत्र ओ इत्येव सिद्धे औकारविधानं दरिद्रातेरालोपे कृ
ते श्रवणार्थं ॥ अत एव ज्ञापकादाम्न त्येके ॥ ददरिद्रौ ॥ ददरिद्रतुः इत्यादि ॥ यत्तु णलि ददरिद्र इति तन्निर्मूलकमेव ॥ दरिद्रातेरार्धधा
तुके विवक्षिते आलोपो वाच्यो लुङि वा सनिण्वुल्ल्युटि च न ॥ दरिद्रिता ॥ अदरिद्रात् ॥ अदरिद्रितां ॥ अदरिद्रुः ॥ दरिद्रियात् ॥ १५ अदा॰

॥सि॰कौ॥ ॥३३॥

अचकाद्रु अचकास्: सिपि धातो रुर्वा। पदान्तस्य धातोः स स्य रुः स्याद्वा पक्षे दः अचकाः अचकात्

दरिद्रांन॥अदरिद्रीत॥इह सिचो ऊर्ध्वं दरिद्रासीत॥चकास्तदीप्तौ॥ सस्य अलक्ष्य चकास्ति॥ चकासां चकार॥ धिश्व निलोपः॥ सिच एव लोपे॥ चकाधि॥ ति॰आ॰
चकाधीत्वसाध्यं॥ तिप्यनस्तेः॥ पदांतस्य सस्य दः स्यात् सिपि न त्वस्तेः॥ अचकात्॥ शासु अनुशिष्टौ॥ शास्ति॥ शास इदङ्हलोः॥ शासउप
धाया इत्स्यादङि हलादौ किङिति च॰ शासिवसिघसीनां च॥ शिष्टः॥ शासति॥ शशास॥ शशासतुः॥ शास्ता॥ शिष्टात्॥ शिष्टां॥ शासतु॥ शाधि॥
शा हौ॥ शा हेः शस्य ह्रेपरे॥ तस्याभीयत्वे नासिद्धत्वादधुर्धिः॥ शाधि॥ अशात्॥ अशिष्टां॥ अशासुः॥ अशाः॥ अशात्॥ शिष्यात्॥ सर्तिशा
स्त्यर्तिभ्यश्च॥ लृदित्वादङ्॥ अशिषत्॥ अशासिष्यत्॥ दीधीङ् दीप्तिदेवनयोः॥ एतदादयः पंच छांदसाः॥ दीधीते॥ एरनेकाच इति यण्॥ दीध्याते॥
वर्णयोर्दीधीवेव्योः॥ एतयोरंत्यस्य लोपः स्याद्यकारे इवर्णे च परे॥ इति लोपं बाधित्वा नित्यत्वादिय॥ दीध्ये॥ दीधीवेवीटामिति गुण
निषेधः॥ दीध्यांचक्रे॥ दीधिता॥ दीधिष्यते॥ वेवीङ् वेतिना तुल्ये॥ वीगतीत्यनेन तुल्यार्थे वर्तते इत्यर्थः॥ अथ त्रयः परस्मैपदिनः॥
षस सस्ति स्वप्ने॥ सस्ति॥ सस्तः॥ ससंति॥ ससास॥ ससतुः॥ सस्ता॥ सधि॥ पूर्वत्रासिद्धमिति सलोपस्यासिद्धत्वाद्धेर्धिरिति लु
क्॥ असत्॥ अस्तां॥ असन्॥ असत्॥ सस्यात्॥ असासीत्॥ अससीत्॥ संति॥ संतः॥ संसंति॥ बहूनां समवायेद्वयोः संयोगसंज्ञा
न त्याग्रिस्य स्कोरिति लोपाभावात्संस्ति॥ संस्ता इत्येक॥ वश कांतौ॥ कांतिरिच्छा॥ वष्टि उष्टः॥ उशंति॥ वक्षि॥ उष्ठ॥ उवाश॥ उशतुः॥ उ ॥३३॥
शुः॥ वशिता॥ वष्टु उष्टात्॥ उष्टां॥ उड्ढि॥ अवट्॥ औष्टां॥ औशन्॥ अवशं॥ उश्यात्॥ उश्यातां॥ उश्यासां॥ चर्करीतं च॰ यङ्लुगंत

उशंतु॥

स

उशं

मसादो बाध्यं॥ ह्नुङ् अपनयने॥ ह्नुते॥ जुह्नुवे॥ ह्नुवीत॥ ह्नोषीष्ट॥ अह्नोष्ट॥ ७४ इत्यदादयः॥॰ श्रीः ॥ हु दानादनयोः॥ आदाने चेत्ये
के॥ प्रीणने चेति भाष्यं॥ दानं चेह प्रक्षेपः॥ स च वैधे आधारे हविषक्षेपेति स एवात्र लुप्यते॥ इत्यत्र चत्वारः परस्मैपदिनः॥ जुहोत्यादिभ्यः
श्लुः॥ शपः श्लुः स्यात्॥ श्लौ॥ धातोर्द्वे स्तः॥ जुहोति॥ जुहुतः॥ अदभ्यस्तादित्यत्॥ हुश्नुवोरिति यण्॥ जुह्वति॥ भीह्रीभृहुवांश्लुवच्च॥
एभ्यो लिट्याम्वास्यादमिश्लाविव कार्यं च॥ जुहवां चकार॥ जुहाव॥ होता॥ होष्यति॥ जुहोतु॥ जुहुतात्॥ हुझल्भ्यो हेर्धिः॥ जुहुधि॥ आटिपरत्वा
द्गुणः॥ जुहवानि॥ परत्वाज्जुसि चेति गुणः॥ अजुहवुः॥ हूयात्॥ हूयात्॥ अहौषीत्॥ ञिभी भये॥ बिभेति॥ भियोऽन्यतरस्यां॥ इका
रः स्याद्धलादौ क्ङिति सार्वधातुके॥ बिभीतः॥ बिभितः॥ बिभ्यति॥ बिभयांचकार॥ बिभाय॥ भेता॥ भेष्यति इत्यादि॥ ह्रीलज्जायां॥
जिह्रेति॥ जिह्रीतः॥ जिह्रियति॥ जिह्रयांचकार॥ जिह्राय॥ पॄ पालनपूरणयोः॥ अर्तिपिपर्त्योश्च॥ अभ्यासस्य इकारोंतादेशः स्यात् श्लौ॥ उ
दोष्ठ्यपूर्वस्य॥ अंगावयवोष्ठ्यपूर्वो यः ऋत् तदंतस्यांगस्य उत्स्यात्॥ गुणवृद्धीपरत्वादिमं बाधेते॥ पिपर्ति॥ उत्वं॥ रपरत्वं॥ हलि चेति दी
र्घः॥ पिपूर्तः॥ पिपुरति॥ पपार॥ क्ङिति लिटि ऋच्छत्यृतामिति गुणे प्राप्ते॥ शॄदॄप्रां ह्रस्वो वा॥ एषां क्ङिति लिटि ह्रस्वो वा स्यात्॥ पक्षे गुणः॥
पप्रतुः॥ पप्रुः॥ पपरतुः॥ पपरुः॥ परिता॥ परीता॥ अपिपः॥ अपिपूर्तां॥ अपिपरुः॥ पिपूर्यात्॥ पूर्यात्॥ अपारीत्॥ अपारिष्टां॥ ह्रस्वांतो ५०३
यमिति केचित्॥ पिपर्ति॥ पिपृतः॥ पिप्रति॥ पिप्रियात्॥ आशिषि प्रियात्॥ अप्रापीत्॥ पाणिनीयमते तु॥ नंरोदसीपिप्रदित्यादौ छंद

॥३४॥ इत्यसंस्तरस्य ॥ डुभृञ् धारणपोषणयोः ॥ भृञामित् ॥ बिभृतः ॥ भृञ् ओहाङ् ओहाक् एषां त्रयाणामभ्यासस्य इत्स्यात् श्लौ ॥ बिभर्ति ॥ बिभृतः ॥
बिभ्रति ॥ बिभृथः ॥ भृञुवङ्गाचारिद्विलवरूपे ॥ बिभरामास ॥ बभार ॥ बभर्थ ॥ बभृव ॥ बिभृहि ॥ बिभराणि ॥ अबिभः ॥ अबिभृतां ॥ अबिभरुः ॥
बिभृयात् ॥ भ्रियात् ॥ भृषीष्ट ॥ अभार्षीत् ॥ अभृत ॥ माङ् माने शब्दे च ॥ ईद्धल्यघोः ॥ श्नाभ्यस्तयोरात ईत्स्यात् सार्वधातुके क्ङिति हलि न तु
घुघोः ॥ मिमीते ॥ श्नाभ्यस्तयोरातो लोपः ॥ मिमाते ॥ मिमते ॥ ममे ॥ ओहाङ् गतौ ॥ जिहीते ॥ जिहाते ॥ जिहते ॥ जहे ॥ हाता ॥ हास्यते ॥
ओहाक् त्यागे ॥ परस्मैपदी ॥ जहाति ॥ जहातेश्च ॥ इद्वास्यात् हलादौ क्ङिति सार्वधातुके ॥ पक्षे ईत्वं ॥ जहितः ॥ जहीतः ॥ जहति ॥ जहौ ॥ जहातु ॥
जहितात् ॥ जहीतात् ॥ आ च हौ ॥ जहातेर्हौ परे आ त्स्यात् चादिदीतौ ॥ जहाहि ॥ जहिहि ॥ जहीहि ॥ अजहात् ॥ अजहुः ॥ लोपो यि ॥ जहातेर्
आलोपः स्याद्यादौ सार्वधातुके ॥ जह्यात् ॥ एर्लिङि ॥ हेयात् ॥ अहासीत् ॥ डुदाञ् दाने ॥ प्रणिदाति ॥ दत्तः ॥ ददति ॥ दत्ते ॥ ददौ ॥ घ्वसोरे
द्धावभ्यासलोपश्च ॥ देहि ॥ अददात् ॥ अदत्तां ॥ अददुः ॥ दद्यात् ॥ देयात् ॥ अदात् ॥ अदातां ॥ अदुः ॥ अदित ॥ डुधाञ् धारणपोषणयोः ॥
दानेष्वपि ॥ प्रणिदधाति ॥ दधस्तथोश्च ॥ द्विरुक्तस्य झषन्तस्य [illegible] धाञो बशो भष् स्यात्तथयोः स्ध्वोश्च परतः ॥ वचनसामर्थ्या
दालोपो न स्थानिवदिति वामनमाधवौ ॥ वस्तुतस्तु पूर्वत्रासिद्धे न स्थानिवत् ॥ धत्तः ॥ दधति ॥ धत्थः ॥ दध्वः ॥ धत्ते ॥ धत्से ॥ धद्ध्वे ॥ धे ॥३४॥
हि ॥ अधित ॥ ॥ अथ त्रयः स्वरितेतः ॥ ॥ णिजिर् शौचपोषणयोः ॥ णिजां त्रयाणां गुणः श्लौ ॥ निजिर्विजिर्विषामभ्यासस्य

गुणः स्यात् श्लौ ॥ नेनेक्ति ॥ नेनिक्तः ॥ नेनिजति ॥ निनेज ॥ नेक्ता ॥ नेक्ष्यति ॥ नेनेक्तु ॥ नेनिग्धि ॥ नाभ्यस्तस्याचि पिति सार्वधातुके ॥ लघूपधगुणो
न स्यात् ॥ नेनिजानि ॥ अनेनेक् ॥ अनेनिक्तां ॥ अनेनिजुः ॥ नेनिज्यात् ॥ निज्यात् ॥ अनिजत् ॥ अनैक्षीत् ॥ अनैक्तां ॥ अनिक्त ॥ विजिर् पृ
थग्भावे ॥ वेवेक्ति ॥ वेविक्ते ॥ विवेजिथ ॥ अत्र विज इडिति ङित्त्वं न ॥ ओविजी इत्यस्यैव तद्ग्रहणात् ॥ विजिर्विजी इत्युभयोरपि ॥ विष्लृ व्या
प्तौ ॥ वेवेष्टि ॥ वेविष्टे ॥ ऌदित्वादङ् ॥ अविषत् ॥ तङि क्सः ॥ अनादौ क्सस्याचीति अल्लोपः ॥ अविक्षत ॥ अविक्षातां ॥ अविक्षंत ॥ अथ
आर्षाः ॥ नामपरस्मैपदिनश्छान्दसाश्च ॥ घृ क्षरणदीप्त्योः ॥ जिघर्ति ॥ भृञामिदिति इत्वं ॥ भृञामित् ॥ बहुलं छन्दसीति इत्वं ॥ ह्रस्वस्य
करणे ॥ अयं स्वरितेत्सु अपि जिहर्ति होमानं ॥ इसगतौ ॥ बहुलं छन्दसीत्येव सिद्धे अर्तिपिपर्त्योश्चेतीत्वविधानाद्भाषायामपि ॥ अभ्यासस्या
सवर्णे इति इयङ् ॥ इयर्ति ॥ इयृतः ॥ इयृति ॥ आर ॥ आरतुः ॥ आरुः ॥ इडत्यर्तिव्ययतीनामिति नित्यमिट् ॥ आरिथ ॥ अर्ता ॥ अरिष्यति ॥ इयराणि ॥
ऐयः ॥ इयृतां ॥ ऐयरुः ॥ इयृयात् ॥ अर्यात् ॥ आरत् ॥ ससर्ति ॥ असरत् ॥ भस भर्त्सनदीप्त्योः ॥ बभस्ति ॥ घसिभसोर्हलि च इत्युपधालो
पः ॥ झलो झलीति सलोपः ॥ बब्धः ॥ बप्सति ॥ कि ज्ञाने ॥ चिकेति ॥ तुर त्वरणे ॥ तुतोर्ति ॥ तुतूर्तः ॥ तुतुरति ॥ धिष शब्दे ॥ दिधेष्टि ॥ दिधि
ष्टः ॥ धन धान्ये ॥ दधन्ति ॥ दधन्तः ॥ दधनति ॥ जन जनने ॥ जजन्ति ॥ जनसनखनां सञ्झलोः ॥ एषामाकारोऽन्तादेशः स्याज्झलादौ सन्
नि झलादौ क्ङिति ॥ जजातः ॥ जज्ञति ॥ जजंसि ॥ जजान ॥ जजन्यात् ॥ जजायात् ॥ जन्यात् ॥ जायात् ॥ गा स्तुतौ ॥ देवाञ्जिगाति सुम्न

फति

॥सि०कौ०॥ ङिगीनः॥ङिगति॥ ॥त्रनिकुसेसादयः॥ ॥दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु॥ इङन्तः परस्मैपदि ति०दि०

॥३४॥ नः॥दिवादिभ्यः श्यन्॥ शपोऽपवादः॥ हलि चेति दीर्घः॥ दीव्यति॥ दिदेव॥ देविता॥ देविष्यति॥ दीव्यतु॥ दीव्य॥ अदीव्यत्॥ दीव्येत्॥ दीव्यात्॥

अदेवीत्॥ अदेविष्यत्॥ षिवु तन्तुसन्ताने॥ परिषीव्यति॥ परिषिषेव॥ न्यषीवीत्॥ न्यसेवीत्॥ ष्ठिवु गतिशोषणयोः॥ ष्ठिवु निरसने॥ केचि

दिहमंनपठन्ति॥ ष्णुसु अदने॥ आदानइत्येके॥ अदर्शनइत्यपरे॥ ष्णुस्यति॥ सुष्णोस॥ क्नसु निरसने॥ क्नस्यति॥ सक्नास॥ क्नसु दीप्ति

दीप्त्योः॥ ह्वरणं कौटिल्यं॥ वक्नास॥ प्लुष दाहे॥ प्लुष्योष॥ प्लुष्य॥ नृती गात्रविक्षेपे॥ नृत्यति॥ ननर्त॥ सेऽसिचि कृतचृतछृदतृदनृतः॥

एभ्यः परस्य सिजि भिन्नस्य सादेरार्धधातुकस्येड्वा स्यात्॥ नर्तिष्यति॥ नर्त्स्यति॥ नृत्येत्॥ नृत्यात्॥ अनर्तीत्॥ त्रसी उद्वेगे॥ वा भ्राशभ्लाशभ्रमु क्रमु क्लमु त्रसि त्रुटि लषः॥

ना॥ त्रस्यति॥ त्रसति॥ त्रेसतुः॥ तत्रसतुः॥ कुथ पूतीभावे॥ पुथ हिंसायां॥ गुध परिवेष्टने॥ क्षिप प्रेरणे॥ क्षिप्यति॥ क्षेप्ता॥ पुष्प विकस

ने॥ पुष्प्यति॥ पुपुष्प॥ तिम ष्टिम ष्टीम आर्द्रीभावे॥ तिम्यति॥ स्तिम्यति॥ स्तीम्यति॥ व्रीड चोदने लज्जायां च॥ व्रीड्यति॥ इष गतौ॥ इ

ष्यति॥ षह षुह चक्यर्थे॥ चकुः तृप्तिः॥ सह्यति॥ सुह्यति॥ जॄ ष्यॄ वयोहानौ॥ जीर्यति॥ जजरतुः॥ जेरतुः॥ जरिता॥ जरीता॥ जीर्य जे रु:

त्॥ ऋदृशोऽङि गुणः॥ अजरत्॥ अजारीत्॥ अजारिष्टां॥ झीर्यति॥ जझरतुः॥ अझारीत्॥ षूङ् प्राणिप्रसवे॥ सूयते॥ ॥३५॥

सुषुवे॥ स्वरतीति विकल्पं बाधित्वा श्र्युकः किति नीति निषेधे प्राप्ते॥ क्रादिनियमान्नित्यमिट्॥ सुषुविषे॥ सुषुविवहे॥ सोता॥ सविता॥ दू

वाक्यार्थे०॥

अथात्मनेपदिनः॥

ङ् परितापे॥ दूयते॥ दीङ् क्षये॥ दीयते॥ दीङो युडचि क्ङिति॥ दीङः परस्याजादेः क्ङित आर्धधातुकस्य युट् स्यात्॥ वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ॥

दिदीये॥ मीनातिमिनोतिदीङां ल्यपि च॥ एषामात्वं स्यात् ल्यपि चकाराच्छित्येजनिमित्ते॥ दाता॥ दास्यते॥ अदास्त॥ अदास्थाः॥ डीङ् विहायसा

गतौ॥ डीयते॥ धीङ् आधारे॥ धीयते॥ दिध्ये॥ धेता॥ मीङ् हिंसायां॥ हिंसात्र प्राणवियोगः॥ मीयते॥ रीङ् श्रवणे॥ लीङ् श्लेषणे॥ विभाषा लीयतेः॥

॥लीयतेरिति यका निर्देशो न तु श्यना॥ लीलीङोरात्वं वा स्यादेज्विषये ल्यपि च॥ लेता॥ लाता॥ लेष्यते॥ लास्यते॥ एज्विषये किं॥ लीयते॥ लिल्ये॥

व्रीङ् वृणोत्यर्थे॥ व्रीयते॥ विव्रिये॥ स्वादय ओदितः॥ तत्फलं तु निष्ठानत्वं॥ पीङ् पाने॥ पीयते॥ पिप्ये॥ माङ् माने॥ माता॥ ममे॥ ईङ् गतौ॥

ईयते॥ अयांचक्रे॥ प्रीङ् प्रीतौ॥ सकर्मकः॥ प्रीयते॥ पिप्रिये॥ ॥अथ परस्मैपदिनश्चत्वारः॥ ॥शो तनूकरणे॥ ओतः श्यनि॥ लोपः स्या

त्॥ श्यति॥ श्यतः॥ श्यन्ति॥ शशौ॥ शशतुः॥ शाता॥ शास्यति॥ विभाषाघ्राधेट्शाच्छासः॥ एभ्यः सिचो लुग्वा॥ यमरमनमातां सक् च॥ अ

शात्॥ अशातां॥ अशुः॥ अशासीत्॥ अशासिष्टां॥ छो छेदने॥ छ्यति॥ षो अन्तकर्मणि॥ स्यति॥ ससौ॥ असात्॥ स्यिष्यति॥ अस्यष्यत्॥ अस्

ससौ॥ दो अवखण्डने॥ द्यति॥ ददौ॥ अदित्॥ अदात्॥ देयात्॥ अदात्॥ ॥अथात्मनेपदिनः पंचदश॥ ॥जनी प्रादुर्भावे॥ ज्ञाजनोर्जा॥ अन

योर्जा देशः स्याच्छिति॥ जायते॥ जज्ञे॥ जज्ञाते॥ जज्ञिरे॥ जनिता॥ जनिष्यते॥ दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्॥ जनिवध्योश्च॥ अनयोरुपधाया वृ

द्धिर्न स्याच्चिणि ञ्णिति कृति च॥ अजनि॥ अजनिष्ट॥ दीपी दीप्तौ॥ दीप्यते॥ दिदीपे॥ अदीपि॥ अदीपिष्ट॥ पूरी आप्यायने॥ पूर्यते॥ अपूरि॥ दि०दि०

॥सि॰कौ॰॥ अपूरिष्ट॥ तूरी गतित्वरणहिंसनयोः॥ तूर्यते॥ तुतूरे॥ धूरी गूरी हिंसागत्योः॥ धूर्यते॥ दुधूरे॥ गूर्यते॥ जुगूरे॥ घूरी जूरी हिंसावयोहान्योः॥ शूरी हिं नि॰दि॰
॥३५॥ सास्तंभनयोः॥ चूरी दाहे॥ तप ऐश्वर्ये वा॥ अयं धातुरैश्वर्ये वा आत्मनेपदी॥ अन्यदा तु शब्विकरणः परस्मैपदीत्यर्थः॥ केचित्तु वाग्र
हणं वृतु धातोराद्यावयवमिच्छंति॥ तप्यते॥ तेपे॥ तप्ता॥ तप्स्यते॥ अतप्त॥ पतति व्यत्यासेन पाठांतरं॥ वृतु वर्तमाने नियुतः पत्यमानः॥ वृतु
वरणे॥ वृत्यते॥ पक्षांतरे॥ वाहत्यते॥ ततो वाहत्यमानासा रामशालांन्यवीवृत्यतेति भट्टिः॥ क्लिश उपतापे॥ क्लिश्यते॥ क्लेशिता॥ काश दीप्तौ॥
काश्यते॥ वाश शब्दे॥ वाश्यते॥ ववाशे॥ ॥ अथ पंच स्वरितेतः॥ मृष तितिक्षायां॥ मृष्यति॥ मृष्यते॥ ममर्ष॥ ममृषे॥ मर्षिता॥ शुचिर् शु
पूतीभावे॥ पूतीभावः क्लेदः॥ शुच्यति॥ शुच्यते॥ शुशोच॥ शुशुचे॥ अशुचत्॥ अशोचीत्॥ अशोचिष्ट॥ णह बंधने॥ नह्यति॥ नह्यते॥ ननाह॥
नेहिथ॥ नेह॥ नद्धा॥ नत्स्यति॥ अनात्सीत्॥ रंज रागे॥ रज्यति॥ रज्यते॥ शप आक्रोशे॥ शप्यति॥ शप्यते॥ ॥ ॥ अथैकादशानु
दात्तेतः॥ ॥ पद गतौ॥ पद्यते॥ पेदे॥ पत्ता॥ पद्येत॥ पत्सीष्ट॥ चिण्ते पदः॥ पदश्चिण् स्यात्तशब्दे परे॥ चिणो लुक्॥ अपादि॥ अपत्सातां॥ अपत्स
त॥ खिद दैन्ये॥ खिद्यते॥ चिखिदे॥ खेत्ता॥ अखित्त॥ अखित्सातां॥ विद सत्तायां॥ विद्यते॥ वेत्ता॥ बुध अवगमने॥ बुध्यते॥ बुबुधे॥ बोद्धा॥ भोत्स्यते॥ भुत्सी
ष्ट॥ अबोधि॥ अबुद्ध॥ अभुत्सातां॥ युध संप्रहारे॥ युध्यते॥ युयुधे॥ योद्धा॥ अयुद्ध॥ कथं युध्यतीति॥ युधमिच्छतीति क्यच्॥ अनुदात्तेत्त्वल ३५
क्षणमात्मनेपदमनित्यमिति वा॥ अनो रुध कामे॥ अनुरुध्यते॥ अण प्राणने॥ अण्यते॥ आणे॥ अणिता॥ अनितिरंतोयमित्येके

॥ युध्यते योद्धा॥ सृज विसर्गे॥ अकर्मकः॥१॥

मन ज्ञाने॥ मन्यते॥ मेने॥ मंता॥ युज समाधौ॥ समाधिश्चित्तवृत्तिनिरोधः॥ अकर्मकः॥ संसृज्यते सरसिजैररुणांशुभिन्नैः॥ सरसिजैर्हेतुभिः॥ सृष्टा॥ म
राम॰ स्यते॥ लिङ्सिचावित्यकित्त्वान्न गुणः॥ नाप्यम्॥ सृक्षीष्ट॥ असृष्ट॥ असृक्षातां॥ लिश अल्पीभावे॥ लिश्यते॥ लेष्टा॥ लेक्ष्यते॥ लिक्षीष्ट॥ अलि
क्षत॥ अलिक्षातां॥ ॥ अथ राधोऽकर्मकाद्वृद्धावेव॥ ॥ राधोऽकर्मकाद्वृद्धावेव॥ एवकारो भिन्नक्रमः॥ राधोऽकर्मकाद्वृद्धावश्यन्॥ उदाह
रणमाह॥ इत्यादिति॥ यस्मै द्यमपराध्यति॥ द्रुह्यतीत्यर्थः॥ विराध्यंतं क्षमेतकः॥ द्रुह्यंतं॥ राध्यत्योदनः॥ सिध्यतीत्यर्थः॥ कृष्णाय राध्यति॥
दैवं पर्यालोचयतीत्यर्थः॥ दैवस्य धात्वर्थेनभावादकर्मकत्वं॥ रराध॥ रराधतुः॥ रराधिथ॥ राधो हिंसायामित्येत्वाभ्यासलो
पाविहन॥ हिंसार्थस्य सकर्मकत्वादेतदवृद्धि कत्वायोगात्॥ राद्धा॥ रात्स्यति॥ अयं स्वादिश्चुरादिश्च॥ व्यध ताडने॥ ग्रहिज्येति संप्रसारणं॥ विध्यति॥ वि
व्याध॥ विविधतुः॥ विव्यद्ध॥ विव्यधिथ॥ व्यद्धा॥ व्यत्स्यति॥ विध्येत्॥ विध्यात्॥ अव्यात्सीत्॥ पुष पुष्टौ॥ पुष्यति॥ पुपोष॥ पुपोषिथ॥ पो
ष्टा॥ पोक्ष्यति॥ पुषादीत्यङ्॥ अपुषत्॥ शुष शोषणे॥ अशुषत्॥ तुष प्रीतौ॥ दुष वैकृत्ये॥ श्लिष आलिंगने॥ श्लिष्यति॥ शिश्लेष॥ श्लेष्टा॥
श्लेक्ष्यति॥ श्लिषः॥ अस्मात्परस्यानिटश्च्लेः क्सः स्यात्॥ पुषादित्यङोपवादः॥ ननु श्लिषः॥ पुरस्तादपवादन्यायात्॥ आलिंगने श्लि
ष इत्यालिंगन एव क्सो नान्यत्र॥ योगविभागसामर्थ्याच्च क्सः इगुपधादिस्यस्याप्ययं नियमः॥ अश्लिक्षत्कन्यां देवदत्तः॥ आलिं
गने एवेति किं॥ समश्लिषज्जतु काष्ठं॥ अ ॥ श्लिषा सत्ता विहद्विकृषिः॥ कर्मणि अनालिंगने सिद्धे वचनं करः॥ एकवचने विध्य ॥५॥३५

तस्मात्कर्मेण क्तिः षित्त्वस्य फलं चैत इति ॥

॥सि० कौ०॥ अश्लेषि। अश्लिक्षातां। अश्लिक्षत। अश्लिक्षाः। अश्लिक्षद्ध्वं। शक विभाषितो मर्षणे। विभाषितः इत्युभयपदीत्यर्थः। शक्यति। शक्यते। ति० दि०
॥३७॥ इतिरिंदादुभयमर्कः। शशाक। शकिथ। शशक्थ। शेके। शक्ता। शक्ष्यति। शक्ष्यते। अशकत्। अशक्त। सेट्कोयमित्यन्ये। तन्मतेन अनिट्
कारिकासु लदित्यपठितः। शकिता। शकिष्यति। ष्विदा गात्रप्रक्षरणे। घर्मस्रुताविल्यर्थः। अयं ञीदिदिति न्यासकारादयः। नेतिहरदत्ता
दयः। स्विद्यति। सिष्वेद। सिष्वेदिथ। स्वेत्ता। अस्विदत्। क्रुध क्रोधे। क्रोद्धा। क्रोत्स्यति। क्षुध बुभुक्षायां। क्षोद्धा। कथं क्षुधित इति। संपु
दादिक्विबंताज्ञारकादित्वादित्वं इति माधवः। वसतिक्षुधोरिडिति। शुध शौचे। शुध्यति। शुशोध। शोद्धा। षिधु संराद्धौ
वृद्धिलाठः प्रामादिकः। सिध्यति। सेद्धा। सेत्स्यति। असिधत्। रध हिंसासंराध्योः। रध्यति। रधिजभोरचीति नुम्। ररंध। ररंधतुः।
रधादिभ्यश्चेति वलाद्यार्धधातुकस्य वेट् स्यात्। ररंधिथ। ररद्ध। ररंधिव। ररध्व। नेट्यलिटि रधेः। लिड्वर्जे इटि रधेर्नुम् न स्यात्। रधिता।
रद्धा। रत्स्यति। अङि नुम्। अनिदितामिति नलोपः। अरधत्। णश अदर्शने। नश्यति। ननाश। नेशतुः। नेशिथ। मस्जिनशो
र्झलि नुम् स्यात्। ननंष्ठ। नेशिव। नेश्व। नेशिम। नेश्म। नशिता। नंष्टा। नशिष्यति। नङ्क्ष्यति। नश्यतु। नश्यात्। अनशत्।
प्रणश्यति। नशेः षांतस्य णत्वं न स्यात्। प्रनंष्टा। अंतग्रहणं भूतपूर्वप्रतिपत्त्यर्थं। प्रनङ्क्ष्यति। तृप प्रीणने। प्रीणनं तृप्तिस्तर्प
णं च। नाग्निस्तृप्यति काष्ठानां। पितॄनतर्पीत्। इत्युभयत्र दर्शनात्। ततर्पिथ। ततर्प्थ। तर्पिता। तर्प्ता। त्रप्ता। स्पृशमृशकृष ॥

रधनशतृपदृपद्रुहमुहष्णुहष्णिहरए ॥ ०

त्रितृपिस्पृशा। अतार्प्सीत्। अत्राप्सीत्। अतृपत्। अतृपत्। दृप हर्षमोहनयोः। मोहनं गर्वः। दृप्यतीत्यादि। रधादित्वाद्विभाषा वेट्कावमर्थे
मनुदात्तत्वात्। द्रुह जिघांसायां। वाद्रुहमुहेत्यादिना घः। पक्षे ढः। दुद्रोग्ध। दुद्रोढ। दुद्रोहिथ। द्रोहिता। द्रोग्धा। द्रोढा। द्रोहिष्यति। ध्रोक्ष्यति। द्रुग्ध। शुध्या
स्तयोः सत्यं रूपं। अद्रुहत्। मुह वैचित्त्ये। वैचित्त्यमविवेकः। मुह्यति। मुमोहिथ। मुमोग्ध। मुमोढ। मोग्धा। मोढा। मोहिता। मोहिष्य
ति। मोक्ष्यति। अमुहत्। ष्णुह उद्गिरणे। स्नुह्यति। सुष्णोह। सुष्णोहिथ। सुष्णोग्ध। सुष्णोढ। सुष्णुहिव। सुष्णुह्व। स्नोहिता। स्नोग्धा।
स्नोढा। स्नोहिष्यति। स्नोक्ष्यति। अस्नुहत्। ष्णिह प्रीतौ। स्निह्यति। सिष्णेह। इत्यादि। रधादयः समाप्ता इत्यर्थः। ॥ पुषादयस्त्वा
गणांतादिति सिद्धांतः। ॥ शमु उपशमे। शमामष्टानां दीर्घः श्यनि। शमादीनामित्यर्थः। शाम्यति। शशाम। शेमतुः। शेमिथ। शमिता।
अशमत्। तमु कांक्षायां। ताम्यति। तमिता। अतमत्। दमु उपशमे। उपशमेऽत्र इति। कथं तस्य। न न सकर्मकोऽयं। न तु शमिवदकर्मकः।
अदमत्। श्रमु तपसि खेदे च। श्राम्यति। अश्रमत्। भ्रमु अनवस्थाने। वा भ्राशेति श्यन्वा। न च तत्रैव शमामष्टानामिति दीर्घः। भ्राम्य
ति। भ्रमति। अभ्रमत्। क्षमूष् सहने। क्षाम्यति। चक्षमिथ। चक्षंथ। चक्षमिव। चक्षण्व। चक्षमिम। चक्षण्म। क्ष
मिता। क्षंता। अयं न षित्। भ्वादिस्तु षित्। अक्षमत्। क्षाम्यते। क्षांतिः क्षमा। क्षमतेः क्षमा। क्लमु ग्लानौ। क्लाम्यति। वा भ्राशेति श्य
न्विकल्पात् क्लमिश्च दीर्घः सिद्धः शमादिपाठो दिवुपत्यर्थः। अङ्। अक्लमत्। मदी हर्षे। माद्यति। अमदत्। शमामष्टौ गता॥
असु क्षेपणे। अस्यति। आस। असिता। अस्यतेस्थुक्। अङि परे। आस्थत्। अस्यत्युपादिति वक्तव्ये इति सिद्धे अस्यतीति वक्रीति वक्तव्यंतेऽर्थे ॥

आत्मनेपदेष्वपि विकल्पेति ॥

॥सि०कौ०॥ नडु॰ तूपसर्गात्युद्योरितिवस्यतेः॥ पर्यास्कत॥ यसु प्रयत्ने॥ यसोऽनुपसर्गात्॥ संयमस्य॥ श्यन्वा स्यात्॥ यस्यति॥ यसति॥ संयस्यति॥ संयसति॥ अनुप सि०कौ०
॥३८॥ सर्गात्किं॥ प्रयस्यति॥ जसु मोक्षणे॥ जस्यति॥ तसु उपक्षये॥ दसु च॥ तस्यति॥ अतसत्॥ दस्यति॥ अदसत्॥ वसु स्तंभे॥ वस्यति॥ वसासनवसलुः॥
नवासहतिनिषेधः॥ बसादिरयमितिमतेऽपि॥ बेसबुः॥ बिसुः॥ बुष विभागे॥ अयं दाह पठितः॥ अर्थभेदेन त्वेतुर्थे पुनः पकथनं॥ अव्युषत्॥ आ
ष्टादित्वात्तोयं व्युसी त्यन्ये॥ अयकारं पुस इत्यपरे॥ पुसवदाहे॥ अपुषत्॥ पूर्वत्र पाठः सिद्धर्थ इत्याहुः॥ तत्स्वादिपाठनगतार्थमितिसुवचं॥ विसप्रेरणे॥
विस्यति॥ अविसत्॥ कुस संश्लेषणे॥ अकुसत्॥ बुस उत्सर्गे॥ मुस खंडने॥ मसी परिणामे॥ परिणामो विकारः॥ समीत्येके॥ लुट विलोडने॥ उत्स
मवाये॥ उचति॥ उवोच॥ ऊचतुः॥ मा भवानुचत्॥ भृशु भ्रंशु अधःपतने॥ बभर्श॥ अभृशत्॥ अनिदितामिति नलोपः॥ भ्रश्यति॥ अभ्रशत्॥
वृश वरणे॥ वृश्यति॥ अवृशत्॥ कृश तनूकरणे॥ कृश्यति॥ जितृष पिपासायां॥ हृष तुष्टौ॥ श्यन्नुत्तभावादिकारि शेषः॥ रुष रिष हिंसायां॥
रोषसहेतिवट्॥ रोषिता॥ रोष्टा॥ रेषितारेष्टा॥ डिप क्षेपे॥ कुप क्रोधे॥ गुप व्याकुलत्वे॥ युप रुप लुप विमोहने॥ युप्यति॥ रुप्यति॥ लुप्यति॥ लोपि
ता॥ लुप्यतिः सेट्कः॥ अनिट्का[illegible] कारिकास्तु लिपि साहचर्यात्तौदादिकस्यैव ग्रहणात्॥ लुभ गार्ध्ये॥ गार्ध्यमाकांक्षा॥ तीषसहेतिवट्॥ लोभिता॥ ॥३८॥
लोब्धा॥ लोभिष्यति॥ लुभ्यतु॥ लुभ्यात्॥ अलुभत्॥ भ्वादेरपत्यं त्वा वले लोभतीत्यपीत्याहुः॥ क्षुभ संचलने॥ क्षुभ्यति॥ णभ तुभ हिंसायां॥
क्षुभिनत्रिनुभ्यः॥ घुतादौ क्र्यादौ चपठ्यंते॥ तेषां घुतादित्वाद् ङ् सि [illegible] दः॥ क्र्यादित्वात्प्रश्नेसिद्धश्नवत्येव॥ इहपाठस्तु श्यन्नर्थः॥ क्लिशो उपतापे

यति॥ क्लिद्यति॥ चिक्लेदिथ॥ चिक्लेत्थ॥ चिक्लिदिव॥ चिक्लिद्व॥ क्लेदिता॥ क्लेत्ता॥ ञिमिदा स्नेहने॥ मिदेर्गुणः॥ मेद्यति॥ अमिदत्॥ द्युतादिपाठादेव अमेदत् अमे दि
ष्टेति सिद्धे इह पाठो अमेदीदितिमा भूदिति॥ घुतादित्यो बहिरंगमनेनपदिषु पाठस्तु चित्॥ ञिक्ष्विदा स्नेहनमोचनयोः॥ ऋधु वृद्धौ॥ आनर्ध॥ आर्धत्॥ गृधु अ
भिकांक्षायां॥ अगृधत्॥ ॥ वृत्॥ पुषादयो दिवाद्यर्थ वृत्ताः॥ केचित्तु पुषादिसमाप्त्यर्थमेव वृत्करणं॥ दिवादिस्त्वाद्यवृत् इति गणः॥ तेन सीयते इत्यादी
नीत्यादिमिहि रित्याहुः॥ श्लो॰ ॥ ॥ इति दिवादयः॥ ॥ षुञ् अभिषवे॥ अभिषवः स्नपनं पीडनं स्नानं सुरासंधानं वा॥ तत्र स्नाने अकर्मकः॥ स्वा
दिभ्यः श्नुः॥ सुनोति॥ सुनुतः॥ हुश्नुवोरितियण्॥ सुन्वंति॥ सुन्वः॥ सुनुवः॥ सुन्मः॥ सुनुमः॥ सुषाव॥ सुषुवे॥ सोता॥ सुनु॥ सुनवानि॥ सुनवै॥ सुनुयात्॥
सूयात्॥ स्तुसुधू अस्य इतीट्॥ असावीत्॥ असोष्ट॥ अभिषुणोति॥ अभ्यषुणोत्॥ अभिसुषाव॥ सुनोतेः स्यसनोः॥ स्यसनि च परस्मै॥ अःशानस्याल्॥ विसा
व्यति॥ षिञ् बंधने॥ सिनोति॥ विषिणोति॥ सिषाय॥ सिष्ये॥ सेता॥ शिञ् निशाने॥ मालुव्यादिः॥ शेता॥ डुमिञ् प्रक्षेपणे॥ मिनातिमिनोतीत्यात्वं॥ ममौ॥ म
मिथ ममाथ॥ मिम्ये॥ माता॥ मीयात्॥ मासीष्ट॥ अमासीत्॥ अमासिष्टां॥ अमासत॥ चिञ् चयने॥ प्रणिचिनोति॥ विभाषा चेः॥ अभ्यासात्परस्य कुत्वं॥ चि
कायं चिचाय॥ चिचये॥ चेता॥ चिनु॥ अचैषीत्॥ अचेष्ट॥ स्तृञ् आच्छादने॥ स्तृणोति॥ स्तृणुते॥ गुणोर्तीति गुणः॥ स्त
रीव॥ शर्पूर्वाः॥ ऋतश्च संयोगादेः॥ परत्वाल्लिङि सिचोरिड्वाच्या॥ स्तरिषीष्ट॥ स्तृषीष्ट॥ अस्तरिष्ट॥ अस्तृत॥ कृञ् हिंसायां॥ कृणोति॥
कृणुते॥ चकार॥ चकृषे॥ कर्त्ता॥ कृषीष्ट॥ अकार्षीत्॥ अकृत॥ वृञ् वरणे॥ वरणयानंतं च अत्यस्य च वर्येति निगमः॥ एषां वेदेउभावेनिपा

॥सिं॰कौ॰॥ स्ते॥ तन माषा यांपत्नीह्लृ॥ ववरिथ॥ ववर॥ ववृवहे॥ वरिता॥ वरीता॥ लिङ्सिचोरात्मनेपदेषु॥ वृङ्वृञ्भ्यामृदन्ताच्चपरयोर्लिङ्सिचोरिड्वास्यात्तङि॥ नलि ॥सि॰स्व॰
॥३०॥ ङि॥ सनोलिङ् इटोदीर्घो नस्यात्॥ वरिषीष्ट॥ वृषीष्ट॥ अवारीत्॥ अवरिष्ट॥ अवृत॥ धूञ् कंपने॥ धूनोति॥ धूनुते॥ दधाव॥ दधविथ॥ दधोथ॥ दीर्घान्ताच्चयं॥
धूनोतिथ धूनुते॥ स्वरतीतिवट्॥ दुधुविथ॥ दुधोथ॥ क्रितिलिटि श्र्युकः इतिनिषेधं बाधित्वा क्रादिनियमान्नित्यमिट्॥ दुधुविव॥ स्वः सुधूञ्भ्यइति नि
त्यमिट्॥ अधावीत्॥ अधविष्ट॥ अधोष्ट॥ ॥अथ परस्मैपदिनः॥ ॥टुदु उपतापे॥ दुनोति॥ हिगतौ वृद्धौ च॥ हिनोति॥ उपसर्गस्थान्निमित्तात्
रस्य नयोर्नस्य णः स्यात्॥ प्रहिणोति॥ हेरचङि॥ अभ्यासात्परस्य हिनोतेर्हस्य कुत्वं स्यान्न तु चङि॥ जिघाय॥ पृ प्रीतौ॥ पृणोति॥ पपार॥ स्पृ प्रीति
पालनयोः॥ प्रीतिबलनयोरित्यन्ये॥ बलनं जीवनमित्येके ॥ति स्वामी॥ स्पृणोति॥ पस्पार॥ स्मृ इत्येके॥ स्मृणोति॥ छन्दोमात्रत्वात्स्यापि छान्दसत्वा
त्॥ आप्लृ व्याप्तौ॥ आप्नोति॥ आपुवंति॥ आपुवः॥ आप॥ आपुहि॥ लृदित्वादङ्॥ आपत्॥ शक्लृ शक्तौ॥ अशकत्॥ राध साध संसिद्धौ॥ राध्नोति सा
ध्नोति॥ ... ॥अपरधनुः॥ अपरधुः॥ ... धयः॥ राद्धा॥ साध्नोति॥ साद्धा॥ असात्सीत्॥ असाद्धाम्॥ अथ द्वावनुदा
त्तावभ्यासलोपौ स्तः॥ क्ङिति लिटि सेटि थलि च॥ अपरधतुः॥ अपरधुः॥ ... ॥ दीर्घादृश्या सादृवर्णात्परस्य नुट् स्यात्॥ आनश॥ आशत्॥ अष्टा॥ अशिष्यते॥ अस्तनः॥ अश्नु
नेतो॥ अनश्वाप्तौ संघाते च॥ अश्नुते॥ अश्नोति॥ दीर्घादृश्यासादृवर्णात्परस्य नुट् स्यात्॥ आनशे॥ आशिष्ट॥ आष्ट॥ आशाताम्॥ षिघ आस्कन्दने॥ स्तिघ्नुते॥ तिष्टिघे॥ स्तेघिता॥ ॥अथात्मनेपदिनः॥ तिक॥ ॥३१॥
तीन॥ असेधिष्ट॥ अशिपीष्ट॥ आशिष्ट॥ आष्ट॥ आशातां॥ षिघ आस्कन्दने॥ स्तिघ्नुत॥ तिष्टिघे॥ स्तेघिता॥
तिग च॥ आस्कन्दने॥ तिक्नोति॥ तिग्नोति॥ षघ हिंसायां॥ सघ्नोति॥ ञिधृषा प्रागल्भ्ये॥ धृष्णोति॥ दधर्ष॥ धर्षिता॥ दंभु दंभने॥ दंभनं दंभः॥ दभ्नो

ति॥ ददंभ॥ श्रंथिग्रंथि दंभिस्वंजीनां लिटः कित्वं वेति व्याकरणान्तरं॥ इहाप्याश्रीयत इत्युक्तं॥ अनिदितामिति नलोपः॥ तस्याभीयत्वादसिद्धत्वेन एत्वाभ्या
सलोपयोरप्राप्तौ देभ्य॥ एत्वाभ्यासलोपावत्र थो॥ देभतुः॥ ददंभतुः॥ इदं किंचपि दृषि द्विषयक मिति सुधाकारादयः॥ तन्मते निश्चसिश्रमिशुद्भमम्भि
थ॥ देभ॥ इति रूपांतरं बोध्यं॥ अपि द्विषयकमिति न्यास कारादिमते तु॥ ददंभ॥ ददंभिथ॥ ददंभ॥ दंभस्य च॥ दस्यात्॥ ऋधु वृद्धौ॥ त्वपश्रीणनइत्येके॥ ऋध्नो
ति॥ आनर्धत्वं॥ तृप प्रीणने॥ कृश॥ आगमेतानादिधिकारात्॥ अहम्याप्तौ॥ अह्नोति॥ दघ घातने पालने च॥ दघ्नोति॥ चमु भक्षणे॥ चम्नोति॥ रिस
छिदि ॥ चिरिदारादिहिंसायां॥ रिणोति॥ चिरिणोति॥ अयं भाषायामपीत्येके॥ ननु तस्य शः शस्त्र स्तं क्षिणोति॥ ऋक्षीत्येक एवाज्जादिरित्यन्ये॥ ऋक्षि
णोति॥ चिरिणोति॥ जिरिणोति॥ दाश्नोति॥ दृणोति॥ ॥ इति ॥ ३५॥ ॥इतिस्वादयः॥ ॥ तुद व्यथने॥ तुदतः पट्स्वरितेतः॥ तुदादिभ्यः शः॥
तुदति॥ तुदते॥ तुतोद॥ तुतोदिथ॥ तुतुदे॥ तोत्ता॥ अतौत्सीत्॥ अतुत्त॥ णुद प्रेरणे॥ नुदति॥ नुदते॥ नुनोद॥ नुनुदे॥ नोत्ता॥ दिश अतिसर्जने॥ अतिस
र्जनं दानं॥ देष्टा॥ दिक्षीष्ट॥ अदिक्षत्॥ अदिक्षत॥ भ्रस्ज पाके॥ ग्रहिज्या॥ सस्य श्चुत्वेन शः॥ शस्य जश्त्वेन जः॥ स्कोः॥ भ्रस्जो रोपधयोरमन्यतर
स्यां॥ भ्रस्जेरेफस्योपधायाश्च स्थाने रमागमो वा स्यात्॥ आर्धधातुके॥ मित्वादन्त्यादचः परः॥ स्थानषष्ठीनिर्देशाद्रोपधयोर्निवृत्तिः॥ बभर्ज॥ बभर्ज
तुः॥ बभर्जिथ॥ बभर्ष्ठ॥ बभर्जे॥ बभ्राज॥ बभ्रज्जतुः॥ बभ्रज्जिथ॥ स्कोरिति सलोपः॥ व्रश्चेति षः॥ बभ्रष्ठ॥ बभ्रज्जे॥ भर्ष्टा॥ भ्रष्टा॥
भर्क्ष्यति॥ भ्रक्ष्यति॥ क्ङिति रमागमं बाधित्वा संप्रसारणं पूर्वविप्रतिषेधेन॥ भृज्ज्यात्॥ भृज्जास्तां॥ भर्क्षीष्ट॥ भ्रक्षीष्ट॥ अभार्क्षीत्॥ अभ्राक्षीत्॥

कौ०उ० अभ्रक्षत् ॥ अभ्रक्षे ॥ क्षिप प्रेरणे ॥ क्षिपति ॥ क्षिपते ॥ क्षेप्ता ॥ अक्षैप्सीत् ॥ अक्षिप्त ॥ कृष चिलेखने ॥ कृषति ॥ कृषते ॥ ति॰ सुदि

५० शम्भुना कृषत्यपरपात्रं नृः सिज्वा वा च्यः इति सिज्वा ॥ प्रक्षेक्षत ॥ सिचि अम्वा ॥ अकाक्षीत् ॥ अकार्क्षीत् ॥ अकृक्षत् ॥ नाडु लिङ्डुसि नाविति किवाद

न ॥ अकृक्षत ॥ अकृक्षातां ॥ अकृक्षत ॥ अकृक्षत ॥ अकृक्षातां ॥ अकृक्षंत ॥ ऋ पी गतौ ॥ परस्मैपदी ॥ ऋपति ॥ आनर्च ॥ जुषी प्रीतिसेवनयोः ॥ आ

त्मनेपदिनश्चत्वारः ~ जुषते ॥ ओविजी भयचलनयोः ॥ प्रायेणायमुत्पूर्वः ॥ उद्विजते ॥ विजइट् ॥ विजः परइडादिप्रत्ययो ङिद्वत्स्यात् ॥ उद्विजि

ता ॥ उद्विजिष्यते ॥ ओलजी ओलस्जी व्रीडने ॥ लजते ॥ लेजे ॥ लज्जते ॥ लल्लज्जे ॥ ॥ अथ परस्मैपदिनः ॥ ॥ ओव्रश्चू छेदने ॥ वृश्चति ॥

वव्रश्चतुः ॥ वव्रश्चिथ ॥ वव्रष्ठ ॥ लिड्ड्यभ्यासस्येति संप्रसारणं रेफस्य ऋकारः ॥ उरत् ॥ तस्याः परस्मिन्निति स्थानिवद्भावान्नसंप्रसारणादु

त्तिवस्योत्वं न ॥ व्रश्चिता ॥ व्रष्टा ॥ व्रश्चिष्यति ॥ व्रक्ष्यति ॥ वृश्च्यात् ॥ अव्रश्चीत् ॥ अव्राक्षीत् ॥ व्यच व्याजीकरणे ॥ विचति ॥ विव्याच ॥ विविचतुः ॥ व्यचि

ता ॥ व्यचिष्यति ॥ विच्यात् ॥ अव्याचीत् ॥ अव्यचीत् ॥ व्यचेः कुटादित्वमनसीति तु नेह प्रवर्तते ॥ अनसीति पर्युदासेन कृन्मात्रविषयत्वात् ॥

उछि उंछे ॥ उंछति ॥ उछी विवासे ॥ उछति ॥ ऋछ गतीन्द्रियप्रलयमूर्तिभावेषु ॥ ऋछत्यृतामिति गुणः ॥ द्विहल्ग्रहणस्यानेकहलुपल

५० क्षणत्वान्नुट् ॥ आनर्छ ॥ आनर्छतुः ॥ ऋच्छिता ॥ मिच्छ उत्क्लेशे ॥ उत्क्लेशः पीडा ॥ मिमिच्छ ॥ अमिच्छीत् ॥ उज्झ उत्सर्गे ॥ सर्वपरिसमाप्यममर्षेन

यो ॥ वेपसंवरणे ॥ वाबाव ॥ ऋच्छस्कतो ॥ आनर्च ॥ उज्झ आर्जवे ॥ उज्झ उत्सर्गे ॥ लुभ विमोहने ॥ विमोहनमाकुलीकरणं ॥ लुभति ॥ लोभि

ता ॥ लोब्धा ॥ लोभिष्यति ॥ रिफ कत्थन युद्ध[illegible]निंदाहिंसादानेषु ॥ रिफति ॥ रिरेफ ॥ रिह स्येके ॥ शिक्षुनविग्राम ति सी रिहंति ॥ तृप तृम्फ तृप्तौ ॥ आ

द्यः प्रथमांतः ॥ द्वितीयो द्वितीयांतः ॥ द्वावपि द्वितीयांतावित्यन्ये ॥ तृपति ॥ ततर्प ॥ तर्पिता ॥ स्पृशम्शेतिसिज्विकल्पः ॥ प्रोषादिकस्येवअडःपा

हत्वात् ॥ तेनात्रनित्यं सिच् ॥ अतृपीत् ॥ तृम्फति ॥ शास्यडित्वादनिदितामिति नलोपे ॥ शेतृम्फादीनां नुम्वाच्यः ॥ आदिशब्दः प्रकारे ॥ तेन

द्वितीयोद्वितीयांतइति ये नकारानुषक्तास्ते तृम्फादयः ॥ तृम्फति ॥ ततृम्फ ॥ तृफ्यात् ॥ लुप लुम्प लुफ लुम्फ हिंसायां ॥ लुपति ॥ लुम्पति ॥ लुफति ॥ लुम्फति ॥ दृप दृम्फ उत्क्ले अं फति १

शे ॥ प्रथमः प्रथमांतः ॥ द्वितीयांत इत्येके ॥ दृपति ॥ दृफति ॥ दृम्फति ॥ ऋफ ऋम्फ हिंसायां ॥ ऋफति ॥ आनर्फ ॥ ऋम्फति ॥ ऋम्फ गकारात् गुफ गुम्फ ग्रं

थे ॥ गुफति ॥ जुगोफ ॥ गुम्फति ॥ जुगुम्फ ॥ उभ उम्भ पूरणे ॥ उभति ॥ उवोभ ॥ उम्भति ॥ उम्भांचकार ॥ शुभ शुम्भ शोभार्थे ॥ शुभति ॥ शुम्भति ॥ दृभी ग्रंथे ॥ दृभ

ति ॥ चृती हिंसाग्रंथनयोः ॥ चर्तिता ॥ सेसिचीति वेट् ॥ चर्तिष्यति ॥ चर्त्स्यति ॥ अचर्तीत् ॥ विध विधाने ॥ विधति ॥ वेधिता ॥ जुड गतौ ॥ तवर्गपंचमो

तमेके ॥ जुडति ॥ सने स्पष्टं मरुतो जुनंति ॥ मृड सुखने ॥ मृडति ॥ मर्डिता ॥ पृड च ॥ पृडति ॥ पृण प्रीणने ॥ पृणति ॥ पपर्ण ॥ तृण च ॥ तृणति ॥ मृण

हिंसायां ॥ मृणति ॥ तुण कौटिल्ये ॥ तुतोण ॥ पुण कर्मणि शुभे ॥ पुणति ॥ मुण प्रतिज्ञाने ॥ कुण शब्दोपकरणयोः ॥ शुन गतौ ॥ द्रुण हिंसागति

कौटिल्येषु ॥ घुण घूर्ण भ्रमणे ॥ षुर ऐश्वर्यदीप्त्योः ॥ सुरति ॥ सुषोर ॥ आशिषिसूर्यात् ॥ कुर शब्दे ॥ कुरति ॥ कूर्यात् ॥ अत्र न भकुर्छुरामिति

निषेधोन ॥ कुरोपं व व ज्ञाग्रहणादित्याहुः ॥ खुर छेदने ॥ मुर संवेष्टने ॥ क्षुर विलेखने ॥ घुर भीमार्थशब्दयोः ॥ पुर अग्रगमने ॥ वृहृ उद्य

॥कौ० उ०॥ यो मने॥ दं॥ ध्या आदिः॥ पव गत्यादिरित्यन्ये॥ तृहू स्तृहू तृंहू हिंसार्थाः॥ तृहति॥ ततर्ह॥ स्तृहति॥ तस्तर्ह॥ तर्हिता॥ तर्ढा॥ स्तर्हिता॥ स्तर्ढा॥ अतर्हीत्॥ अतार्- ति० सुम
क्षीत्॥ अनार्ढा॥ इषु इच्छायां॥ इषुगमीति छः॥ इच्छति॥ एषिता॥ एष्टा॥ एषिष्यति॥ इष्यात्॥ ऐषीत्॥ मिष स्पर्द्धायां॥ मिषति॥ मेषिता॥ किल श्वैत्य
॥४४॥ क्रीडनयोः॥ तिल स्नेहने॥ चिल वसने॥ चल विलसने॥ इल स्वप्नक्षेपणयोः॥ विल संवरणे॥ दंतोष्ठ्यादिः॥ बिल भेदने॥ ओष्ठ्यादिः॥ णिल गहने॥ हि-
ल भावकरणे॥ शिल षिल उंछे॥ मिल श्लेषणे॥ लिख अक्षरविन्यासे॥ लिलेख॥ कुट कौटिल्ये॥ गाङ्कुटादिभ्य इति ङित्वं॥ चुकुटिथ॥ चुकोट॥ चु-
कुट॥ कुटिता॥ पुट संश्लेषणे॥ कुच संकोचने॥ गुज शब्दे॥ गुड रक्षायां॥ डिप क्षेपे॥ छुर छेदने॥ नाभ्यकुर्छुरमिति न दीर्घः॥ छुर्यात्॥ स्फुट विकसने॥ स्फुटति॥
पुस्फोट॥ मुट आक्षेपमर्द्दनयोः॥ त्रुट छेदने॥ वा भ्राशेति श्यन्वा॥ त्रुट्यति॥ त्रुटति॥ तुत्रोट॥ त्रुटिता॥ तुट कलहकर्मणि॥ तुटति॥ तुतोट॥ तुटिता॥ चुट छु-
ट छेदने॥ छुड बंधने॥ कड मदे॥ कुठ संश्लेषणे॥ कुड घनत्वे॥ घनत्वं सांद्रता॥ चकुडे॥ कुडिता॥ कुड बाल्ये॥ पुड उत्सर्गे॥ घुट प्रतिघाते॥ तुड तोडने॥ तो-
डनं भेदः॥ थुड स्थुड संवरणे॥ थुडति॥ तुथोड॥ पुस्फोड॥ खुड छुड इत्येके॥ स्फुर स्फुल संचलने॥ स्फुर स्फुरणे॥ स्फुल संचलन इत्येके॥ स्फुरति स्फुल-
ति॥ निर्निविभ्यः॥ षत्वं वा स्यात्॥ निःष्फुरति॥ निःस्फुरति॥ स्फुरत्यस्य कारोपधं के विस्फुरन्ति॥ पस्फार॥ स्फुड चुड ब्रुड संवरणे॥ कुड मज्ज निमज्जन इ-
त्येके॥ गु॥ रीउ उद्यमने॥ अनुदात्तः॥ गुरते॥ जुगुरे॥ गुरिता॥ णू स्तवने॥ दीर्घांतः॥ परिणूतगुणोदयः॥ ॥ इत्यथ कुटादयः परस्मैपदिनः॥ नुवति॥ अनुवी- ॥४४॥
त्॥ धू विधूनने॥ धुवति॥ गु पुरीषोत्सर्गे॥ गुवति॥ जुगुव॥ गुता॥ गुष्यति॥ अगुषीत्॥ कु स्वादंगात्॥ अगुतां॥ अगुषुः॥ ध्रु गतिस्थैर्ययोः॥ ध्रुवइ

तिपाठांतरं॥ आद्यस्य ध्रुवतीत्यादि॥ गुवतिवत्॥ द्वितीयस्य सेट्॥ उध्रुविथ॥ ध्रुविता॥ ध्रुविष्यति॥ ध्रुव्यात्॥ अध्रुवीत्॥ अध्रुविष्टां॥ कूङ् शब्दे॥ दीर्घांत इति के-
यटाद्यः॥ कुविता॥ अकुविष्ट॥ ऊदंत इति न्यासकारः॥ कूता॥ अकूत॥ ॥ कुटादयो वृत्ताः॥ पृङ् व्यायामे॥ प्रायेणायं व्याङ्पूर्वः॥ मृङ्॥ व्या-
प्रियते॥ व्यापप्रे॥ व्यापर्त्ता॥ व्यापृषिष्ट॥ व्यापरिष्यते॥ व्यापृत॥ व्यापृषातां॥ मृङ् प्राणत्यागे॥ म्रियतेर्लुङ्लिङोश्च॥ लुङ्लिङोः शित्प्रकृतिस्तान्य-
त्र॥ स्तङ् नान्यत्र॥ रिङ्॥ लसार्वधातुके॥ म्रियते॥ ममार॥ ममर्थ॥ मम्रिव॥ मर्तासि॥ मरिष्यति॥ मृषीष्ट॥ अमृत॥ ॥ अथ परस्मैपदिनः सप्त॥ रि पि गतौ॥ अंत
रंगत्वादियङ्॥ रियति॥ पियति॥ रेता॥ पेता॥ धि धारणे॥ क्षि निवासगत्योः॥ षू प्रेरणे॥ सुवति॥ सविता॥ कॄ विक्षेपे॥ किरति॥ किरतः॥ ऋकारः॥ ऋकारतुः॥ करि-
ता॥ करीता॥ कीर्यात्॥ अकारीत्॥ किरतौ लवने॥ उपात्किरतेः सुडागमः स्याच्छेदे॥ उपस्किरति॥ अडभ्यासव्यवायेपि सुट्कात्पूर्व इति वक्तव्यं॥ उपस्किरत्॥
उप इति स्कारः॥ हिंसायां प्रतेश्च॥ उपात्प्रतेश्च किरतेः सुट् स्याद्धिंसायां॥ उपस्किरति॥ प्रतिस्किरति॥ गॄ निगरणे॥ अचि विभाषा॥ गिरते रेफस्य लत्वं
स्यादजादौ॥ गिरति॥ गिलति॥ जगार॥ जगाल॥ जगरिथ॥ जगलिथ॥ गरिता॥ गरीता॥ गलिता॥ गलीता॥ दृङ् आदरे॥ आद्रियते॥ आद्रियेत॥
आदद्रे॥ आदद्रिषे॥ आदर्त्ता॥ आदरिष्यते॥ आदृषीष्ट॥ आदृत॥ आदृषातां॥ धृङ् अवस्थाने॥ ध्रियते॥ ॥ अथ परस्मैपदिनः षोडश॥
प्रछ ज्ञीप्सायां॥ पृच्छति॥ पप्रच्छ॥ पप्रच्छतुः॥ पप्रच्छिथ॥ पप्रष्ठ॥ प्रष्टा॥ प्रक्ष्यति॥ अप्राक्षीत्॥ वृत्त॥ किरादयो वृत्ताः॥ ॥ सृज विसर्गे॥
विभाषा सृजिदृशोः॥ ससर्जिथ॥ ससष्ठ॥ स्रष्टा॥ स्रक्ष्यति॥ सृजिदृशोर्झल्यमकिति॥ अमागमः॥ सृज्यात्॥ अस्राक्षीत्॥
टुमस्जो शुद्धौ॥ मस्जति॥ ममज्ज॥ मस्जिनशोर्झलि॥ नुम्॥ मस्जेरन्त्यात्पूर्वो नुम्वाच्यः॥ संयोगादिलोपः॥ ममङ्क्थ॥ ममज्जिथ॥

॥सि० ३५॥ मृडः। मर्डिष्यति। अमार्डीत्। अमार्क्षीत्। अमार्क्षुः॥ रुजो भंगे। रोक्ता। रोक्ष्यति। अरौक्षीत्। अरौक्तां। भुजः कौटिल्ये। रुजिवत्। छुप स्पर्शे। ति० सु०
॥४२॥ छोप्ता। अछौप्सीत्। रुश रिश हिंसायां। नाल्यां तो। रोष्टा। रोक्ष्यति। रेष्टा। रेक्ष्यति। लिश गतौ। अलिक्षत्। स्पृश संस्पर्शने। स्प्रष्टा। स्पर्ष्टा। स्प्रक्ष्य
ति। स्पर्क्ष्यति। अस्प्राक्षीत्। अस्पार्क्षीत्। अस्पृक्षत्। विछ गतौ। गुपूधूपेत्यायः। आर्धधातुके वा। विछायति। विछायांचकार। विविछ। विश प्रवे
शने। विशति। वेष्टा। मृश आमर्शने। आमर्शनं स्पर्शः। अम्राक्षीत्। अमार्क्षीत्। अमृक्षत्। णुद प्रेरणे। कर्त्रभिप्राये क्रियाफले परस्मैपदार्थं पुनःपा
आछीनद्रो० ठः। षद्लृ विशरणगत्यवसादनेषु। सीदति इत्यादि। भ्वादिकवत्। इह पाठस्तु मुम्विकल्पार्थः। सीदति। सीदंती। नकारोपपाठस्तु प्रयोजनार्थः। सादः। म्रश अलितिकर्स ४
थेश्च। शद्लृ शातने। शस्तु शातने। शद्लृ शातने। स्वरार्थ एव पुनःपाठः। शतानुनास्ति। शदेः शित आत्मनेपदं॥ ॥ अथ षट् स्वरितेतः॥
क्रियाफले० मिल संगमे। मिल संश्लेषणे इति पठितस्य पुनःपाठः। कर्त्रभिप्रायेऽर्थः। मिलति। मिलते। मिमेल। मिमिले। मुच्लृ मोक्षणे। शे मुचादी
नां नुम् स्यात्। मुंचति। मुंचते। मोक्ता। मुच्यात्। मुक्षीष्ट। अमुचत्। अमुक्त। अमुक्षातां। लुप्लृ छेदने। लुंपति। लुंपते। अलुपत्। अलुप्त।
विद्लृ लाभे। विंदति। विंदते। विवेद। विविदे। व्याघ्रभूत्यादिमते सेट्कोऽयं। वेदिता। भाष्यादिमतेऽनिट्कः। वेत्ता। परिवेदने। अयं परिस्यजप्रदारानग्नी
ष्वलब्धवान् निस्पृष्टः। त्यक्त्वा। लिप उपदेहे। उपदेहो वृद्धिः। लिंपति। लिंपते। लेप्ता। लिपिसिचिह्वश्च। अलिपत्। अलिपत। अलि ॥४२॥
प्त। षिच क्षरणे। सिंचति। सिंचते। असिचत्। असिचत। असिक्त। अभिषिंचति। अभ्यषिंचत्। अभिषिषेच॥ ॥ अथ त्रयः परस्मैपदिनः॥

आत्मनेपदेष्वन्य०२

कृती छेदने। कृंतति। चकर्त। कर्तिता। कर्तिष्यति। कर्त्स्यति। अकर्तीत्। खिद परिघाते। खिंदति। चिखेद। खेत्ता। अयं दैन्ये दिवादौ रुधादौ च। पिश अ
वयवे। पिंशति। पेशिता। अयं दीपनायामपि। त्वष्टा रूपाणि पिंशतु। उक्तसुनादयः॥ ॥ तुदादयस्समाप्ताः॥ ॥ रुधिर् आवरणे। अनस्वरितेत इरि
तश्च। रुधादिभ्यः श्नम्। शपोऽपवादः। मिदचोऽन्त्यात्परः। णित्वादगुणं बाधते। रुणद्धि। श्नसोरल्लोपः। णत्वस्यासिद्धत्वादनुस्वारः। परसवर्णः।
तस्यापि सिद्धत्वान्न। नपदांतस्येति णत्वानुस्वारपरसवर्णयोर्लोपो न स्थानिवत्। रुंधः। रुंधंति। रुन्धो। रोद्धा। रोत्स्यति। रोत्स्यते। रुणद्धु।
ह्रौ निर्वा४ रुंधात्। रुंद्धि। रुणधानि। रुणधाव। अरुणत्। अरुंधां। अरुणत्। अरुणः। अरुणधं। अरुधत्। अरौत्सीत्। अरुद्ध। भिदिर् विदारणे। भिनत्ति। छिदुभिदेत्रिणुका निषेधः
भिन्त्तः। भेत्ता। भेत्स्यति। अभिनत्। अभिनः। अभिनदं। अभिनत्। अभिदत्। अभैत्सीत्। अभित्त। छिदिर् द्वैधीकरणे। अछिदत्। अछैत्सीत्। अछित्त।
रिचिर् विरेचने। रिणक्ति। रेक्ता। अरिचत्। अरिचत। अरैक्षीत्। अरिक्त। विचिर् पृथग्भावे। विनक्ति। विङ्क्ते। क्षुदिर् संपेषणे।
क्षुणत्ति। क्षुन्ते। क्षोत्ता। अक्षुदत्। अक्षौत्सीत्। अक्षुत्त। युजिर् योगे। योक्ता। उच्छृदिर् दीप्तिदेवनयोः। छृणत्ति। छृन्ते। छर्द। सेसिचीति वा। नच्छृदिषं
वच्छृत्सं। छर्दिता। छर्दिष्यति। छर्त्स्यति। अछृदत्। अछर्दीत्। अछर्दिष्ट। उतृदिर् हिंसानादरयोः। तृणत्ति इत्यादि। छृणत्तिवत्। हलीच्छन्। परस्मैप ती०
दी। तृणत्ति। आर्धधातुके नेटि ऋदिकवत्। अतृंधीदृत्तिमा। तस्य आत्मनेपदिनः॥ ॥ श्नान्नलोपः। श्नमः परस्य नस्य लोपः स्यात्। श्नसोरल्लोपः। इंधे। इन्धाते। ५०२१
इंधिता। इनधे। इन्ध्ये। इन्धात्। समिंधे। ॥ विंदे। खिन्ते। विन्ते। निगरणे। निन्ते। नात्। अथ परस्मैपदिनः॥ ॥ शिष्लृ विशेषणे। शिनष्टि। शिंष्टः। शिंषंति।

॥ सि॰ कु॰ ॥ शिशेषिथ ॥ शेष्टा ॥ शेक्ष्यति ॥ शिंष्टि ॥ शिंष्टः ॥ शिंषन्ति ॥ शिनक्षि ॥ शिंष्ठः ॥ शिंष्ठ ॥ शिनष्मि ॥ शिंष्वः ॥ शिंष्मः ॥ शिंड्ढि ॥ शिनषाणि ॥ अशिनट् ॥ अशिषत् ॥ अ ति॰ रुधा॰

॥ ५३ ॥ शिषत् ॥ पिष्लृ संचूर्णने ॥ पिनष्टि ॥ पिनष्टि ॥ भंजो आमर्दने ॥ भनक्ति ॥ बभंजिथ ॥ बभंक्थ ॥ भंक्ता ॥ भुज पालनाभ्यवहारयोः ॥ भुनक्ति ॥ भोक्ता ॥ भोक्ष्यति ॥ अ

भुनक् ॥ तृह हिंसि हिंसायां ॥ तृणह इम् ॥ तृहः श्नमिकृते इमागमः स्याद्धलादौ पिति ॥ तृणेढि ॥ तृण्ढः ॥ ततर्ह ॥ तर्हिता ॥ अतृणेट् ॥ हिनस्ति ॥ जिहिंस

हिंसिता ॥ उंदी क्लेदने ॥ उनत्ति ॥ उन्त्तः ॥ उन्दन्ति ॥ उंदां चकार ॥ औनत् ॥ औन्तां ॥ औन्दन् ॥ औनः ॥ औनत् ॥ औनदं ॥ अंजू व्यक्तिम्रक्षणकांतिगतिषु ॥ अन

क्ति ॥ अङ्क्तः ॥ अंजंति ॥ आनंज ॥ आनंजिथ ॥ आनंक्थ ॥ अंक्ता ॥ अंजिता ॥ अङ्ग्धि ॥ अनजानि ॥ आनक् ॥ आंक्षीत् ॥ आंजीत् ॥ तंचू संकोचने ॥ तनक्ति ॥ तंक्ता ॥ तंचिता ॥ ओविजी भयचलनयोः ॥ विनक्ति ॥ विङ्क्तः ॥ विजेर्ड इडिति ङित्त्वं ॥ विविजिथ ॥ विजिता ॥ अविनक् ॥

अविजीत् ॥ वृजी वर्जने ॥ वृणक्ति ॥ वर्जिता ॥ पृची संपर्के ॥ पृणक्ति ॥ पपर्च ॥ ॥ इति रुधादयः ॥ ॥ ॥ अथ तनादयः ॥ तनु विस्तारे ॥ तनादिकृञ्भ्य उः ॥ तनोति ॥ तनुतः ॥ तन्वन्ति ॥ तनुते ॥ ततान ॥ तेने ॥ तनिता ॥ अतनीत् ॥ अतानीत् ॥ तनादिभ्यस्तथासोः ॥ तनादेः सिचो वा लुक् स्यात्तथासोः ॥ यासा सार

वर्णादिकमवचनं तशब्दाग्रहणेन ॥ तनेरपि ॥ यूयमतनिष्ट ॥ अतत ॥ अतनिष्ट ॥ अनुदात्तोपदेशेत्यनुनासिकलोपः ॥ तङि ॥ अतत ॥ अतनिष्ट ॥ अतथाः ॥ अतनिष्ठाः ॥

षणु दाने ॥ सनोति ॥ सनुते ॥ ये विभाषा ॥ सायात् ॥ सन्यात् ॥ जनसनखनां सञ्झलोः ॥ असात ॥ असनिष्ट ॥ असाथाः ॥ असनिष्ठाः ॥ क्षणु हिंसायां ॥ क्षणोति ॥ ॥ ५३ ॥

क्षणुते ॥ ह्म्यन्तेति न वृद्धिः ॥ अक्षणीत् ॥ अक्षत ॥ अक्षणिष्ट ॥ अक्षथाः ॥ अक्षणिष्ठाः ॥ क्षिणु च ॥ उप्रत्ययनिमित्तो लघूपधगुणः संज्ञापूर्वकविधेर

नित्यत्वादित्यन्ये ॥ क्षेत्यादय ॥ भवत्येवेत्यन्ये ॥ क्षिणोति ॥ क्षेणोति ॥ क्षिणोषि ॥ क्षेणोषि ॥ अक्षणीत् ॥ अक्षेणीत् ॥ अक्षणिष्ट ॥ ऋणु गतौ ॥ ऋणोति ॥ अ

र्णोति ॥ अर्णुते ॥ अर्णवीति ॥ आनर्ण ॥ आनृणे ॥ अर्णितासि ॥ आर्णत ॥ आर्त ॥ आर्णिष्ठ ॥ आर्थाः ॥ आर्णिष्ठाः ॥ तृणु अदने ॥ तृणोति ॥ तर्णोति ॥ तृणुते ॥

घृणु दीप्तौ ॥ जघर्ण ॥ जघृणे ॥ अथ द्वावनुदात्तेतौ ॥ वनु याचने ॥ वनुते ॥ ववने ॥ नायं मतेः परस्मैपदी ॥ वनोति ॥ ववान ॥ मनु अवबोधने ॥ मनुते ॥ मेने ॥ डु

कृञ् करणे ॥ करोति ॥ अत उत्सार्वधातुके ॥ कुरुतः ॥ न भकुर्छुरामिति न दीर्घः ॥ कुर्वन्ति ॥ नित्यं करोतेः ॥ करोतेः प्रत्ययोकारस्य नित्यं लोपः स्याद्वमोः

परयोः ॥ कुर्वः ॥ कुर्मः ॥ चकर्थ ॥ चकृव ॥ कर्ता ॥ करिष्यति ॥ करोतु ॥ कुरु ॥ ये च ॥ कृञ उलोपः स्याद्यादौ प्रत्यये परे ॥ कुर्यात् ॥ आशिषि क्रियात् ॥ कृषीष्ट ॥ अकार्षीत् ॥ अकृत ॥ अकृथाः ॥ संपरिभ्यां करोतौ भूषणे ॥ समवाये च ॥ संपरिपूर्वस्य करोतेः सुट् स्याद्भूषणे सं

घाते चार्थे ॥ संस्करोति ॥ अलंकरोतीत्यर्थः ॥ संस्कुर्वन्ति ॥ संघीभवंतीत्यर्थः ॥ संपूर्वस्य क्वचिदभूषणेपि सुट् ॥ संस्कृतं भक्षा इति ज्ञापकात् ॥ सुट्कात्पूर्व इति वक्तव्यम् ॥ अडभ्यासव्यवायेपि ॥ संस्करोति ॥

परिष्करोति ॥ सिवादीनां वाड्व्यवायेपि ॥ पर्यष्कार्षीत् ॥ पर्यस्कार्षीत् ॥ उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु ॥ उपात्कृञः सुट् स्यादेष्वर्थेषु ॥ गुणाधानमुपस्कारः ॥ २४

प्रतियत्नो गुणाधानं ॥ विकृतमेव वैकृतं विकारः ॥ वाक्याध्याहारः आकांक्षितैकदेशपूरणं ॥ उपस्कृता कन्या ॥ अलंकृतेत्यर्थः ॥ उपस्कृता ब्राह्मणाः

समुदिता इत्यर्थः ॥ एधोदकस्योपस्कुरुते ॥ गुणाधानं करोतीत्यर्थः ॥ उपस्कृतं भुंक्ते ॥ विकृतमित्यर्थः ॥ उपस्कृतं ब्रूते ॥ वाक्याध्याहारेण ब्रूत इत्यर्थः ॥ सु

ट्कात्पूर्वः ॥ अडभ्यासव्यवायेपि ॥ सुट्कात्पूर्व इत्यादिभाष्यप्रत्याख्यातं ॥ तथाहि ॥ पूर्वं धातुरुपसर्गेण युज्यते ॥ अंतरंगत्वात्सुट् ॥ ततो सि॰ कौ॰

॥ सि०कौ० ॥ द्विर्लं ॥ एवं च सतश्च संयोगादेर्गुणः ॥ संस्करतुः ॥ ऋ[illegible] नोभार इत्यादि उः स्यातिमतेन [illegible] पुर उ लिन्त्र्यां ॥ आनसमसृड्ढासरस्येटः संस्क्रिय रि० नेना०
॥४४॥ संस्करिय ॥ गुणात्तिसत्त्वेन नित्यं छन्दसी निसर्गान्नित्यमित्यनुवर्तते ॥ निसंयः संयोगादिस्तस्यर्त्यां गुणोन ॥ संस्क्रियात् ॥ [illegible] संयता
दृशिनिलिङ्‌सिचोर्नेट् ॥ एकाच उपदेश इतिसूत्रा उपदेशात् संयोगादिमिति व्याख्यानात् ॥ संस्कृषीष्ट ॥ समस्कृत ॥ समस्कृषाताम् ॥ ॥ इति तनादयः
॥ ॥ ॥ डुक्रीञ् द्रव्यविनिमये ॥ क्र्यादिभ्यः श्ना ॥ क्रीणाति ॥ ई हल्यघोः ॥ क्रीणीतः ॥ ई लापूर्वे असरनोद्दशः परलान्त्र्यस्य [illegible] एवं श्र
स्याद्भवः ॥ ततः श्नाभ्यस्तयोरिसालोपः ॥ क्रीणन्ति ॥ क्रीणीते ॥ क्रीणाते ॥ क्रीणते ॥ चिक्राय ॥ चिक्रियतुः ॥ चिक्रयिथ ॥ चिक्रेथ ॥ चिक्रियिव ॥ चिक्रियिव
चिक्रियिषे ॥ क्रेता ॥ क्रेष्यति ॥ क्रीयात् ॥ क्रेषीष्ट ॥ अक्रैषीत् ॥ अक्रेष्ट ॥ प्रीञ् तर्पणे कान्तौ च ॥ कान्तिः कामना ॥ प्रीणाति ॥ प्रीणीते ॥ श्रीञ् पाके ॥ मीञ् हिंसायाम् ॥ हिनु क्रीणादि
मीनातेर्निगमे ॥ मीनाति मिनोतीत्येत्विषये आत्वं ममौ ॥ मिम्यतुः ॥ ममिथ ममाथ ॥ मिम्ये ॥ माता ॥ मास्यति ॥ मीयात् ॥ मासीष्ट ॥ अमा
सीत् ॥ अमासिष्टाम् ॥ अमास्त ॥ षिञ् बन्धने ॥ सिनाति ॥ सिनीते ॥ सिषाय ॥ सिष्ये ॥ सेता ॥ स्कुञ् आप्रवणे ॥ स्तन्भुस्तुन्भुस्कन्भुस्कुन्भुस्कुभ्यः श्नुश्च ॥
चात् श्ना ॥ स्कुनोति ॥ स्कुनुते ॥ स्कुनाति ॥ स्कुनीते ॥ चुस्काव ॥ चुस्कुवे ॥ स्कोता ॥ अस्कौषीत् ॥ अस्कोष्ट ॥ स्तन्भ्वादयश्चत्वारः सौत्राः सर्वे रोध ॥ ४४ ॥
नार्था इत्येके ॥ माधवस्तु प्रथमतृतीयौ स्तम्भार्थौ ॥ द्वितीयो निष्कोषणार्थः ॥ चतुर्थो धारणार्थ इत्याह ॥ सर्वे परस्मैपदिनः ॥ नलोपः ॥ विष्टभ्नाति
विष्टभ्नाति ॥ अवष्टभ्नोति ॥ अवष्टभ्नाति ॥ अवतष्टम्भ ॥ स्तन्भेश्चिरङ्‌ वा ॥ व्यष्टभत् ॥ व्यष्टम्भीत् ॥ स्कुभ्नोति ॥ स्कुभ्नाति ॥ [illegible] निर्दिश्यानां तः परस्य

स्कभ्नोतेः सम्पदः स्यात् ॥ विष्कभ्नोति ॥ विष्कभ्नाति ॥ स्कुभ्नोति ॥ स्कुभ्नाति ॥ हलः श्नः शानज्झौ ॥ हलः परस्य श्नः शानजादेशः स्याद्धौ परे ॥ स्तभान ॥ स्तुभान ॥ स्कभान
न ॥ स्कुभान ॥ रोहस्तभ्नुहीत्यादि ॥ युञ् बन्धने ॥ युनाति ॥ युनीते ॥ योता ॥ क्नूञ् शब्दे ॥ क्नूनाति ॥ क्नूनीते ॥ क्नविता ॥ द्रूञ् हिंसायाम् ॥ द्रूणाति ॥ द्रूणीते ॥ पूञ् पवने ॥ प्वादीनां ह्रस्वः ह्रस्व नामिगुण
स्वः शितिपरे ॥ पुनाति ॥ पुनीते ॥ पविता ॥ लूञ् छेदने ॥ लुनाति ॥ लुनीते ॥ स्तॄञ् आच्छादने ॥ स्तृणाति ॥ स्तृणीते ॥ शर्पूर्वाः खयः ॥ तस्तार ॥ तस्तरतुः ॥ स्तरिता ॥ स्तरीता ॥ स्त
रीता ॥ स्तृणीयात् ॥ आशिषि ॥ स्तीर्यात् ॥ लिङ्‌सिचोरात्मनेपदेषु ॥ न लिङि ॥ वृत इटो लिङि दीर्घो न स्यात् ॥ स्तरिषीष्ट ॥ उश्चेति कित्त्वम् ॥ स्तीर्षीष्ट ॥ सिचि च परस्मै
पदेषु नेति न दीर्घः ॥ अस्तारीत् ॥ अस्तारिष्टाम् ॥ अस्तरिष्ट ॥ अस्तरीष्ट ॥ अस्तीर्ष्ट ॥ कॄञ् हिंसायाम् ॥ कृणाति ॥ कृणीते ॥ चकार ॥ चकरे ॥ वृञ् वरणे ॥ वृणाति ॥ वृ
णीते ॥ ववार ॥ ववरे ॥ वरिता ॥ वरीता ॥ आशिषि उदोष्ठ्यपूर्वस्य ॥ वूर्यात् ॥ वरिषीष्ट ॥ वूर्षीष्ट ॥ अवारीत् ॥ अवारिष्टाम् ॥ अवरिष्ट ॥ अवरीष्ट ॥ अवूर्ष्ट ॥ धूञ् कम्पने ॥ धु
नाति ॥ धुनीते ॥ दुधविथ ॥ दुधोथ ॥ दुधुविव ॥ धोता ॥ धविता ॥ स्तुसुधूञ्भ्यः परस्मैपदेषु इट् ॥ अधावीत् ॥ अधविष्ट ॥ अधोष्ट ॥ ॥ अथ च भाष्येषः परस्मैपदिनः ॥ ॥ शॄ हिंसा
याम् ॥ शॄदॄप्रां ह्रस्वो वा लिटि ॥ एषां किति लिटि ह्रस्वो वा स्यात् ॥ अन्यदा ऋच्छत्यॄतामिति गुणः ॥ शश्रतुः ॥ शशरतुः ॥ अपृक्तः किति लिनिषेधस्य क्रादिनियमेन बाधः ॥ शशरिथ ॥ शश्रि
व ॥ शरिता ॥ शरीता ॥ शृणीहि ॥ शीर्यात् ॥ अशारीत् ॥ अशारिष्टाम् ॥ पॄ पालनपूरणयोः ॥ पप्रतुः ॥ पपरतुः ॥ आशिषि पूर्यात् ॥ वॄ वरणे ॥ वरणं तु स्वीकरणम् ॥ भरणेत्येके ॥
मॄ हिंसायाम् ॥ मृणाति ॥ ममार ॥ दॄ विदारणे ॥ ददार ॥ दद्रतुः ॥ ददरतुः ॥ ॥ दयतेर्दिगि लिटि ॥ इति न ॥ दद्रतुः ॥ ददरतुः ॥ जॄ वयोहानौ ॥ जॄ इत्येके ॥ जृणाति ॥ नॄ नये ॥ कॄ हिंसायाम् ॥ ॥ १०॥ कृणाति ॥ अरां
चकार ॥ अरिता ॥ अरीता ॥ आर्णीत ॥ आर्णात ॥ ईर्यात ॥ आरीत् ॥ आरिष्टाम् ॥ ज्या वयोहानौ ॥ ग्रहिज्या ॥ हलः ॥ अङ्गावयवात् हलः परं यत्संप्रसारणं तद

॥सि॰कौ॰॥ ईतां गस्य दीर्घः स्यात् । इति दीर्घे कृते । वादी नां कुरवः । डिनाति । डिन्यो । डिन्युः । शीगति रेषण्योः । रेषणं रुकशब्दः । श्रीणुपणे । विमाधालीयते । टि॰ क्या॰

॥४५॥ ग्निवो ज्विषय आत्वं वा । लुलो । लिलाय । लाता । लेता । श्रीञ्वरणे । श्रिनाति । श्रीगतौ । भृत । भाद्यो रुताः । श्रादयोपीयते । श्री वरणे । नीयते । मर धरणे॰२

उत्थेन । सीषु हिंसायां । रुवां वया पां कुरवः । केंचित्स्वेन तुन । आ अवबाधने । अन्नो नादी । रुनाति । दी घोनदे शमत्मर्थ्या न कसः । बंध बंध

ने । बधाति । बबंधिथ । बबंध । बंधारा । भन्त्स्यति । बधान । अभान्त्सीत् । पूर्वत्रासिद्धमिति भष्भावा । पूर्वं झलि सि लोपः । प्रत्ययलक्षणेन मादिश

त्ययमाश्रित्य भष्भावे न प्रत्यय उसणं प्रतीति सि लोपस्यासिद्धत्वात् । अभा द्धां । अभान्त्सुः । वृङ् संभक्तौ । वृणीत । ववृषे । ववृषे । वरिता । वरी

ता । अवरिष्ट । अवरीष्ट । अवृत । श्रंथ विमोचन प्रतिहर्षयोः । इतः परस्मैपदिनः । श्रथ्नाति । श्रंथि ग्रंथी त्यादि न्याकिल्वपक्षे । अभ्यासलोपा च

यत्र न । इतिहरदत्तादयः । श्रथतुः । श्रेथुः । इदं किं । बंपितामपीति सुधाकरमते । श्रेथिथ । अश्रिथन्निपूक्षणान्नि । आश्रथ्य । उनमत्तु । आश्रथ्य

शश्रंथ तिमाधवः । तत्र मूर्खंथ्य मंथविलोडने । श्रंथग्रंथ संदर्भे । अयं भ्रशत । अयः पुनः पाठः । रूपं तूक्तं । कुंथ संक्लेषणे । संक्लेशइत्येके । कुथ्ना

ति । चुकुंथ । कुथ्नीत । दुर्गः । चुकोथ । मृद क्षोदे । मृद्नाति । मृदान । मृड च । अयं सुखेपि । अयं सुखयितुं सुखं । मृडयति । गुधरोषे । गुध्नाति । कुपनिष्क

र्षे । कुष्णाति । कोषिता । निरः कुषः । निरः पुरा कुषो वल्यादेरार्धधातुकस्य इड्वा स्यात् । निष्कोषिता । निष्क्रोष्टा । निरकोषीत् । निरकुक्षत् । क्षुभ संचलने । ॥४५॥

क्षुभ्नाति । दिवुन । सुभ्नाति । क्षुभ्नीतः । सामिता । क्षुभाण । णभ तुभ हिंसायां । नभ्नाति । तुभ्नाति । नभते । तोभते । इति तरापिगतं । नभ्यति । तुभ्यतीति

श्वनि । क्लिशु विबाधने । शादिरिति श्नुलनिषेधः । क्लिश्नाति । क्लिशिता । क्लेष्टा । अक्लेशीत् । अक्लिक्षत् । अश भोजने । अश्नाति । आश । उध्रस उंछे । कारइत् । ध्रस्ना

ति । उकारोधात्ववयव इत्येके । उध्रसांचकार । इष आभीक्ष्ण्ये । पौनःपुन्यं भृशार्थो वा आभीक्ष्ण्यं । इष्णाति । तीषसहेत्यत्र सहिनासाहचर्याद्दकारविकरणस्यैव

इषिग्रहणमिति पक्षे नेडित्येके । इषिता । एष्टा । एषिता । विक्लप्स्यतीति । नतथा वार्तिके । उपसर्गस्याकारत्वोपधस्य चेति प

धर्मेन । विषविप्रयोगे । विष्णाति । वेष्टा । पुषपुष्टौ । स्नेहन सेचन पूरणेषु । पुष्णाति । मुष्णाति । पुपोष । पोषिता । पुपोष । पोषिता । रवरयत धातुभाव

भूतधातुस्तांश्च एति कांतालचिन्निः । स्र गति । वांतोयमित्येके । खनाउनु नाभिके । अनुषंगस्यक्लेस्य रसस्य च कमावशादुनानावादेशा स्यादुनाभिके का स्त

लोपेन क्लिति । सनाति । सनित्वा । सानतः परत्वादिह हलं तल्लासाना नशानम् । रवानीति । हलश्व । मुलत्वं । हलश्व । नाम्नि । ग्रहउपादाने । समिति । गृह्

ण्या । गृह्णाति । गृह्णीते । ग्रहोऽलिटिदीर्घः । एकाचो ग्रहेर्विहितस्येटो दीर्घः स्यान्नतु लिटि । ग्रहीता । लिटितु । ऊर्ध्वहिय । गृह्यात । श्रहीषीष्ट । ग्रहनसणंतिन

वृद्धिः । अग्रहीत् । अग्रहीष्टां । अग्रहीषुः । अग्रहीष्ट । अग्रहीषातां । अग्रहीषत ॥ ॥ ॥ इति क्र्यादयः समाप्ताः ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

चुर स्तेये । सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् । एभ्यो णिच् स्यात् । चूर्णांतेभ्यः प्रातिपदिकाद्धात्वर्थ इत्येव सि

द्धं तेषामिह ग्रहणं प्रपंचार्थं । चुरादिभ्यस्तु स्वार्थे । पुगंतलघूपधस्य गुणः । सनाद्यंता धातव इति धातुत्वं । तिप्शपादि । गुणायादेशौ । चोरयति । णिचश्च । णिजंतादा ॥५०३०

त्मनेपदं स्यात् कर्तृगामिनि क्रियाफले । चोरयते । चोरयांचकार । चोरयामास । चोरयिता । चार्यात् । निशि । चार्यात् । चोरयिषीष्ट । णिश्रीति चङ् । णौ चङीति

॥ सि०उ० ॥ ति० उ०

॥ ३४६ ॥

ह्रस्वः ॥ ह्रिलं ॥ हलादिः शेषः ॥ दीर्घोल घो रित्यभ्यासदीर्घः ॥ अन्नुवुरत ॥ अमूवुरत ॥ चिति स्मृत्यां ॥ चिंतयति ॥ अचिचिंतत ॥ चिंतेति पठित्वा इदित्करणं णि
चः पाक्षिकत्वे लिंगं ॥ तेन चिंतात् ॥ चिंत्यते इत्यादौ न लोपान् ॥ चिंतति ॥ चिंतेत् ॥ एतच्च ज्ञापकं सामान्यापेक्षमित्येके ॥ अनात्यंतिकमिदं इत्यपरे ॥ नेह जाऊगणानुः ॥ ऊ
णयुक्तिस्तुदाहृतत्वात् ॥ विशेषापेक्षमित्यपरे ॥ अत एव दृष्याद्देत्यस्य नैव्यर्थ्यं ॥ यत्रि संकोचने ॥ यंत्रयति ॥ यंत्रयते ॥ यंत्रेति पठितुं शक्यं ॥ यतीति दित्करणात्
यंत्रतीति माधवेनोक्तं नाचिंत्यं ॥ एवं कुद्रि च निमंत्रिणु ॥ स्फुडि परिहासे ॥ स्फुंडयति ॥ इदित्करणात् स्फुंडति ॥ स्फुंडीति पाठांतरे ॥ स्फुंडयति ॥ स्फुंडति ॥ लक्ष द
र्शनांकनयोः ॥ कुद्रि अनृतभाषणे ॥ कुंद्रयति ॥ लड उपसेवायां ॥ लाडयति ॥ मिदि स्नेहने ॥ मिंदयति ॥ मिंदति ॥ ओलडि उत्क्षेपणे ॥ ओलंडयति ॥ ओलंडति ॥
ओकार इत्येके ॥ लंडयति ॥ लंडति ॥ उकारादिरित्यन्ये ॥ ऊल अपवारणे ॥ लड इत्येके ॥ पीड अवगाहने ॥ पीडयति ॥ भ्राजमासमाषदीपजीवमीलपीडामन्य
तरस्यां ॥ ऋषामुपधाया ह्रस्वो वा स्यात् चङ्परे णौ ॥ अपीपिडत ॥ अपिपीडत ॥ नट अवस्यंदने ॥ अवस्यंदनं नाट्यं ॥ श्रथ प्रयत्ने ॥ प्रस्थान इत्येके ॥ बध सं
यमने ॥ बाधयति ॥ बंधेति बांधा ॥ पॄ पूरणे ॥ पारयति ॥ दीर्घोच्चारणं णिचः पाक्षिकत्वे लिंगं ॥ नदि सेवाद्वाताय ॥ एवं च पणलिपि पाठेऽस्यां परित्यादि सिद्धं ॥
वृपि ॥ परति ॥ परन इत्यादि सिद्धिः फलं ॥ ऊर्ज बलप्राणनयोः ॥ पक्ष परिग्रहे ॥ वर्ण वर्णप्रेरणे ॥ वर्षवर्णन इत्येके ॥ श्रथ प्रस्थाने ॥ श्राथयति ॥ नान्यमिलोऽनेता
लिनितस्यमाणता नास्य मितां ॥ अस्यमृदुत्वरप्रथम्रदस्तृस्पशां ॥ एषामभ्यासस्य अकारोंतादेशः स्याच्चङ्परे णौ ॥ उत्वापवादः ॥ अपप्रथत ॥ पृथ प्रक्षेप
पर्थयति ॥ उत्वत ॥ उपधाया ऋवर्णस्य स्थाने ऋ स्याद्वा चङ्परे णौ ॥ इररारामपवादः ॥ अपीपृथत ॥ अपपर्थत ॥ पथ इत्येके ॥ पाथयति ॥ षंब संबंधने ॥

धातृहिति णिजभावानीत

॥ ३४६ ॥

अर

संबयति ॥ असससंबत ॥ शंबत ॥ अशशंबत ॥ सांब इत्येके ॥ सम अहने ॥ कुट्ट छेदनभर्त्सनयोः ॥ पूरण इत्येके ॥ कुट्टयति ॥ पुट्ट चुट्ट अल्पीभावे ॥ अट्ट षुट्ट अनादरे ॥ उ
अट्टयति ॥ अयं देवपथ ॥ छुलस्यासिद्धत्वान्न न्द्राइति निषेधः ॥ आटिटत ॥ लुंट स्तेये ॥ लुंटयति ॥ लुंटती तिं लुडिस्तेय इति माधवादिकस्य ॥ शठ श्वठ संस्कार
गत्योः ॥ श्वठि इत्येके ॥ तुजि पिजि हिंसाबलादाननिकेतनेषु ॥ तुंजयति ॥ पिंजयति ॥ इदित्करणात् तुंजति ॥ पिंजति ॥ तुजपिजेति केचित् ॥ लजि लुजि इत्येके ॥ पि
स गतौ ॥ पेसयति ॥ पेसतीति शापि गतं ॥ षांत्वसामप्रयोगे ॥ श्वल्क वल्क परिभाषणे ॥ ष्णिह स्नेहने ॥ स्फिट इत्येके ॥ स्मिट अनादरे ॥ अषोपदेशत्वान्न षः ॥ ष
अमिस्मिटत ॥ ष्मिङ् अनादर इत्येके ॥ ङित्वस्यानयवऽर्थरितार्थत्वाण्णिजंता ॥ नङ् ॥ स्मापयते ॥ श्लिष श्लेषणे ॥ पथि गतौ ॥ पंथयति ॥ पंथति ॥ पिच्छ कुट्ट
ने ॥ छदि संवरणे ॥ छंदयति ॥ छंदति ॥ श्रण दाने ॥ नायं णार्यं निपूर्वः ॥ विश्राणयति ॥ तड आघाते ॥ ताडयति ॥ खड खडि कडि भेदने ॥ खाडयति ॥ खंडयति ॥ खं
डति ॥ कंडति ॥ कुडि रक्षणे ॥ गुडि वेष्टने ॥ रक्षण इत्येके ॥ कुठि इत्यन्ये ॥ अवकुंठति ॥ गुठि इत्यपरे ॥ खुडि खंडने ॥ वटि विभाजने ॥ वडि इत्येके ॥ मडि भूषायां हर्षे च ॥ भडि कल्याणे ॥ छर्द वमने ॥ पुस्त बुस्त आदरानादरयोः ॥ बुद्द संवादने ॥ न क्कध क्क नाशने ॥ णोपदेशालक्षणपर्युदासात् ॥ पञ्चनक्कयति ॥ च
क्क चुक्क व्यथने ॥ क्षल शौचकर्मणि ॥ तल प्रतिष्ठायां ॥ तुल उन्माने ॥ तोलयति ॥ अतूतुलत ॥ कथं तुलयति ॥ तुलना इत्यादि ॥ अतुलोपमाभ्यामिति नि
पातनाददंतस्य तुलाशब्दस्य सिद्धानलोपणिचि ॥ दुल उत्क्षेपे ॥ पुल महत्वे ॥ चुल समुच्छ्राये ॥ मूल रोहणे ॥ कल विल क्षेपे ॥ बिल भेदने ॥ तिल स्नेहने ॥ चल
कत्तो ॥ पाल रक्षणे ॥ लूष हिंसायां ॥ शुल्ब माने ॥ शूर्प च ॥ चुट छेदने ॥ मुट संचूर्णने ॥ पडि पसि नाशने ॥ पंडयति ॥ पंडति ॥ पंसयति ॥ पंसति ॥ व्रज मार्गसं

केवलधातुले.

उ

ष

ने

॥सि०कौ॥ स्कारगत्योः॥ शुल्क अतिस्पर्शने॥ चपि गत्यां॥ चंपयति॥ चंपति॥ क्षपि क्षांत्यां॥ क्षंपयति॥ क्षंपति॥ छदि संवरणे॥ छुटी छेदने॥ भज्जेगत्यां॥ भाजयति॥ रूप मिश्र॥ ति०कौ०

॥५७॥ अयं ज्ञाने ज्ञापने च वर्तते॥ मिताह्रस्वः॥ मिनासुपधाया ह्रस्वः स्याण्णौ परे॥ ज्ञपयति॥ यम च परिवेषणे॥ चान्मित्॥ परिवेषणमिह वेष्टनं॥ न च

भोजनं॥ नापि वेष्टने॥ यमयति चंद्रं॥ परिवेष्टत इत्यर्थः॥ चह परिकल्कने॥ चहयति॥ अचीचहत्॥ कथादेर्वक्ष्यमाणस्य नु अदंतत्वे नाग्लोपित्वा

द्दीर्घसन्वद्भावौ न॥ अचचहत्॥ चप इत्येके॥ चपयति॥ रह त्यागे इत्येके॥ अरीरहत्॥ कथादेस्तु अररहत्॥ बल प्राणने॥ बलयति॥ चिञ् चयने॥ चि

स्फुरोर्णौ॥ आत्वं वा स्यात्॥ अतिह्री व्ली री क्नूयी क्ष्माय्यातां पुक्॥ एषां पुक् स्यात्णौ॥ चपयति॥ मित्त्वस्य सामर्थ्यादस्य णिज्विकल्पः॥ चय

ति॥ पणि चयति॥ अनिचयति॥ नान्ये मितोऽहेतौ॥ अहेतौ स्वार्थे णिचि ज्ञपादिभ्योऽन्ये मितो न स्युः॥ तेन शमादीनाममंतत्वेऽपि युक्ते मित्त्वं न॥ घट्ट च

ने॥ मुस्त संघाते॥ खट्ट संवरणे॥ षट्ट स्फिट्ट चुबि हिंसायां॥ पूल संघाते॥ पूलेत्येके॥ पुंस अभिवर्द्धने॥ टकि बंधने॥ टंकति॥ धूस कांतिकर

णे॥ धूसयति॥ दंत्यांतः॥ मूर्धन्यांत इत्येके॥ तालव्यांत इत्यन्ये॥ कीट वर्णे॥ चूर्ण संकोचने॥ पूज पूजायां॥ अर्क स्तवने॥ तपन इत्येके॥ शुठ आलस्ये

शुठि शोषणे॥ शुंठयति॥ शुंठति॥ जुड प्रेरणे॥ गज माज शब्दार्थौ॥ गाजयति॥ माजयति॥ मर्च च॥ मर्चयति॥ घृ प्रस्रवणे॥ स्रवण इत्येके॥ पचि विस्ता

॥५७॥ रवचने॥ पंचयति॥ पंचते इति व्यक्तार्थस्य शपि गतं॥ तिज निशाने॥ तेजयति॥ कृत संशब्दने॥ उपधायाश्च॥ धातोरुपधाभूतस्य ऋत इत्स्या ॥५७॥

त्॥ उरत्॥ उपधायां चेति दीर्घः॥ कीर्तयति॥ अचीकृतत्॥ अचिकीर्तत्॥ वर्ध छेदनपूरणयोः॥ कुबि आच्छादने॥ कुंबयति॥ कुभि इत्येके॥

कुबि लुबि अदर्शने॥ अर्दन इत्येके॥ कूप व्यक्तायां वाचि॥ कूपत्येके॥ चुटि छेदने॥ इल प्रेरणे॥ एलयति॥ एलिलत्॥ म्लेच्छ म्लेच्छने॥ म्लेच्छ अव्यक्तायां वाचि॥

ब्रूस बर्ह हिंसायां॥ केचिदिह गर्ज गर्द शब्दे॥ गर्ध अभिकांक्षायामिति पठंति॥ गुर्द पूर्वनिकेतने॥ जसि रक्षणे॥ मोक्षण इत्येके॥ चित्॥ जंसयति॥ जंसति॥ ईड स्तु

त॥ तौ॥ जसु हिंसायां॥ पिडि संघाते॥ रुष रोषे॥ रुट इत्येके॥ डिप क्षेपे॥ ष्टुप समुच्छ्राये॥ ॥ आकुस्मादात्मनेपदिनः॥ ॥ कुस्म नाम्नो वेति वक्ष्यमाण मभिव्या

प्यार्थः॥ अकर्मगामिकार्यमिदं॥ चित संचेतने॥ चेतयते॥ अचीचितत॥ दशि दंशने॥ दंशयते॥ अददंशत॥ इदित्वाभिज्ञपाचेदंशति॥ आकुस्मीय

त मात्मनेपदं चित्तु संनियोगेन नित्यात्मनेपदं चेत् प्रत्याहारः॥ न लोपः संज्ञि साहचर्याद्वा ह्रुहेर्ग्रहणं॥ दसि दर्शनदंशनयोः॥ दंसयते॥ दंसति॥ संदर्शये॥ उपाडिप संघाते॥ त

त्रि कुटुंब धारणे॥ तंत्रयते॥ वांडा धातुरूपमिति मल्ला कुटुंबयत इत्युदाहरंति॥ मत्रि गुप्तपरिभाषणे॥ स्पश ग्रहणसंश्लेषणयोः॥ तर्ज भर्त्स तर्जने॥ बस्त गंध

अर्दने॥ बस्तयते॥ गंधयते॥ विष्क हिंसायां॥ हिष्क इत्येके॥ निष्क परिमाणे॥ लल ईप्सायां॥ कूण संकोचने॥ तूण पूरणे॥ भ्रूण आशाविशंकयोः॥ शठ श्लाघायां॥ यक्ष

पूजायां॥ स्यम वितर्के॥ गूर उद्यमने॥ शम लक्ष आलोचने॥ नान्ये मितइति मित्त्वनिषेधः॥ शामयते॥ कुत्स अवक्षेपणे॥ त्रुट छेदने॥ कुट इत्येके॥ गल स्रवणे॥ भल आ

भंडने॥ कूट आप्रदाने॥ अवसादन इत्येके॥ कुट्ट प्रतापने॥ वंचु प्रलंभने॥ वृष शक्तिबंधने॥ शक्तिबंधनं प्रजननसामर्थ्यं॥ शक्तिसंबंधश्च॥ वर्षयते॥ मद तृप्तियो

गे॥ दिवु परिकूजने॥ गृ विज्ञाने॥ गारयति॥ विद चेतनाख्याननिवासेषु॥ वेदयते॥ मन्तायां विधते ज्ञाने वेत्ति विंते विचारणे॥ विंदते विंदति प्राप्तावस्य कुस्म

शब्दिरं कमानः॥ मान स्तंभे॥ मानयते॥ युकु जुगुप्सायां॥ यावयते॥ कुस्म नाम्नो वा॥ कुस्मेति धातुः कुत्सितस्मयने वर्तते॥ कुस्मयते॥ अनुकुस्मत॥ आधृषाद्

॰नकम्यमिचमामिति मित्वनिषेधः॥

॥सि०उ॥ सेतिज्ञानिपरिहिंवं॥ ततो धात्वर्थे णिच्॥ ॥इत्याकुस्मीयाः॥ ॥चर्च अध्ययने॥ बुक्क भाषणे॥ शब्द उपसर्गादाविष्कारे च॥ नाड्यापणे॥ प्रतिशब्दयति॥ प्रति ॥सि०उ॥
॥५५॥ ष्कतमाविष्करोतीत्यर्थः॥ अनुपसर्गो इ॥ आविष्कारे इत्येव॥ शब्दयति॥ कण निमीलने॥ काणयति॥ णौ नश्चपधाया ह्रस्वः॥ काण्यादीनां वेति विकल्प्य
ते॥ अचीकणत्॥ अचकाणत्॥ जभि नाशने॥ जंभयति॥ षूद क्षरणे॥ सूदयति॥ अस्मु हृत्॥ उसु ताडने॥ ऋसुच उस्मति॥ आसयति॥ पश बंधने॥ पाशय
ति॥ अम रोगे॥ आमयति॥ नान्ये मित इति निषेधः॥ अम गत्यादिष्वपि गतः॥ तस्माद्धेतुमण्णौ आमयति॥ चट स्फुट भेदने॥ चिकामरावापाः स्फुट
ति स्फोटते इत्युक्तं॥ घट संघाते॥ घाटयति॥ हंत्यर्थाश्च॥ नवगण्यासुक्ता अपि हंत्यर्थाः स्वार्थे णिचं लभंत इत्यर्थः॥ दिवु मर्दने॥ अर्द वादयनी सर्पिः॥
ति॥ मगध परिवेष्टने॥ नीचदास्य इत्यन्ये॥ तंतस पंपस दुःखे॥ सुख दुःख तत्क्रियायां॥ सुखयति॥ दुःखयति॥ सुखं दुःखं वानुभवतीत्यर्थः॥ सपर पूजायां॥ अरर पूजायां॥ भिषज् चिकित्सायां॥ भिष्णज उपसेवायां॥ इषुध शरधारणे॥ चरण वरण गतौ॥ चुरण चौर्ये॥ तुरण त्वरायां॥ भुरण धारणपोषणयोः॥ गद्गद वाक्स्खलने॥ एला केला खेला विलासे॥ इलेत्यन्ये॥ लेखा स्खलने च॥ अदंतोयमित्यन्ये॥ लेखयति॥ लिट अल्पकुत्सनयोः॥ लिट्यति॥ लाट जीव ने॥ हृणीङ् रोषणे लज्जायां च॥ महीङ् पूजायां॥ महीयते॥ पूजां लभत इत्यर्थः॥ रेखा श्लाघासादनयोः॥ द्रवस परितापपरिचरणयोः॥ तिरस अंतर्धौ॥ अगद नीरोगत्वे॥ उरस बलार्थः॥ उरस्यति॥ बलवान् भवतीत्यर्थः॥ तरण गतौ॥ पयस प्रसृतौ॥ संभूयस प्रभूतभावे॥ अंबर संवर संभरणे॥ आहृत्यवयोषति॥ ॥ इति कंड्वादयः॥ ॥ कंड्वन्ते सन॥ सन्यङोरिति प्रथमैकाचो द्वित्वे प्राप्ते॥ कंड्वादेस्तृतीयस्येति वाच्यं॥ कंडूयियिषति॥ अ सूयियिषति॥ यथेष्टं नामधातुषु॥ आद्यानां त्रयाणामन्यतमस्य द्वित्वमित्यर्थः॥ अशोहल्त्वादेनरस्य॥ पुपुत्रीयियिषति॥ पुतित्रीयिषति॥ पुत्रीयियिषति॥ इ ति॥ अशिश्वीयिषति॥ अश्वीयियिषति॥ न दराणां संयुक्तानामचः परस्य द्वित्वनिषेधः॥ इन्द्रीयतेः सन॥ ईशब्दयीशब्दयोरन्यतरस्य द्वित्वं॥ इ

इ॥ न्द्रि॥ यिषति॥ इन्द्रिद्रीयिषति॥ इन्दिद्रीयिषति॥ इन्द्रीयियिषति॥ प्रियमाख्यातुमाचक्षाणं प्रेरयितुं वेच्छति॥ पिप्रापयिषति॥ प्राप्रिपयि षति॥ प्रापयियिषति॥ उरु॥ विवारयिषति॥ वरिरयिषति॥ वारयियिषति॥ बाढं॥ सिसाधयिषतीत्यादि॥ रूपत्रयं॥ पत्वं तु नास्ति॥ यङः सन्यंतात्सन॥ बोभूयियिषति॥ यङ्णिसन्नंतात्णिच्॥ बोभूययियिषयति॥ ॥ इति प्रत्ययमाला॥ ॥ अनुदात्तङित आत्मनेपदं॥ आस्ते॥ शेते॥ सा

टी॰ आ॥

॥सिउं॰मं॥ वकर्मकात्॥ बभंजे॥ अनुबभंजे॥ कर्तरि कर्मव्यतिहारे॥ क्रियाविनिमये द्योत्ये कर्त्र्यात्मनेपदं स्यात्॥ व्यतिलुनीते॥ अन्यस्य योग्यं लवनं करोतीत्यर्थः सि॰आत्म
॥६३॥ श्नसोरल्लोपः॥ व्यतिस्ते॥ व्यतिषाते॥ व्यतिषते॥ तासस्त्योर्लोपः॥ व्यतिसे॥ सात्पदाद्योरिति निषेधः॥ धि च॥ व्यतिध्वे॥ ह एति॥ व्यतिहे॥ व्यत्यसै॥
व्यत्यास्त॥ व्यतिषीत॥ व्यतिराते॥ व्यतिभाव ३ व्यतिबसे॥ न गतिहिंसार्थेभ्यः॥ व्यतिगच्छंति॥ व्यतिघ्नंति॥ प्रतिषेधे हसादीनामुपसंख्यानं॥ हसा
दयो हसप्रकाराः शब्दक्रियाः॥ व्यतिहसंति॥ व्यतिजल्पंति॥ हरतेरप्रतिषेधः॥ संप्रहरंते राजानः॥ इतरेतरान्योन्योपपदाच्च॥ परस्परोपपदा
च्चेति वक्तव्यं॥ इतरेतरस्यान्योन्यस्य परस्परस्य वा व्यतिलुनंति॥ नेर्विशः॥ निविशते॥ परिव्यवेभ्यः क्रियः॥ अव॰ अभिप्रायार्थमिदं॥ परिक्री
णीते॥ विक्रीणीते॥ अवक्रीणीते॥ विपराभ्यां जेः॥ विजयते॥ पराजयते॥ आङो दोऽनास्यविहरणे॥ आङ्पूर्वाद्ददातेर्मुखविकासनादन्यत्रार्थे वर्त
मानादात्मनेपदं स्यात्॥ विद्यामादत्ते॥ अनास्येति किं॥ मुखं व्याददाति॥ आस्यग्रहणमविवक्षितं॥ विपादिकां व्याददाति॥ पादस्फोटो विपादिका॥
नदीकूलं व्याददाति॥ परांगकर्मकान्न निषेधः॥ व्याददते पिपीलिकाः पतंगस्य मुखं॥ क्रीडोऽनुसंपरिभ्यश्च॥ चादाङः॥ अनुक्रीडते॥ संक्रीडते॥ प
रिक्रीडते॥ आक्रीडते॥ अनोः कर्मप्रवचनीयान्न॥ उपसर्गेण समानार्थेन सहचरितात्॥ माणवकमनुक्रीडति॥ तेन सहेत्यर्थः॥ तृतीयार्थे इत्यनोः कर्म
प्रवचनीयत्वं॥ समोऽकूजने॥ संक्रीडते॥ कूजने तु संक्रीडति चक्रं॥ आगमेः क्षमायां॥ ण्यंतस्य ग्रहणं॥ आगमयस्व तावत्॥ मा त्वरिष्ठा इत्यर्थः॥ शि ॥६३॥
क्षेर्जिज्ञासायां॥ धनुषि शिक्षते॥ धनुर्विषयकज्ञाने शक्तो भवितुमिच्छतीत्यर्थः॥ आशिषि नाथः॥ आशिष्येवेति नियमार्थं वार्तिकमिदं॥ सर्पि

षो नाथते॥ सर्पिर्मे स्यादित्याशास्ते इत्यर्थः॥ कथं नाथसे किमु पतिं न भूभृतामिति॥ नाथस इति पाठ्यं॥ हरतेर्गतताच्छील्ये
गतं प्रकारं॥ पैतृकमश्वा अनुहरंते॥ मातृकं गावः॥ पितुर्मातुश्चागतं प्रकारं सततं परिशीलयंतीत्यर्थः॥ ताच्छील्ये किं॥ मातु
रनुहरंति॥ किरतेर्हर्षजीविकाकुलायकरणेष्विति वाच्यं॥ हर्षादयो विषयाः॥ तत्र हर्षो विक्षेपस्य कारणं॥ इतरे फले॥ अपाच्चतु
ष्पाच्छकुनिष्वालेखने॥ अपात्किरतेः सुट् स्यात्॥ सुडपि हर्षादिष्वेव वक्तव्यः॥ अपस्किरते वृषो हृष्टः॥ कुक्कुटो भक्ष्यार्थी॥ श्वा
आश्रयार्थी च॥ हर्षादिष्विति किं॥ अपकिरति कुसुमं॥ इह तङ् सुट् न॥ हर्षादिमात्रविवक्षायां यद्यपि तङ् प्राप्तः तथापि सुड्
ने॰ भावे प्राप्ते इत्याङः॥ गजोऽपकिरति॥ आङि नुप्रच्छ्योः॥ आनुते॥ आपृच्छते॥ शप उपालंभे॥ आक्रोशार्थात्त्वरितेतो॥ कर्तृगेपि
फले शपथरूपेऽर्थे आत्मनेपदं वक्तव्यमित्यर्थः॥ कृष्णाय शपते॥ समवप्रविभ्यः स्थः॥ संतिष्ठते॥ अवतिष्ठते॥ समास्थत॥
समास्थिषातां॥ अवतिष्ठते॥ प्रतिष्ठते॥ वितिष्ठते॥ आङः प्रतिज्ञायामुपसंख्यानं॥ शब्दं नित्यमातिष्ठते॥ नित्यत्वेन प्रति
जानीत इत्यर्थः॥ प्रकाशनस्थेयाख्ययोश्च॥ गोपी कृष्णाय तिष्ठते॥ स्वाशयं प्रकाशयतीत्यर्थः॥ संशय्य कर्णादिषु तिष्ठते यः॥
कर्णादीन्निर्णेतृत्वेनाश्रयतीत्यर्थः॥ उदोऽनूर्ध्वकर्मणि॥ मुक्तावुत्तिष्ठते॥ अनूर्ध्वेति किं॥ पीठादुत्तिष्ठति॥ ईहायामेव॥ नेह॥

ग्रामाद्ध्वरमुपतिष्ठति॥ उपान्मंत्रकरणे॥ आग्नेय्याऽग्नीध्रमुपतिष्ठते॥ मंत्रकरणे किं॥ भर्तारमुपतिष्ठति यौवनेन॥ उपाद्देवपूजासं आत्मे॰ ति॰
॥सि॰ उ॰॥ गतिकरणमित्रकरणपथिष्विति वाच्यं॥ आदित्यमुपतिष्ठते॥ कथं तर्हि स्तुतस्तुतिभिरर्थ्याभिरुपतस्थे सरस्वतीति॥ देवतात्वारो
पात्॥ रथिकस्य देवतां संगताकरणं॥ गंगा यमुनामुपतिष्ठते॥ उपश्लिष्यतीत्यर्थः॥ रथिकानुपतिष्ठते॥ मित्रीकरोतीत्यर्थः॥ पंथाः स्रुघ्नमु
॥६४॥ पतिष्ठते॥ प्राप्नोतीत्यर्थः॥ वा लिप्सायामिति वक्तव्यं॥ भिक्षुकः प्रभुमुपतिष्ठते उपतिष्ठति वा॥ लिप्सयोपगच्छतीत्यर्थः॥ अकर्मका
च्च॥ उपात्तिष्ठतेरकर्मकादात्मनेपदं स्यात्॥ भोजनकाले उपतिष्ठते॥ संनिहितो भवतीत्यर्थः॥ उद्विभ्यां तपः॥ अकर्मकादित्येव॥
उत्तपते॥ वितपते॥ दीप्यत इत्यर्थः॥ स्वांगकर्मकाच्चेति वक्तव्यं॥ स्वमंगं स्वांगं न स्वेवं त्विमिति परिभाषितं॥ उत्तपते वितपते पाणिं
नेह॥ सुवर्णमुत्तपति॥ संतापयति॥ विलापयतीत्यर्थः॥ चैत्रो मैत्रस्य पाणिमुत्तपति॥ संतापयतीत्यर्थः॥ आङो यमहनः॥ आय
च्छते॥ आहते॥ अकर्मकात्स्वांगकर्मकादित्येव॥ नेह॥ परस्य शिर आहंति॥ कथं तर्हि आजघ्ने विषमविलोचनस्य वक्ष इति भारविः ॥६४॥
आहध्वं मा रघूत्तममिति भट्टिश्च॥ प्रमाद एवायमिति भागवृत्तिः॥ प्राप्येत्यध्याहारो वा॥ ल्यब्लोपे पंचमीति तुल्यबलं तेन विनैव त
दर्थावगतिर्यत्र तद्विषयं॥ चित्तुमित्यादि तुमुनंताध्याहारो वास्तु॥ समीपमेत्येति वा॥ आत्मनेपदमन्यतरस्यां॥ हनो वधादेशो

वा लुङि॥ आवधिष्ट॥ आवधिषातां॥ हनः सिच्॥ सिच् किदित्याह॥ अनुनासिकलोपः॥ आहत॥ आहसातां॥ आहसत॥ य
मो गंधने॥ सिच् किदित्यात्॥ गंधनं सूचनं॥ परदोषाविष्करणं॥ उदायत॥ गंधने किं॥ उदायंस्त पादं॥ आकर्षवानित्यर्थः॥ समो
गम्यृच्छिभ्यां॥ अकर्मकाभ्यामित्येव॥ संगच्छते॥ वा गमः॥ गमः परे झलादी लिङ्सिचौ वा किंतौ स्तः॥ संगसीष्ट॥ संगंसीष्ट॥ स
मगत॥ समगंस्त॥ समृच्छिष्यते॥ अकर्मकाभ्यां किं॥ ग्रामं संगच्छति॥ विदिप्रच्छिस्वरतीनामुपसंख्यानं॥ वेत्तेरेव ग्रहणं॥ संवि
त्ते॥ संविदाते॥ वेत्तेर्विभाषा॥ वेत्तेः परस्य झादेशस्यातो रुडागमो वा स्यात्॥ संविद्रते॥ संविदते॥ संपृच्छते॥ संस्वरते॥ अर्तिश्रु
दृशिभ्यश्चेति वक्तव्यं॥ अर्तीति द्वयोर्ग्रहणं॥ अङ्विधौ त्वियर्तेरेव ग्रहणं॥ मा समृत॥ मा समृषातां॥ मा समृषतेति॥ समार्त
समार्षातां समार्षतेति वा श्वादेः॥ इयर्तेस्तु मा समरत॥ मा समरेतां॥ मा समरंतेति॥ समारत॥ समरेतां॥ समारंतेति वा॥ सं
शृणुते॥ संपश्यते॥ अकर्मकादित्येव॥ अत एव रक्षांसीति पुरापि संशृणुमह इति मुरारिप्रयोगः प्रामादिक इत्याहुः॥ अध्याह
रो वा॥ इति कय्यटश्च इति॥ अपास्मिन्नकर्मकाधिकारे हनिगम्यादीनां कथमकर्मता इति चेच्छृणु॥ ॥धातोरर्थांतरे वृत्ते
धात्वर्थेनोपसंग्रहात्॥ प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया॥ १ ॥ वहति भारं॥ नदी वहति॥ स्यंदत इत्यर्थः॥ जीवति

नस्यति॥ प्रसिद्धेर्यथा॥ मेघोवर्षति॥ कर्मणोऽविवक्षातोयथा॥ हितान्नयःसंशृणुतेसर्किंकौत्रे॥ उपसर्गादस्यत्यूह्योर्वेति सि॰कौ॰ आत्म॰
॥सि॰उ॰॥ वस्यं॥ अकर्मकादितिनिवृत्तं॥ बंधंनिरस्यति॥ निरस्यते॥ समूहति॥ समूहतेवा॥ उपसर्गाद्ध्रस्वउहतेः॥ यासौकृति॥ ब्रह्म
समुह्यात॥ अग्निंसमुह्य॥ ॥निसमुपविभ्योह्वः॥ निह्वयते॥ स्पर्धायामाङः॥ कृष्णश्चाणूरमाह्वयते॥ स्पर्धायांकिं॥ पुत्रमाह्व
॥६५॥ ति॥ ॥गंधनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषुकृञः॥ गंधनंहिंसा॥ उत्कुरुते॥ सूचयतीत्यर्थः॥ सूचनं
प्राणवियोगानुकूलताहिंसैव॥ अवक्षेपणंभर्त्सनं॥ श्येनोवर्तिकामुदाकुरुते॥ भर्त्सयतीत्यर्थः॥ हरिमुपकुरुतेसेवतइत्यर्थः॥ रि
परदारान्प्रकुरुते॥ तेषुसहसाप्रवर्त्ततइत्यर्थः॥ एधोदकस्योपस्कुरुते॥ गुणमाधत्ते॥ गाथाःप्रकुरुते॥ प्रकथयति॥ शतंप्र
कुरुते॥ धर्मार्थंनियुंक्ते॥ एषुकिं॥ घटंकरोति॥ अधेःप्रसहने॥ प्रसहनंक्षमाऽभिभवश्च॥ परमर्षणेऽभिभवेनीतिपाठो
ऽ॥ शत्रुमधिकुरुते॥ क्षमतइत्यर्थः॥ अभिभवतीतिवा॥ वेःशब्दकर्मणः॥ स्वरान्विकुरुते॥ उच्चारयतीत्यर्थः॥ शब्दकर्मणः ॥६५॥
किं॥ चित्तंविकरोतिकामः॥ अकर्मकाच्च॥ वेःकृञइत्येव॥ छात्राविकुर्वते॥ विकारंलभंते॥ संमाननोत्संजनाचार्यकर
णज्ञानभृतिविगणनव्ययेषुनियः॥ अत्रोत्संजनज्ञानविगणनव्ययाःनयतेर्वाच्याः॥ इतरेप्रयोगोपाधयः॥ तथाहि॥ शा

स्त्रेनयते॥ शास्त्रेस्थांसिद्धांतंशिष्येभ्यःप्रापयतीत्यर्थः॥ तेनशिष्यसंमाननंफलितं॥ उत्संजने॥ दंडमुन्नयते॥ उपरिक्षिपती क्रियते
त्यर्थः॥ माणवकमुपनयते॥ विधिनाआत्मसमीपंप्रापयति॥ उपनयनपूर्वकेणाध्यापनेनहिउपनेतरिआचार्यत्वंकुरुते॥
ज्ञाने॥ तत्त्वंनयते॥ निश्चिनोतीत्यर्थः॥ कर्मकरानुपनयते॥ भृतिदानेनस्वसमीपंप्रापयतीत्यर्थः॥ विगणनमृणादेर्निर्यातनं
करंविनयते॥ राज्ञेदेयंभागंपरिशोधयतीत्यर्थः॥ शतंविनयतेधर्मार्थंविनियुंक्तइत्यर्थः॥ कर्तृस्थेचाशरीरेकर्मणि॥ नियः
कर्तृस्थेकर्मणिपरात्मनेपदंस्यात्तच्चेच्छरीरावयवभिन्नंस्यात्॥ स्वशरीरस्थाह्नेनतद्वयवोलह्यते॥ क्रोधंविनयते॥ अप
गमयति॥ तत्फलस्यचित्तप्रसादस्यकर्तृगत्वात्स्वरितञितइत्येवसिद्धेनियमार्थं॥ तेनेह न॥ गडुंविनयति॥ कथंतर्हिविग
णय्यनयंतिपौरुषमिति॥ कर्तृगामित्वाविवक्षायांभविष्यति॥ वृत्तिसर्गतायनेषुक्रमः॥ वृत्तिरप्रतिबंधः॥ ऋचिविक्रमतेबु
द्धिः॥ नप्रतिहन्यतइत्यर्थः॥ सर्गउत्साहः॥ अध्ययनायक्रमते॥ उत्सहते॥ क्रमंतेस्मिन्शास्त्राणिस्फीतानिभवंतीत्यर्थः॥ उप ज
पराभ्यां॥ वृत्त्यादिष्वाभ्यामेवक्रमेरात्मनेपदंस्यात्॥ नतूपसर्गांतरपूर्वात्॥ उपक्रमते॥ पराक्रमते॥ नेह॥ संक्रामति॥ आङ
उद्गमने॥ आक्रमतेसूर्यः॥ उदयतइत्यर्थः॥ ज्योतिरुद्गमनइतिवाच्यं॥ नेह॥ आक्रमतिधूमोहर्म्यतलात्॥ वेःपादविहरणे॥

साधुर्विक्रमते वाजी ॥ पादविहरणे किं ॥ विक्रामति संधिः ॥ द्विधा भवति स्फुटीभवतीत्यर्थः ॥ प्रोपाभ्यां समर्थाभ्यां ॥ समर्थौ तु
॥ सि॰ कु॰ ॥ ल्यार्थौ ॥ शकंधादित्वात्मनेपदं ॥ प्रारंभे ॥ नयोस्तुल्यार्थता ॥ प्रक्रमते ॥ उपक्रमते ॥ समर्थाभ्यां किं ॥ प्रक्रामति गच्छतीत्यर्थः ॥ उ लि॰ आत्म॰
पक्रामति आगच्छतीत्यर्थः ॥ अनुपसर्गाद्वा ॥ क्रामति ॥ क्रमते ॥ अप्राप्तविभाषेयं ॥ वृत्त्यादौ तु नित्यमेव ॥ अपह्नवे ज्ञः ॥ शतम
पजानीते ॥ अपलपतीत्यर्थः ॥ अकर्मकाच्च ॥ सर्पिषो जानीते ॥ सर्पिषा उपायेन प्रवर्त्तत इत्यर्थः ॥ संप्रतिभ्यामनाध्याने ॥ शतं सं
॥ ६६ ॥ जानीते ॥ अवेक्षत इत्यर्थः ॥ शतं प्रतिजानीते ॥ अंगीकरोतीत्यर्थः ॥ अनाध्यान इति योगो विभज्यते ॥ तत्सामर्थ्यादकर्मकाद्व
तिप्राप्तिरपि वर्त्तते वार्यते ॥ मातरं मातुर्वा संजानाति ॥ कर्मणः शेषत्वविवक्षायां षष्ठी ॥ भासनोपसंभाषाज्ञानयत्नविमत्यु
पमंत्रणेषु वदः ॥ उपसंभाषोपमंत्रणे धातोर्वाच्ये इतरे प्रयोगोपाधयः ॥ शास्त्रे वदते ॥ भासमानो ब्रवीतीत्यर्थः ॥ उपसंभाषा उप
सांत्वनं ॥ ष्टसानुपवदते ॥ सांत्वयतीत्यर्थः ॥ ज्ञाने ॥ शास्त्रे वदते ॥ यत्ने ॥ क्षेत्रे वदते ॥ विमतौ ॥ क्षेत्रे विवदंते ॥ उपमंत्रणमुप ॥ ६६ ॥
छंदनं ॥ उपवदते ॥ प्रार्थयत इत्यर्थः ॥ व्यक्तवाचां समुच्चारणे ॥ मनुष्यादीनां संभूयोच्चारणे वदेरात्मनेपदं स्यात् ॥ संप्रवदंते
ब्राह्मणाः ॥ नेह संप्रवदंति खगाः ॥ अनोरकर्मकात् ॥ व्यक्तवाग्विषयादनुपूर्वादकर्मकाद्वदेरात्मनेपदं स्यात् ॥ अनुवद

उक्तमनुवदति व्यक्तवाचां किं अनुवदति वीणा. विभाषा विप्रलापे विप्रलापात्मके व्यक्तवाचां समुच्चारणे उक्तं वा स्यात्

ते कठः कलापस्य ॥ अकर्मकात्किं ॥ विप्रवदंति वा वैद्याः ॥ अवाद्ग्रः ॥ अवगिरते ॥ गृणाति स्तव पूर्वो न प्रयुज्यत एवेति प्राञ्चः ॥ स विप्रवदंते
मः प्रतिज्ञाने ॥ शब्दं नित्यं संगिरते ॥ प्रतिजानीत इत्यर्थः ॥ प्रतिज्ञाने किं ॥ संगिरति ग्रासं ॥ उदश्चरः सकर्मकात् ॥ धर्ममुच्चरते ॥ उल्लंघ्य कन
गच्छतीत्यर्थः ॥ सकर्मकात्किं ॥ बाष्पमुच्चरति ॥ उपरिष्टाद्गच्छतीत्यर्थः ॥ समस्तृतीयायुक्तात् ॥ रथेन संचरते ॥ दाणश्च सा
चेच्चतुर्थ्यर्थे ॥ संपूर्वाद्दाणस्तृतीयांतेन युक्तादुक्तं स्यात् तृतीया चेच्चतुर्थ्यर्थे ॥ दास्या संयच्छते कामी ॥ पूर्वसूत्रे समइति षष्ठी ॥ तेन सूत्र
द्वयमिदं व्यवहितेपि प्रवर्त्तते ॥ रथेन समुदाचरते ॥ दास्याः संप्रयच्छते ॥ उपाद्यमः स्वकरणे ॥ स्वकरणं स्वीकारः ॥ भार्यामुपयच्छते ॥
विभाषोपयमने ॥ यमः स्वकरणे किं ह्यस्याद्विवाहे ॥ रामः सीतामुपायत ॥ उपायंस्त वा ॥ उदवोढेत्यर्थः ॥ गंधनांगे उपयमे तु पूर्वं विप्र
तिषेधान्नित्यं किलं ॥ ज्ञाश्रुस्मृदृशां सनः ॥ सन्नंतानामेषां प्राग्वत् ॥ धर्मं जिज्ञासते ॥ शुश्रूषते ॥ सुस्मूर्षते ॥ दिदृक्षते ॥ नानोर्ज्ञः
पुत्रमनुजिज्ञासति ॥ पूर्वसूत्रस्यैवायं निषेधः ॥ अनंतरस्येति न्यायात् ॥ तेनेह न ॥ सर्पिषो जिज्ञासते ॥ सर्पिषा प्रवर्त्तितुमिच्छ
तीत्यर्थः ॥ पूर्ववत्सन इति तङ् ॥ अकर्मकाच्चेति केवलाद्विधानात् ॥ प्रत्याङ्भ्यां श्रुवः ॥ आभ्यां सन्नंतात् श्रुव उक्तं न स्यात् ॥ प्र
तिशुश्रूषति ॥ आशुश्रूषति ॥ कर्मप्रवचनीयात्स्यादेव ॥ देवदत्तं प्रतिशुश्रूषते ॥ शदेः शितः ॥ शीयते लुङ्लिङोश्च ॥ व्याख्याते ॥ प्र

र्त्तमानः ॥ सनः पूर्वो यो धातुस्तेन तुल्यं सन्नन्तादात्मनेपदं स्यात् ॥ एदिधिषते ॥ शिशयिषते ॥ निविविक्षते ॥ पूर्ववत्किं ॥ बु नि० आत्म०
॥ सि०३ ॥ भूषति ॥ शदेरित्यादिसूत्रद्वये सनेनेत्यनुवर्त्य वाक्यभेदेन व्याख्येयं ॥ तेनेह न ॥ शिशत्सति ॥ मुमूर्षति ॥ आम्प्रत्ययवत्कृ
ञोऽनुप्रयोगस्य ॥ एधांचक्रे ॥ प्रोपाभ्यां युजेरयज्ञपात्रेषु ॥ प्रयुंक्ते ॥ उपयुंक्ते ॥ स्वराद्यन्तोपसर्गादिति वक्तव्यं ॥ उद्युंक्ते ॥ नि
॥ ६७ ॥ युंक्ते ॥ अयज्ञपात्रे किं ॥ द्वंद्वं न्यंचि पात्राणि प्रयुनक्ति ॥ समः क्ष्णुवः ॥ संक्ष्णुते शस्त्रं ॥ भुजोऽनवने ॥ ओदनं भुंक्ते ॥ अभ्य
वहरतीत्यर्थः ॥ बुभुजे पृथिवीपालः पृथिवीमेव केवलां ॥ वृद्धो जनो दुःखशतानि भुंक्ते ॥ इहोपभोगो भुजेरर्थः ॥ अनवने
किं ॥ महीं भुनक्ति ॥ णेरणौ यत्कर्म णौ चेत्स कर्त्तानाध्याने ॥ ण्यन्तादात्मनेपदं स्यादणौ या क्रिया सैव चेण्ण्यन्तेनोच्यते ॥ अ
णौ यत्कर्मकारकं तच्चेण्णौ कर्त्ता स्यान्न त्वाध्याने ॥ णिचश्चेति सिद्धेऽकर्त्रभिप्रायार्थमिदं ॥ कर्त्रभिप्राये तु विभाषोपपदेने
ति विकल्पेऽणावकर्मकादिति परस्मैपदे च परत्वात्प्राप्ते पूर्वविप्रतिषेधेनेदमेवेष्यते ॥ कर्त्तृस्थभावकाः कर्त्तृस्थक्रियाश्चोदाहर ॥६६॥
णं ॥ तथाहि ॥ पश्यन्ति भवं भक्ताः ॥ चाक्षुषज्ञानविषयं कुर्वन्तीत्यर्थः ॥ प्रेरणांशत्यागे ॥ पश्यति भवः ॥ विषयो भवतीत्यर्थः ॥
ततो हेतुमण्णिच् ॥ दर्शयन्ति भवं भक्ताः ॥ पश्यन्तीत्यर्थः ॥ पुनर्ण्यन्तस्याविवक्षायां ॥ दर्शयते भवः ॥ हेतुप्रथमतृतीययोरवस्थयो

द् २ सपरिस्पंदन साधनसाध्यः धात्वर्थः क्रिया
अपरिस्पंदन साधन साध्यः धात्वर्थः भावः

द्वितीयावस्थयोश्च तुल्योऽर्थः ॥ तत्र तृतीयकक्षायां न तङ् ॥ क्रियासाम्येपि अणौ कर्मकारकस्य णौ कर्त्तृत्वाभावात् ॥ चतु
र्थ्यां तु तङ् ॥ द्वितीयामादाय क्रियासाम्यात् ॥ प्रथमायां कर्मणस्तस्येह कर्त्तृत्वाच्च ॥ एवं [illegible] आरोहयते हस्तीत्यप्युदाहरणं
आरोहन्ति हस्तिनं हस्तिपकाः ॥ न्यक्भावयन्तीत्यर्थः ॥ तत आरोह[illegible]ति हस्ती ॥ न्यग्भवतीत्यर्थः ॥ ततो णिच् ॥ आरोहयति ॥ मा
रोहन्तीत्यर्थः ॥ तत आरोहयते ॥ न्यग्भवतीत्यर्थः ॥ यद्वा पश्यन्त्यारोहन्तीति प्रथमकक्षा प्राग्वत् ॥ ततः कर्मण एव हेतुत्वा
रोपाण्णिच् ॥ दर्शयति भवः ॥ आरोहयति हस्ती ॥ पश्यत आरोहतश्च प्रेरयतीत्यर्थः ॥ ततो णिज्भ्यां तत्प्रकृतिस्थाभ्यां उपात्तयोर्द्वि
योरपि प्रेषणयोस्त्यागे दर्शयते ॥ आरोहयते इत्युदाहरणं ॥ अर्थः प्राग्वत् ॥ अस्मिन्पक्षे द्वितीयकक्षायां न तङ् ॥ समान
क्रिया नित्यत्वाभावाभिज्ञानस्याधिक्यात् ॥ अनाध्याने किं ॥ स्मरति गुल्मं कोकिलः ॥ स्मरयति वनगुल्मः ॥ उत्कंठापूर्वकस्मृतौ ॥ वन
विषयो भवतीत्यर्थः ॥ भीस्म्योर्हेतुभये ॥ व्याख्यातं ॥ गृधिवंच्योः प्रलंभने ॥ प्रतारणेऽर्थे ण्यन्ताभ्यामाभ्यां प्राग्वत् ॥ माण
वकं गर्द्धयते वंचयते वा ॥ प्रलंभने किं ॥ श्वानं गर्द्धयति ॥ अभिकांक्षामस्योत्पादयतीत्यर्थः ॥ अहिं वंचयति ॥ वर्जयतीत्यर्थः ॥
लियः संमाननशालीनीकरणयोश्च ॥ व्याख्यातं ॥ मिथ्योपपदात्कृञोऽभ्यासे ॥ णेरित्येव ॥ पदं मिथ्या कारयते ॥ स्वरादिदुष्ट

मृसहरु उच्चारयतीत्यर्थः ॥ मिथ्योपपदात्किं ॥ पदं सुष्ठु कारयति ॥ अभ्यासे किं ॥ सकृत्पदं मिथ्या कारयति ॥ स्वरितञितः क ति॰ आत्म॰
र्त्रभिप्राये क्रियाफले ॥ यजते ॥ सुनुते ॥ कर्त्रभिप्राये किं ॥ ऋत्विजो यजंति सुन्वंति ॥ अपाद्वदः ॥ न्यायमपवदते ॥ कर्त्रभि
॥सि॰ उ॰॥ प्राय इत्येव ॥ अपवदति ॥ णिचश्च ॥ कारयते ॥ समुदाङ्भ्यो यमोऽग्रंथे ॥ अग्रंथ इति किं ॥ व्रीहीन्संयच्छते ॥ भारमुद्यच्छते ॥
॥६८॥ वस्त्रमायच्छते ॥ अग्रंथे किं ॥ उद्यच्छति वेदं ॥ अधिगंतुमुद्यमं करोतीत्यर्थः ॥ कर्त्रभिप्राय इत्येव ॥ अनुपसर्गाज्ज्ञः ॥ गां जा
नीते ॥ अनुपसर्गात्किं ॥ स्वर्गं लोकं न प्रजानाति ॥ कथं तर्हि सार्द्धः ॥ इमं नृपः पूर्वमवालुलोके ननाम तु उज्झि गमनं सुतस्य ॥ क
र्मणि लिट् ॥ न पणोतिविपरिणामः ॥ विभाषोपपदेन प्रतीयमाने ॥ स्वरितञित इत्यादिपंचसूत्र्यात्मनेविहितं तत्समी प१
पोच्चारितेन पदेन क्रियाफलस्य कर्तृगामित्वे द्योतिते वा स्यात् ॥ स्वं यज्ञं यजते ॥ यजति वा ॥ स्वं कटं कुरुते करोति वा ॥ स्वं
पुत्रमपवदति ॥ अपवदते वा ॥ स्वं कटं कारयति कारयते वा ॥ स्वं व्रीहिं संयच्छति ॥ संयच्छते वा ॥ स्वां गां जानाति जानीते वा ॥
॥ ॥ इत्यात्मनेपदप्रक्रिया ॥ ॥ शेषात्कर्तरि परस्मैपदं ॥ अत्ति ॥ अनुपराभ्यां कृञः ॥ कर्तृगेपि फले गंधनादौ पर ॥६८॥
स्मैपदार्थमिदं ॥ अनुकरोति ॥ पराकरोति ॥ कर्त्तरीत्येव ॥ भावकर्मणोर्मा भूत् ॥ नचैवमपि कर्मकर्तरि प्रसंगः ॥ कार्याति

कृञः

देशपक्षस्य मुख्यतया तत्र कर्मवत्कर्मणेत्यात्मनेपदेन परेणास्य बाधात् ॥ शास्त्रातिदेशपक्षे तु कर्तरि कर्मेत्सतः शेषादित्यत्र
कर्तृग्रहणद्वयमनुवर्त्य सकर्तृद्वयः कर्त्ता न तु कर्मकर्त्ता तत्रेति व्याख्येयं ॥ अभिप्रत्यतिभ्यः क्षिपः ॥ क्षिप प्रेरणे स्वरितेत् ॥ अभि
क्षिपति ॥ प्राद्वहः ॥ प्रवहति ॥ परेर्मृषः ॥ परिमृष्यति ॥ यौजादिकस्य परिमृष्यति इह परेरिति योगं विभज्य वहेरपीति केचित् ॥ व्या
ङ्परिभ्यो रमः ॥ विरमति ॥ उपाच्च ॥ यज्ञदत्तमुपरमति ॥ उपरमयतीत्यर्थः ॥ अंतर्भावितण्यर्थोयं ॥ ॥ विभाषाकर्मकात् ॥ उपा
द्दमितरकर्मकात्परस्मैपदं वा ॥ उपरमति ॥ उपरमते वा ॥ निवर्तते इत्यर्थः ॥ बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः ॥ एभ्यो ण्यंतेभ्यः
परस्मैपदं स्यात् ॥ णिचश्चेत्यस्यापवादः ॥ बोधयति पद्मं ॥ योधयति काष्ठानि ॥ नाशयति दुःखं ॥ जनयति सुखं ॥ अध्यापय
ति ॥ प्रावयति ॥ प्रापयतीत्यर्थः ॥ द्रावयति ॥ विलापयतीत्यर्थः ॥ स्रावयति स्यंदयतीत्यर्थः ॥ निगरणचलनार्थेभ्यश्च ॥ निगा
रयति आशयति भोजयति चलयति कंपयति ॥ अदेः प्रतिषेधः ॥ आदयते ॥ गतिबुद्धीति कर्मत्वमादिखाद्योर्नेति प्रतिषिद्धं ॥
निगरणचलनार्थेति सूत्रेण प्राप्तस्यैवायं निषेधः ॥ शेषादिति अकर्त्रभिप्रायेण परस्मैपदं स्यादेव ॥ आदयत्यन्नं बटुना ॥ अ
णावकर्मकाच्चित्तवत्कर्तृकात् ॥ ण्यंतात्परस्मैपदं स्यात् ॥ शेते कृष्णः ॥ तं गोपी शाययति ॥ न पादम्याङ्यमाङ्यसपरिमुहरु

देवदत्तेन

चिनृतिवदवसः॥ एभ्योण्यंतेभ्यःपरस्मैपदंन॥ पिबतिर्निगरणार्थः॥ इतरेचित्तवत्कर्तृकार्मकेकाः॥ नर्तितुंचकुमार्योपि॥ तेनसत्र ति॰परस्मै॰
दूयेनप्राप्तिः॥ पाययते॥ दमयते॥ आयामयते॥ आयासयते॥ परिरोचयते॥ नर्त्तयते॥ वादयते॥ वासयते॥ धेटउपसंख्यानं॥ धा
॥सि॰कु॰॥ पयेतेशिशुमेकंसमीची॥ अकर्त्रभिप्रायेशेषादितिपरस्मैपदंस्यादेव॥ वत्सान्पाययतिपयः॥ दमयंतीकमनीयतामद॥ भिक्षा
वासयति॥ वाक्यषः॥ लोहितायति॥ लोहितायते॥ द्युद्भ्योलुङि॥ अद्युतत्॥ वृद्भ्यःस्यसनोः॥ वर्त्स्यति॥ वर्तिष्यते॥ विवृत्सति॥
॥६९॥ विवर्त्तिषते॥ लुटिचक्लृपः॥ कल्प्तासि॥ कल्पितासे॥ कल्प्तासे॥ कल्प्स्यति॥ कल्पिष्यते॥ चिक्लृप्सति॥ चिकल्पिषते॥ चिक्लृप्सते
२ ॥ इतिपदव्यवस्था॥ ॥ अथभावकर्मणोर्लडादयः॥ भावकर्मणोरितितङ्॥ सार्वधातुकेयक्॥ धातोर्यक्प्रत्ययःस्यात्
भावकर्मवाचिनिसार्वधातुकेपरे॥ भावोभावना॥ उत्पादनक्रिया॥ साचधातुत्वेनसकलधातुवाच्या॥ भावार्थकलकारेणानूद्य
ते॥ युष्मदस्मद्भ्यांसामानाधिकरण्याभावात्प्रथमपुरुषः॥ तिङ्वाच्यभावनायाअसत्वरूपत्वेनद्वित्वाद्यप्रतीतेर्नद्विवचनादि ॥६९॥
बाधकापोह्यो नियमउत्सर्गः २ किंत्वेकवचनमेव॥ तस्यौत्सर्गिकत्वेनसंख्यानपेक्षत्वात्॥ अनभिहितेकर्त्तरितृतीया॥ त्वयामयाऽन्यैश्चभूयते॥ बभूवे॥ स्य
सिचूसीयुट्तासिषुभावकर्मणोरुपदेशेऽज्झनग्रहदृशांवाचिण्वदिट्च॥ उपदेशेयोऽच्तदंतानांहनादीनांचचिणीवाङ्गकार्यंवा
स्यात्स्यादिषुपरेषुभावकर्मणोर्गम्यमानयोःस्यादीनामिडागमश्च॥ अयमिट्चिण्वद्भावसंनियोगशिष्टत्वात्तदभावेन॥ इह

र्धधातुकइत्यधिकृतंसीयुटोविशेषणंनेतरेषामव्यभिचारात्॥ चिण्वद्भावाद्वृद्धिः॥ भाविता॥ भविता॥ भाविष्यते॥ भविष्य
ते॥ भूयतां॥ अभूयत॥ भूयेत॥ भाविषीष्ट॥ भविषीष्ट॥ चिण्भावकर्मणोः॥ च्लेश्चिण्स्याद्भावकर्मवाचिनितशब्देपरे॥ अभा
वि॥ अभाविष्यत॥ अभविष्यत॥ तिङोक्तत्वात्कर्मणिनद्वितीया॥ अनुभूयतेआनंदश्चैत्रेणत्वयामयाच॥ अनुभूयेते॥ अ
नुभूयंते॥ त्वमनुभूयसे॥ अहमनुभूये॥ अन्वभावि॥ अन्वभाविषातां॥ अन्वभविषातां॥ णिलोपः॥ भाव्यते॥ भावयांच
क्रे॥ भावयांबभूवे॥ भावयामासे॥ इहतराकृस्यएशिइटत्सेरेवकृतेहलतीतिहलंन॥ तासिसाहचर्यात्स्तौरपिव्यातिहइला तासस्तोः॥
दौसार्वधातुकेएतिहत्वप्रवृत्तेरित्याकः॥ भाविता॥ चिण्वदिटआसीयत्वेनासिद्धत्वाण्णिलोपः॥ पक्षेभावयिता॥ भाविष्य
ते॥ भावयिष्यते॥ भाव्यतां॥ अभाव्यत॥ भाव्येत॥ भाविषीष्ट॥ भावयिषीष्ट॥ अभावि॥ अभाविषातां॥ अभावयिषातां॥
बुभूष्यते॥ बुभूषांचक्रे॥ बुभूषिता॥ बुभूषिष्यते॥ बोभूय्यते॥ यङ्लुगंतात्बोभूयते॥ बोभवांचक्रे॥ बोभविता॥ २॥ अकृत्
सार्वधातुकयोर्दीर्घः॥ स्तूयतेविष्णुः॥ तुष्टुवे॥ स्ताविता॥ स्तोता॥ स्ताविष्यते॥ स्तोष्यते॥ अस्तावि॥ अस्ताविषातां॥ अस्तोषातां॥ गुणो
र्तीतिगुणः॥ अर्य्यते॥ स्मर्यते॥ आरे॥ सस्मरे॥ परत्वान्नित्यत्वाच्चगुणेरपरेकृतेऽञंतत्वाभावेपिउपदेशग्रहणाच्चिण्वदिट्

आरिता॥ अर्त्ता॥ स्मारिता॥ स्मर्त्ता॥ गुणोर्त्तिसंयोगाद्योरित्यत्र निलग्रहणानुवृत्तेस्तत्फलान्नेह गुणः॥ संस्क्रियते॥ अनिदितामिति नलो नि॰ भाव॰
पः॥ स्रस्यते॥ इदितस्तु नं घते॥ संप्रसारणं॥ इज्यते॥ अयङ् यि क्ङिति॥ शय्यते॥ तनोतेर्यकि॥ आकारांतादेशो वास्यात्॥ ता
॥सि॰ ३०॥ यते॥ तन्यते॥ ये विभाषा॥ जायते॥ जन्यते॥ तपोऽनुतापे च॥ तपः कर्मकस्यैव चिण् न स्यात् कर्मकर्त्तर्यनुपतापे च॥ अन्वतप्त पापे
न॥ पापं कर्त्तृ॥ तेनानुतप्यत इत्यर्थः॥ कर्मणि लुङ्॥ यद्वा पापेन पुंसा कर्त्राऽन्वशोचीत्यर्थः॥ घुमास्थेतीत्वं॥ दीयते॥ धीयते॥ आ
॥ ७० ॥ देव इत्यत्राशीर्लिङीति कर्मधारयादित्सः॥ कमाकारादौ निषेधः॥ एराजादिशत्वाभावात्तस्मिन्नात्वं॥ जग्ले॥ आतो युक् चि
ण्कृतोः॥ आदंतानां युगागमः स्याच्चिणि ञ्णिति कृति च॥ दायिता॥ दाता॥ दायिषीष्ट॥ दासीष्ट॥ अदायि॥ अदायिषातां
आदिषातां॥ अधायिषातां॥ अधिषातां॥ अग्लासातां॥ हन्यते॥ अभ्यासेऽरिति क्ते हन्त्तो न॥ हो हन्तेरिति कुत्वं॥
स्यान्वोरितिसि यः किलाद्गुणाभावः ४ घानिता॥ हन्ता॥ घानिष्यते॥ हनिष्यते॥ आशीर्लिङि वधादेशस्यापवादश्चिण्वद्भावः॥ आर्धधातुके सीयुटीति विशेषविहि ॥ ६० ॥
तत्वात्॥ घानिषीष्ट॥ पक्षे वधिषीष्ट॥ अघानि॥ ~~अघानि~~॥ अघानिषातां॥ अहसातां॥ पक्षे वधादेशः॥ अवधि॥ अव
धि॥ अवधिषातां॥ अघानिष्यत॥ अहनिष्यत॥ ननु स्यादिषु चिण्वदिति लाति देशाद्वधादेशः स्यादिति वाच्यं॥ अंगस्येत्य
चिण्वद्भावांगकार्यत्वात् चिणि वधादेशदर्शनादिति भावः

अग्लायिषातां

अंगकार्यत्वेऽपि वधादेशस्यांगाधिकारत्वाभावात्

धिकारादंगस्यैवाति देशात्॥ गृह्यते॥ चिण्वदिटो न दीर्घत्वं॥ असिद्धत्वस्य वलादिलक्षणस्यैवेटो ग्रहो लिटि दीर्घ इति नेन दीर्घवि
धानात्॥ ग्राहिता॥ ग्रहीता॥ ग्राहिष्यते॥ ग्रहीष्यते॥ ग्राहिषीष्ट॥ ग्रहीषीष्ट॥ अग्राहि॥ अग्राहिषातां॥ अग्रहीषातां॥ दृश्यते॥
अदर्शि॥ अदर्शिषातां॥ सिचः कित्वान्न॥ अदृक्षातां॥ गिरते र्लुङि ध्वमि तु नेऽधिकं शतं॥ तथाहि॥ चिण्वदिटो दीर्घो नेत्युक्तं॥
अगारिध्वं॥ द्वितीये लिटि॥ वृतो वेति वा दीर्घः॥ अगारीध्वं॥ अगरीध्वं॥ एषां त्रयाणां लत्वं ढत्वं दूलत्वं चेति पंच वैकल्पिकानि॥
दृष्टं पञ्चवति॥ लिङ्सिचोरिति विकल्पादिडभावे॥ उश्चेति॥ कित्वं॥ इत्वं॥ रपरत्वं॥ हलि चेति दीर्घः॥ इणः षीध्वमिति नित्यं ढ
त्वं॥ अगीर्ढ्वं॥ एवमाभां द्वित्वविकल्पे अष्टौ उक्तपञ्चवत्सह संकलनेन त्रयोदश॥ इट्दीर्घश्चिण्वदिटूलत्वं ढत्वं दूलत्वं त्रिके
तथा॥ इत्यस्थानां विकल्पेन चतुर्भिरधिकं शतं॥ हेतुमण्यंता कर्मणि लः॥ यक् णिलोपः॥ शम्यते भाहिमुकुंदेन॥ विष्णुलोपि
घोऽन्यतरस्यां॥ चिण्परे णमुल्परे च णौ मितामुपधाया दीर्घो वा स्यात्॥ प्रकृता मितां ह्रस्व एव तु न विकल्पितः॥ ण्यंतानां
न पदांतेति ह्रस्वविकल्पासिद्धः॥ दीर्घविधौ चिणि वालोपो न स्थानिवदिति दीर्घः सिध्यति॥ ह्रस्वविधौ तु स्थानिवत्त्वं दुर्वारं॥ भाष्ये तु पूर्वत्रा
सिद्धे न स्थानिवदित्यस्य द्विर्वचनसवर्णानुस्वारदीर्घजश्चरः प्रत्याख्याताः॥ णाविति ज्ञापितपरो निर्देशः॥ दीर्घग्रहणमास्ति
भाष्यकृता नित्यत्वाय॥ शामिता॥ शमिता॥ शमयिता॥ शामिष्यते॥ शमिष्यते॥ शमयिष्यते॥ यङंतात्कर्मणि॥ शंशम्यते॥ शंशामिता॥ शं

अगारिध्वं

शंशमिता ॥ शंशमयिता ॥ यङ्लुगंतात् त्रिण्यप्येवं ॥ स्याप्यमतेतु यङः ताच्छिण्वदिटि दीर्घो नास्तीति विशेषः ॥ ण्यंतात् भावे शम्यते भावकर्म०
मुनिना ॥ नोदात्तोपदेशस्य मांतस्यानाचमेः ॥ उपधाया वृद्धिर्न स्यात् चिणि ञ्णिति कृति च ॥ अशमि ॥ अदमि ॥ उदात्तोपदेशस्ये
॥ सि०७३ ॥ ति किं ॥ अगामि ॥ मांतस्येति किं ॥ अवादि ॥ अनाचमेः किं ॥ अचामि ॥ अनाचमिकमिवमीनामिति वक्तव्यं ॥ चिणि आयादय इति
॥ ७२ ॥ णिङभावे ॥ अकामि ॥ णिङ्णिचोरप्येवं ॥ अवामि ॥ वधीहिंसायां ॥ हलंतः ॥ ऊनिवध्योरिति न वृद्धिः ॥ अवधि ॥ आयो विभल्पुऽ लिव
स्फके र्न गुणः ॥ अजागारि ॥ भंजेश्च चिणि ॥ नलोपो वा स्यात् ॥ अभाजि ॥ अभंजि ॥ विभाषा चिण्णमुलोः ॥ लभेर्नुमागमो वा स्यात् ॥
अलंभि ॥ अलाभि ॥ व्यवस्थितविकल्पत्वात् प्रादेर्नित्यं नुम् ॥ प्रालंभि ॥ द्विकर्मकाणां तु ॥ गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष
हां ॥ बुद्धिभक्षार्थयोः शब्दकर्मणां च निजेच्छया ॥ २ ॥ प्रयोज्यकर्मण्यन्येषां ण्यंतानां लादयो मताः ॥ गौर्दुह्यते पयः ॥ अजा
ग्रामं नीयते ॥ ह्रियते ॥ कृष्यते ॥ उह्यते ॥ बोध्यते माणवकं धर्मः ॥ माणवको धर्ममिति वा ॥ देवदत्तो ग्रामं गम्यते ॥ अकर्मकाणां का
लादिकर्मकाणां कर्मणि भावे च लकार इष्यते ॥ मासो मासं वा आस्यते देवदत्तेन ॥ णिजंतात्तु प्रयोज्ये प्रत्ययः ॥ मासमास्यते ॥ ७२ ॥
माणवकः ॥ ॥ इति भावकर्मप्रक्रिया ॥ ॥ यदा सौकर्यातिशयं द्योतयितुं कर्तृव्यापारो न विवक्ष्यते तदा कारकांत
राण्यपि कर्तृसंज्ञां लभंते ॥ स्वव्यापारे स्वतंत्रत्वात् ॥ तेन पूर्वं करणत्वादिसत्त्वेपि संप्रति कर्तृत्वात् कर्तरि लकारः ॥ साध्वसि

छिनत्ति ॥ काष्ठानि पचंति ॥ स्थाली पचति ॥ कर्मणस्तु कर्तृविवक्षायां प्राक्सकर्मका अपि प्रायेणाकर्मकाः ॥ तेभ्यो भावे कर्त
स्वयमेव २ रि च लकारः ॥ पच्यते ओदनेन ॥ भिद्यते काष्ठेन ॥ कर्तरि तु ॥ कर्मवत्कर्मणा तुल्यक्रियः ॥ कर्मस्थया क्रियया तुल्यक्रियः क
र्ता कर्मवत्स्यात् ॥ कार्यातिदेशोयं ॥ तेन यगात्मनेपदचिण्चिण्वदिटः स्युः ॥ कर्तुरभिहितत्वात्प्रथमा ॥ पच्यते ओदनः ॥ स्वयमेव ३
भिद्यते काष्ठं ॥ अपाचि ॥ अभेदि ॥ ननु भावे लकारे कर्तुर्द्वितीया स्यात् ॥ अस्मादतिदेशादिति चेन्न ॥ लकारवाच्य एव क कर्मवत्वात् ४
र्ता कर्मवत् ॥ लिङ्याशिष्यङिति द्विर्लकारग्रहणस्यानुवृत्तेः ॥ भावप्रत्यये च कर्तुर्लकारेणानुपस्थितेः ॥ अतएव कृत्यक्त
लर्थाः कर्मकर्तरि न भवंति ॥ किंतु भावे एव ॥ भेत्तव्यं कुसूलेन ॥ ननु पाचि भिद्योः कर्मस्थाया क्रियाया विक्लित्तिद्वैधीभवनं च पचनं काष्ठभेदनं ५
सैवेदानीं कर्तृस्था ॥ न तु तत्तुल्या ॥ सत्यं ॥ कर्मत्वकर्तृत्वावस्थाभेदोपाधिकं तत्समानाधिकरणक्रियाभेदमाश्रित्य व्यव
कर्मणा हारः ॥ कर्मणेति किं ॥ करणाधिकरणाभ्यां तुल्यक्रिये पूर्वोक्ते साध्वसिरित्यादौ मा भूत् ॥ किंच ॥ कर्तृस्थक्रियेभ्यो माभू कर्मवत्
त् ॥ गच्छति ग्रामः ॥ आरोहति हस्ती ॥ अधिगच्छति शास्त्रार्थः स्मरति श्रद्दधाति च ॥ यत्र कर्मणि क्रियाकृतो विशेषो दृश्यते ॥ य
था पक्वेषु तंडुलेषु यथा वा छिन्नेषु काष्ठेषु ॥ तत्र कर्मकर्तुः क्रिया न तत्र ॥ न हि पक्वापक्वतंडुलेष्विव गतागतग्रामेषु वैलक्ष पचनादिविकृतिकं

ण्यमुपलक्ष्यते॥ करोतिरुत्साहनार्थः॥ उत्साहितश्च कर्मस्थानेन कारिष्यते घट इत्यादि॥ यत्नार्थे त्वेतु नैतत्सिध्येत्॥ हानेका ति॰ भाव॰
द्विघलस्य कर्तृस्थत्वात्॥ एतेन अनुष्ठवस्य मानेर्थे इति व्याख्यातं॥ कर्तृस्थत्वेन युगत्तावात्॥ श्यनि कृते ओलोपे चन्द्रपत्ति
॥सि॰कौ॰॥ दुः॥ नाडीत्यादावयं वानस्वनत्वात्मनेपदं॥ सकर्मकाणां प्रतिषेधो वक्तव्यः॥ अन्योन्यं स्पृशतः॥ अजा ग्रामं नयति॥ दुहि कर्मवद्भवप्रति
॥१०२॥ पच्योर्बहुलं सकर्मकयोरिति वाच्यं॥ न दुहस्नुनमां यक्चिणौ॥ एषां कर्मकर्तरि यक्चिणौ न स्तः॥ दुहेरनेन यक एव निषे
धः॥ चिण्तु विकल्पिष्यते॥ शपो लुक्॥ गौः पयो दुग्धे॥ अतः कर्मकर्तरि॥ अजनितास्तु चिण्वा स्यात्कर्मकर्तरि तशब्दे परे॥ अ
दुग्ध॥ दुहे वा॥ अदोहि॥ पक्षे क्सः॥ लुग्वेति पक्षे लुक्॥ अदुग्ध॥ अधुक्षत॥ उदुम्बरः फलं पच्यते॥ सृजियुजोः श्यंस्तु॥ अन
योः सकर्मकयोः कर्ता बहुलं कर्मवत्स्यात् यगपवादश्च श्यन्वा वाच्य इत्यर्थः॥ सृजेः श्रद्धोपपन्ने कर्तर्येवेति वाच्यं॥ सृज्यते स्रजं
भक्तः॥ श्रद्धयानिष्पादयतीत्यर्थः॥ असर्जि॥ युज्यते ब्रह्मचारी योगं॥ भूषाकर्मकिरादिसनां चान्यत्रात्मनेपदात्॥ भूषा ॥१०२॥
वाचिनां किरादीनां सनन्तानां च यक्चिणौ चिण्वदिट् च नेति वाच्यमित्यर्थः॥ अलंकुरुते कन्या॥ अलमकृत॥ अवकिरते ह
स्ती॥ अवाकीर्ष्ट॥ गिरते॥ अगीर्ष्ट॥ आद्रियते॥ आदृत॥ किरादिस्तु हा घंतर्गणः॥ चिकीर्षते घटः॥ अचिकीर्षिष्ट॥ इद्धायां क

कर्तृस्थत्वेपि करोतिः॥ क्रियापेक्षं इह कर्मस्थक्रियात्वं॥ नरुधः॥ अस्माद्यक्चिण्नस्यात्॥ अवारुद्ध गौः॥ कर्मकर्तरीत्येव॥ अवा
रोधि गौर्गोपेन॥ तपस्तपःकर्मकस्यैव॥ कर्ता कर्मवत्स्यात्॥ विध्यर्थमिदं॥ एवकारस्तु व्यर्थ एवेति हृत्स्नानुसारिणः॥ तप्यते
तपस्तापसः॥ अर्जयतीत्यर्थः॥ तपोनुतापे चेति चिण्निषेधात्सिच्॥ अतप्त॥ तपःकर्मकस्येति किं॥ उत्तपति सुवर्णं सुव
र्णकारः॥ न दुहस्नुनमां यक्चिणौ॥ प्रस्नुते॥ प्रस्नविष्ट॥ प्रस्नोष्ट॥ नमते दण्डः॥ अनंस्त॥ अन्तर्भावितण्यर्थोद्व्यनाभिः॥ यक्चिणोः
प्रतिषेधे हेतुमण्णिश्रिब्रूञामुपसंख्यानं॥ कारयते॥ अचीकरत॥ उच्छ्रयते दण्डः॥ उदशिश्रियत॥ चिण्वदिट् तु स्यादेव॥ कारि
ष्यते॥ उच्छ्रायिष्यते॥ ब्रूते कथा॥ अवोचत॥ भारद्वाजीयाः पठन्ति॥ णिश्रिग्रन्थिग्रन्थिब्रूञात्मनेपदाकर्मकाणामुपसंख्यानं॥ पु
च्छ उत्पुच्छयते॥ उत्पुच्छयते गौः॥ अन्तर्भावितण्यर्थतायां॥ उत्पुच्छयते गां॥ उदपुपुच्छत॥ यक्चिणोः प्रतिषेधाद्धुर्वडो॥ श्रंपि
ग्रन्थोराध्यमीयत्वात् ञिकसावपक्षे ग्रहणं ग्रन्थति ग्रन्थं॥ श्रन्थति मेखलां देवदत्तः॥ ग्रन्थते ग्रन्थः॥ अग्रन्थिष्ट॥ श्रन्थते मेखला॥ अ
श्रन्थिष्ट॥ कैय्यादिकपाठकश्च प्रीतेः॥ ग्रन्थिजेत्स्वयमेव॥ विकुर्वते सैन्धवाः॥ वल्गन्तीत्यर्थः॥ वेशाद् कर्मणोऽकर्मकाशेतितङ्
अन्तर्भावितण्यर्थस्य पुनःप्रेषणत्यागे विकुर्वते सैन्धवाः॥ व्यकारिष्ट॥ व्यकारिषातां॥ व्यकारिषत॥ व्यकृत॥ व्यकृषातां॥
व्यकृषत॥ कुषिरजोः प्राचां श्यन्परस्मैपदं च॥ अनयोः कर्मकर्तरि न यक् किन्तु श्यन्परस्मैपदं चात्मनेपदापवादः॥ कुष्यति॥

पुनःकर्तृत्वविवक्षायां उत्पुच्छयते गौः ४

५३

कुष्यते पादः ॥ रज्यति रज्यते वस्त्रं ॥ यगविषये तु नास्य प्रवृत्तिः ॥ कोषिषीष्ट ॥ रंसीष्ट ॥ ॥ इति कर्मकर्तृप्रक्रिया ॥ ॥ मि० ८०
॥सि० ५०॥ ॥ ॥ अभिज्ञावचने लृट् ॥ स्मृतिबोधिन्युपपदे भूतानद्यतने धातोर्लृट् स्याल्लङोऽपवादः ॥ स्मरसि कृष्ण गोकुले वत्स्यामः ॥ एवं
बुध्यसे चेतसे इत्यादियोगेपि ॥ तेषामपि प्रकरणादिवशेन स्मृत्यर्थत्वसंभवात् ॥ न यदि ॥ यद्योगे उक्तं न ॥ अभिजानासि कृष्ण
॥०३॥ यद्वने ऽभुंज्महि ॥ विभाषा साकांक्षे ॥ उक्तविषये लृट् स्यात् ॥ लक्ष्यलक्षणभावेन साकांक्षश्चेद्धात्वर्थः ॥ स्मरसि कृष्ण वने वत्स्या
मस्तत्र गाश्चारयिष्यामः ॥ वासो लक्षणं चारणं लक्ष्यं ॥ पक्षे लङ् ॥ यद्वत्प्रयोगेपि नयदीति बाधित्वा परत्वात्किलस्य ॥ परोक्षे लिट् ॥
वकारः ॥ उत्तमपुरुषे चित्तविक्षेपादिना पारोक्ष्यं ॥ सुप्तोहं किल विललाप ॥ बभूव भगदपुरस्तात्तस्य मत्ता किलाहं ॥ अत्यंतापह्नवे
लिङ्वक्तव्यः ॥ कलिंगेष्ववात्सीः ॥ नाहं कलिंगान् जगाम ॥ हशश्वतोर्लङ् च ॥ अनयोरुपपदयोर्लिड्विषये लङ् स्याच्चाल्लिट् ॥ इति ह
करोत् चकार वा ॥ शश्वदकरोत् चकार वा ॥ प्रश्ने चासन्नकाले ॥ प्रष्टव्यः प्रश्नः ॥ आसन्नकाले पृच्छ्यमाने ऽर्थे लिड्विषये लङ्लिटौ स्तः ॥
अगच्छत् किं ॥ जगाम किं ॥ आसन्ने तु कंसं जघान किं ॥ लट् स्मे ॥ लिटोपवादः ॥ यजति स्म युधिष्ठिरः ॥ अपरोक्षे च ॥ भूतानद्य ॥०४॥
तने लट् स्यात् स्मयोगे ॥ एवं स्म पिता ब्रवीति ॥ ननौ पृष्टप्रतिवचने ॥ अनद्यतनपरोक्ष इति निवृत्तं ॥ भूते लट् स्यात् ॥ अकार्षीः किं ॥
ननु करोमि भोः ॥ नन्वोर्विभाषा ॥ अकार्षीः किं ॥ न करोमि नाकार्षं ॥ अहं नु करोमि ॥ अहं न्वकार्षं ॥ पुरि लुङ् चास्मे ॥ अनद्यतन

अना २

ग्रहणं मंडूकप्लुत्यानुवर्तते ॥ पुराशब्दयोगे भूतानद्यतने विभाषया लुङ् चाल्लट् न तु स्मयोगे ॥ पक्षे यथाप्राप्तं ॥ वसंतीह पुरा छात्राः ॥
अवात्सुः ॥ अवसन् ॥ ऊषुर्वा ॥ अस्मे किं ॥ यजति स्म पुरा ॥ भविष्यतीत्यनुवर्तमाने ॥ यावत्पुरानिपातयोर्लट् ॥ यावद्भुंक्ते ॥ पुरा भुं
क्ते ॥ निपातावेतौ निश्चयं द्योतयतः ॥ निपातयोः किं ॥ यावद्दास्यते तावद्भोक्ष्यते ॥ करणभूतया पुरा यास्यति ॥ विभाषा कदाकर्ह्योः ॥ पुर्वीः
कर्ह्योः ॥ भविष्यति लट् स्यात् ॥ कदा कर्हि वा भुंक्ते ॥ भोक्ष्यते भोक्ता वा ॥ किंवृत्ते लिप्सायां ॥ भविष्यति लट् स्यात् ॥ कं कतरं कतमं वा भो
जयसि भोजयिष्यसि भोजयितासि वा ॥ लिप्सायां किं ॥ कः पाटलिपुत्रं गमिष्यति ॥ लिप्स्यमानसिद्धौ च ॥ लिप्स्यमानेनान्नादि
ना स्वर्गादिसिद्धौ गम्यमानायां भविष्यति लड्वा स्यात् ॥ योन्नं ददाति दास्यति दाता वा स स्वर्गं याति यास्यति याता वा ॥ लोडर्थलक्ष
णे च ॥ लोडर्थः प्रैषादिर्लक्ष्यते येन तस्मिन्नर्थे वर्तमानाद्धातोर्भविष्यति लड्वा स्यात् ॥ कृष्णश्चेद्भुंक्ते त्वं गाश्चारय ॥ पक्षे लृङ्लुटौ ॥
लिङ् चोर्ध्वमौहूर्तिके ॥ ऊर्ध्वं मुहूर्ताद्भव ऊर्ध्वमौहूर्तिकः ॥ निपातनात्समासः ॥ उत्तरपदवृद्धिश्च ॥ ऊर्ध्वमौहूर्तिके भविष्यति लोड
र्थलक्षणे वर्तमानाद्धातोर्लिङ् लट् वा स्तः ॥ मुहूर्तादुपरि उपाध्यायश्चेदागच्छेदागच्छत्यागमिष्यत्यागंता वा ॥ अथ त्वं छंदोधीष्व ॥
वर्तमानसामीप्ये वर्तमानवद्वा ॥ समीपमेव सामीप्यं ॥ स्वार्थे ष्यञ् ॥ वर्तमाने लडादयस्त उणादयो वा भूमितिर्यावत्यनोपा
धिना प्रत्यया उक्तास्ते तथैव वर्तमानसमीपे भूते भविष्यति च वा स्युः ॥ कदागतोसि ॥ अयमागच्छामि ॥ अयमागमं ॥ कदाग

ष्यसि ॥ एष गच्छामि गमिष्यामि वा ॥ आशंसायां भूतवच्च ॥ वर्त्तमानसामीप्य इति नानुवर्त्तते ॥ भविष्यति काले भूतवद्वर्त्तमा ति॰ ७०
॥ सि॰ ५० ॥ नवच्च प्रत्यया वा स्युराशंसायां ॥ देवश्चेदवर्षीद्वर्षति वर्षिष्यति वा ॥ धान्यमवाप्स्म वपामो वप्स्यामो वा ॥ सामान्यातिदेशे
विशेषानतिदेशः ॥ तेन लङ्लिटौ न ॥ क्षिप्रवचने लृट् ॥ क्षिप्रपर्याये उपपदे पूर्वविप्रतिषेधेन लृट् स्यात् ॥ वृष्टिश्चेत्क्षिप्रमाशु त्वरि
॥ ७५ ॥ तं वा यास्यति ॥ शीघ्रं वप्स्यामः ॥ नेति वक्तव्ये लृङ्ग्रहणं लुटोऽपि विषये यथा स्यात् ॥ श्वः शीघ्रं वप्स्यामः ॥ आशंसावचने लिङ् ॥ आ
शंसावाचिन्युपपदे भविष्यति लिङ् स्यान्न तु भूतवत् ॥ गुरुश्चेदुपेयादाशंसेऽधीयीय ॥ आशंसे क्षिप्रमधीयीय ॥ नानद्यतनव
त्क्रियाप्रबन्धसामीप्ययोः ॥ क्रियायाः सातत्ये सामीप्ये च लङ्लुटौ न ॥ यावज्जीवमन्नमदाद्दास्यति वा ॥ सामीप्यं तुल्यजातीये ३॰
नाव्यवधानं ॥ येयं पौर्णमास्यतिक्रान्ता तस्यामग्नीनाधित ॥ सोमेनायष्ट ॥ येयममावास्या आगामिनी तस्यामग्नीनाधास्य
ते ॥ सोमेन यक्ष्यते ॥ भविष्यति मर्यादावचनेऽवरस्मिन् ॥ भविष्यति काले मर्यादोक्तावरस्मिन्प्रविभागेऽनद्यतनवन्न ॥ यो
ऽयमध्वा गन्तव्य आपाटलिपुत्रात्तस्य यदवरं कौशाम्ब्याः तत्र सक्तून्पास्यामः ॥ कालविभागे चानहोरात्राणां ॥ पूर्वसूत्रं सर्वम ॥ ७५ ॥
नुवर्त्तते ॥ अहोरात्रसंबन्धिनि विभागे प्रतिषेधार्थमिदं ॥ योगविभाग उत्तरार्थः ॥ योऽयं वत्सर आगामी तस्य यदवरमाग्रहा
यण्यास्तत्र युक्ता अध्येष्यामहे ॥ अनहोरात्राणां किं ॥ योऽयं मास आगामी तस्य योऽवरः पञ्चदशरात्रस्तत्राध्येतास्महे ॥ भ

परस्मिन्विभाषा ॥ अवरस्मिन्नित्यपूर्वं सूत्रद्वयमनुवर्त्तते ॥ अप्राप्तविभाषेयं ॥ योऽयं संवत्सर आगामी तस्य यत्परमाग्रहायण्यास्तत्राध्ये
ष्यामहे ॥ अध्येतास्महे ॥ लिङ्निमित्ते लृङ्क्रियातिपत्तौ ॥ भविष्यतीत्येव ॥ सुवृष्टिश्चेदभविष्यत्तदा सुभिक्षमभविष्यत् ॥ भूते च ॥
पूर्वसूत्रं संपूर्णमनुवर्त्तते ॥ वोताप्योः ॥ वा आ उताप्योरिति छेदः ॥ उताप्योरित्यतः प्राक्भूते लिङ्निमित्ते लृङ् वेत्यधिक्रियते ॥ पूर्वसू
त्रं तु उताप्योरित्यादौ प्रवर्त्तत इति विवेकः ॥ गर्हायां लडपिजात्वोः ॥ आभ्यां योगे लट् स्यात् कालत्रये गर्हायां ॥ लुङादीन्परत्वादयं बाध
ते ॥ अपि जायां त्यजसि जातु गणिकामाधत्से ॥ गर्हितमेतत् ॥ विभाषा कथमि लिङ् च ॥ गर्हायामित्येव ॥ कालत्रये लिङ् ॥ वा लट् ॥
कथं धर्मं त्यजेः ॥ त्यजसि वा ॥ पक्षे कालत्रयलकाराः ॥ अत्र भविष्यति नित्यं लृट् ॥ त्यजेत् वा ॥ कथं नाम तत्रभवान्धर्ममत्यक्षत् ॥ किं
वृत्ते लिङ्लृटौ ॥ गर्हायामित्येव ॥ विभाषा तु नानुवर्त्तते ॥ कः कतरः कतमो वा हरिं निन्देत् ॥ निंदिष्यति वा ॥ लङ् प्राग्वत् ॥ अनव
क्लृप्त्यमर्षयोरकिंवृत्तेऽपि ॥ गर्हायामिति निवृत्तं ॥ अनवक्लृप्तिरसंभावना ॥ अमर्षोऽक्षमा ॥ न संभावयामि न मर्षये वा भवान्हरिं
निन्देत् निंदिष्यति वा ॥ लङ् प्राग्वत् ॥ किंकिलास्त्यर्थेषु लृट् ॥ अनवक्लृप्त्यमर्षयोरित्येतद्द्वयं
चेति यावदनुवर्त्तते ॥ किंकिलेति हि समुदायः क्रोधद्योतक उपपदं ॥ अस्त्यर्थाः ॥ अस्ति भवति विद्यतयः ॥ लिङोऽपवादः ॥ न श्रद्दधे

नमर्षये वा किं किल त्वं शूद्रान्नं भोक्ष्यसे ॥ अस्ति भवति विद्यते वा श्राद्धीं गमिष्यति ॥ अत्र लृङ् न ॥ जातुयदोर्लिङ् ॥ यदायद्योरुपसंख्यानं ॥ ति०लका०
॥सि०उ०॥ लृटोपवादः ॥ जातु यत् यदा यदि वा त्वादृशो हरिं निंदेत् नावकल्पयामि न मर्षयामि ॥ लङ् प्राग्वत् ॥ यच्चयत्रयोः ॥ यच्च यत्र वा त्वमे
वं कुर्याः ॥ न श्रद्दधे न मर्षयामि ॥ गर्हायां च ॥ अनवक्लृप्त्यमर्षयोरिति निवृत्तं ॥ यच्चयत्रयोर्योगे गर्हायां लिङ् स्यात् ॥ यच्च यत्र
वा त्वं शूद्रं याजयेः ॥ अन्याय्यमेतत् ॥ चित्रीकरणे च ॥ यच्च यत्र वा त्वं शूद्रं याजयेः आश्चर्यमेतत् ॥ शेषे लृडयदौ ॥ यच्चयत्राभ्याम
॥७५॥ न्यस्मिन्नुपपदे चित्रीकरणे गम्ये धातोर्लृट् स्यात् ॥ आश्चर्यमंधो नाम कृष्णं द्रक्ष्यति ॥ अयदौ किं ॥ आश्चर्यं यदि सोऽधीयीत ॥ उता
प्योः समर्थयोर्लिङ् ॥ बाढमित्यर्थे अनयोस्तुल्यार्थता ॥ उत अपि वा हन्यात् घनं हरिः ॥ समर्थयोः किं ॥ उत दंडः पतिष्यति ॥ अपिधास्य
ति द्वारं ॥ प्रश्नः प्रच्छादनं च गम्यते ॥ इतः प्रभृति लिङ्निमित्ते क्रियातिपत्तौ भूतेऽपि नित्यो लृङ् ॥ कामप्रवेदनेऽकच्चिति ॥ स्वाभिप्रा
याविष्करणं गम्यमाने लिङ् स्यान्न तु कच्चिति ॥ कामो मे भुञ्जीत भवान् ॥ अकच्चितीति किं ॥ कच्चिज्जीवति ॥ संभावनेऽलमिति चेन्नु ॥७५॥
त्सिद्धाप्रयोगे ॥ अलमर्थो ऽप्रौढः ॥ संभावनमिति अलमिति च प्रथमया सप्तम्या च विपरिणम्यते ॥ संभावनेऽर्थे लिङ् स्यात्तच्च
त्संभावनमलमिति सिद्धाप्रयोगे सति ॥ अपि गिरिं शिरसा भिंद्यात् ॥ सिद्धाप्रयोगे किं ॥ अलं कृष्णो हस्तिनं हनिष्यति ॥ विभाषा
धातौ संभावनवचनेऽयदि ॥ पूर्वसूत्रमनुवर्तते ॥ संभावनेऽर्थे धातावुपपदे उक्तेऽर्थे लिङ् वा स्यान्न तु यदि ॥ पूर्वेण नित्ये प्राप्ते वचनं ॥

संभावयामि भुञ्जीत भोक्ष्यते वा भवान् ॥ अयदि किं ॥ संभावयामि यद्भुञ्जीथास्त्वं ॥ हेतुहेतुमतोर्लिङ् ॥ वा स्यात् ॥ कृष्णं नमेच्चेत्सुखं
यायात् ॥ कृष्णं नंस्यति चेत्सुखं यास्यति ॥ भविष्यत्येवेष्यते ॥ नेह ॥ हंतीति पलायते ॥ इच्छार्थेषु लिङ्लोटौ ॥ इच्छामि भुञ्जीत भुंक्तां
वा भवान् ॥ एवं कामये प्रार्थये इत्यादियोगे बोध्यं ॥ कामप्रवेदन इति वक्तव्यं ॥ नेह ॥ इच्छन्करोति ॥ लिङ् च ॥ समानकर्तृकेषु इच्छा
र्थेषूपपदेषु लिङ् स्यात् ॥ भुञ्जीयेतीच्छति ॥ इच्छार्थेभ्यो विभाषा वर्तमाने ॥ लिङ् स्यात् पक्षे लट् ॥ इच्छेत् ॥ इच्छति ॥ कामयेत ॥ का
मयते ॥ विधिनिमंत्रणेति लिङ् ॥ विधौ ॥ यजेत ॥ निमंत्रणे ॥ इह भुञ्जीत भवान् ॥ आमंत्रणे ॥ इहासीत ॥ अधीष्टे ॥ पुत्रमध्यापये
द्भवान् ॥ संप्रश्ने ॥ किं भो वेदमधीयीय उत तर्कं ॥ प्रार्थने ॥ भो भोजनं लभेय ॥ एवं लोट् ॥ प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च ॥ प्रैषो विधिः अ
तिसर्गः कामचारानुज्ञा ॥ भवता यष्टव्यं ॥ भवान्यजतां ॥ चकारेण लोटोऽनुकर्षणं प्राप्तकालार्थं ॥ लिङ् चोर्ध्वमौहूर्तिके ॥ प्रैषादयोऽनुव
र्त्तंते ॥ मुहूर्तादूर्ध्वं यजेत ॥ यजतां ॥ यष्टव्यं ॥ स्मे लोट् ॥ पूर्वसूत्रस्य विषये ॥ लिङ्कृत्यानां चापवादः ॥ ऊर्ध्वं मुहूर्ताद्यजतां स्म ॥ अधी
ष्टे च ॥ स्मे उपपदे अधीष्टे लोट् स्यात् ॥ त्वं स्म अध्यापय ॥ लिङ् यदि ॥ यत्कृदुपपदे कालसमयवेलासु लिङ् स्यात् ॥ कालः समयो वे
ला वा यद्भुञ्जीत भवान् ॥ अर्हे कृत्यतृचश्च ॥ चाल्लिङ् ॥ त्वं कन्यां वहेः ॥ शकि लिङ् च ॥ शक्तौ लिङ् स्यात् चात्कृत्याः ॥ भारं त्वं वहेः ॥ माङि लुङ् ॥ मा
कार्षीः ॥ कथं मा भवतु मा भविष्यति ॥ नायं माङ् ॥ किंतु माशब्दः ॥ धातुसंबंधे प्रत्ययाः ॥ धात्वर्थानां संबंधे यत्र काले प्रत्यया उक्तास्ते

तोन्यत्रापिस्युः॥ तिङंतवाच्यक्रियायाः प्राधान्यात्तदनुरोधेन गुणभूतक्रियावाचिभ्यः प्रत्ययाः॥ वसन्दर्शः॥ भूतेलङ्॥ अतीतवासकर्तृकं ति॰ लका॰
॥सि॰कौ॰॥ दर्शनमभिसर्पः॥ सोमयाज्यस्य पुत्रो भविता॥ सोमेन यस्य माणार्थः पुत्रस्तत्कर्तृकं सवनं॥ क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तत
॥७८॥ ध्वमोः॥ पौनःपुन्ये भृशार्थे च द्योत्ये धातोर्लोट् स्यात्तस्य हिस्वौ स्तस्तिङामपवादः॥ तौ च हिस्वौ क्रमेण परस्मैपदात्मनेपदसंज्ञौ स्त
स्तिङ्संज्ञौ च॥ तध्वमोर्विषये तु हिस्वौ वास्तः॥ पुरुषैकवचनसंज्ञे तु नानयोरतिदिश्येते॥ हिस्वविधानसामर्थ्यात्॥ तेन सकलपुरुषवचन
विषयपरस्मैपदिभ्यो हिः कर्तरि॥ आत्मनेपदिभ्यः स्वः भावकर्मकर्तृषु॥ समुच्चयेऽन्यतरस्यां॥ अनेकक्रियासमुच्चये द्योत्ये प्रागुक्तं वा स्यात्॥
यथाविध्यनुप्रयोगः पूर्वस्मिन्॥ आद्ये लोड्विधाने लोट्प्रकृतिभूत एव धातुरनुप्रयोज्यः॥ समुच्चये सामान्यवचनस्य॥ समुच्चये लोड्विधौ
सामान्यार्थस्य धातोरनुप्रयोगः स्यात्॥ अनुप्रयोगाद्यथायथं ल[illegible]स्यात्तिबाद्यश्च॥ ततः संख्याकालयोः पुरुषविशेषस्य चाभिव्यक्तिः
क्रियासमभिहारे द्वे वाच्ये॥ याहियाहीतियाति॥ पुनःपुनरतिशयेन वा यानं याह्यस्यार्थः॥ एककर्तृकं वर्तमानं यानं यातीत्यस्य॥ इतिशब्द
स्तत्सदान्वये तात्पर्यं ग्राहयति॥ एवं यातः॥ यांति॥ यासि॥ याथः॥ याथ॥ यातयातेति यूयं याथ॥ याहियाहीत्ययासीत् यास्यति वा॥ अधीष्वा ॥७८॥
धीष्वेत्यधीते॥ ध्वंविषयपक्षे अधीध्वमधीध्वमिति यूयमधीध्वे॥ समुच्चये तु सक्तून्पिब धानाः खादेत्यभ्यवहरति॥ अन्नं भुंक्ष्व द
धिकमास्वादेत्यभ्यवहरते॥ तध्वमोः सक्तून्पिबत खादतेत्यभ्यवहरथ॥ भुंग्ध्वमास्वादध्वमित्यभ्यवहरध्वे॥ पक्षे हिस्वौ॥ अत्र समुच्चीय

मानविशेषाणामनुप्रयोगार्थेन सामान्येनाभेदान्वयः॥ पक्षे सक्तून्पिबति॥ धानाः खादति॥ अन्नं भुंक्ते॥ दधिकमास्वादते॥
एतेन॥ पुरीमवस्कंद लुनीहि नंदनं मुषाण रत्नानि हरामरांगनाः॥ विगृह्य चक्रे नमुचिद्विषा बली य इत्थमस्वास्थ्यमहर्दिवं दिवः॥१॥ इति
व्याख्यातं॥ अवस्कंदनलवनादिरूपाभूतानद्यतनपरोक्षा एककर्तृका अस्वास्थ्यक्रियास्सर्वाहः॥ इह पुनःपुनरवस्कंदस्वादिरर्थ इति
तु व्याख्यानं त्वसमूलमेव॥ द्वितीयस्त्वेव क्रियासमभिहार इत्यस्यानुवृत्तेः॥ लोडंतद्वित्वोपपत्तेश्च॥ पुरीमवस्कंदेत्यादि मध्यम
पुरुषैकवचनमित्यपि केचिदिति क्रम एव॥ पुरुषवचनसंज्ञे इहनेत्युक्तत्वात्॥ ॥ इतिलकारार्थप्रक्रिया॥ ॥श्री॥ ॥धातोः॥
आतृतीयसमाप्तेरधिकारोयं॥ तत्रोपपदं सप्तमीस्थं॥ कृदतिङ्॥ वासरूपोऽस्त्रियां॥ परिभाषेयं॥ अस्मिन्धात्वधिकारेऽसरू
पोऽपवादप्रत्यय उत्सर्गस्य बाधकः स्याद्वा स्त्र्यधिकारोक्तं विना॥ कृत्याः॥ अधिकारोयं॥ ण्वुलः प्रा[illegible]॥ कर्तरि कृत्॥ कृत्प्रत्य
यः कर्तरि स्यादिति प्राप्ते॥ तयोरेव कृत्यक्तखलर्थाः॥ एते भावकर्मणोरेव स्युः॥ तव्यत्तव्यानीयरः॥ धातोरेते प्रत्ययाः स्युः॥ तयो
रेवार्थौ॥ एधितव्यं॥ एधनीयं त्वया॥ भावे औत्सर्गिकमेकवचनं क्लीबत्वं च॥ चेतव्यश्चयनीयो वा धर्मस्त्वया॥ वसेस्तव्यत्कर्तरि
च॥ वसतीति वास्तव्यः॥ केलिमर उपसंख्यानं॥ पचेलिमा माषाः॥ पक्तव्या इत्यर्थः॥ भिदेलिमाः सरलाः॥ भेत्तव्या इत्यर्थः॥ कर्मणि प्र
त्ययः॥ वृत्तिकारस्तु कर्मकर्तरि चायमिष्यत इत्याह तद्भाष्यवार्तिकविरुद्धं॥ कृत्यचः॥ उपसर्गस्थान्निमित्तात्परस्याच उत्तरस्य कृ

कृत्नस्यणत्वंस्यात्॥ प्रयाणीयं॥ अत्र किं॥ प्रमग्नः॥ निर्विणस्योपसंख्यानं॥ अत्र परत्वाभावान्नकारव्यवधानाभावाच्चाप्राप्ते वचनं॥ कृ॰ं॰कृ॰
परस्यणत्वं॥ पूर्वस्याह्नुत्वं॥ निर्विण्णः॥ णेर्विभाषा॥ उपसर्गस्थान्निमित्तात्परस्य ण्यन्ताद्धिहितो यः कृत्तस्य नस्य णो वा स्यात्॥ प्रयापणीयं॥
॥सि॰कौ॰॥ प्रयापनीयं॥ विहितविशेषणं किं॥ यकाव्यवधानेपि यथा स्यात्॥ प्रयाप्यमाणं प्रयाप्य॥ णत्वे दुरः॥ उपसर्गत्वं नेत्युक्तं॥ दुर्यानं॥ दुर्यापनं॥ हल
॥१७७॥ श्चेजुपधात्॥ हलादेरिजुपधात्कृत्नस्य वा णः परस्य णो वा स्यात्॥ प्रकोपणीयं॥ प्रकोपनीयं॥ हलः किं॥ प्रोहणीयं॥ इजुपधात्किं॥ प्रव
पणीयं॥ इजादेः सनुमः॥ सनुमश्चेद्भवति इजादेर्हलन्तात् विहितो यः कृत्तस्यैव॥ प्रेंखणीयं॥ इजादेः किं॥ प्रगिस्पर्पणे॥ प्रमङ्गनी
यं॥ नुम्ग्रहणमनुस्वारोपलक्षणार्थं॥ अट्कुप्वाङिति सूत्रेप्येवं॥ तेनेह न॥ प्रेन्वनं॥ इह तु स्यादेव॥ प्रोंषणं॥ वा निंस निक्ष निंदां
एषां नस्य णो वा स्यात् कृति परे॥ प्रणिंसितव्यं॥ प्रनिंसितव्यं॥ न भाभूपूकमिगमिप्यायीवेपां॥ एभ्यः कृन्नस्य णो न॥ प्रभानीयं॥
प्रभवनीयं॥ पूञ एव ग्रहणमिष्यते॥ पूङस्तु प्रपवणीयः सोमः॥ ण्यन्तभादीनामुपसंख्यानं॥ प्रभापनीयं॥ कुशाग्रम्नः शस्ययाविक्ष
नं॥ णत्वप्रकरणोपरितद्बोध्यं॥ षत्वस्यासिद्धत्वेन शकारव्यवधानान्न णत्वं॥ प्रख्यानीयं॥ ॥कृत्स्वद्राबकुर्कं॥ स्वां ॥१७७॥
त्सनेनस्नानीयं चूर्णं॥ दीयते स्मै दानीयो विप्रः॥ अचोयत्॥ अजन्ताद्धातोर्यत् स्यात्॥ चेयं॥ जेयं॥ अज्ग्रहणं शक्यमकर्तुं॥ योग
विभागोप्येवं॥ तव्यदादिष्वेव यतोपि सुपठत्वात्॥ ईद्यति॥ यति परे आत ईत्स्यात्॥ गुणः॥ देयं॥ ग्लेयं॥ तकिशसिचतियतिजनिभ्यो

प

यद्वाच्यः॥ तक्यं॥ शस्यं॥ चत्यं॥ यत्यं॥ जन्यं॥ जनेर्यद्विधिः स्वरार्थः॥ ण्यत्तापि रूपसिद्धेः॥ न वृद्धिप्रसंगः॥ जनिवध्योश्चेति नि
षेधात्॥ हनोवा यद्वधश्च॥ वध्यं॥ पक्षे वक्ष्यमाणो ण्यत्॥ घात्यः॥ पोरदुपधात्॥ पवर्गान्ताददुपधात् यत् ण्यतोपवादः॥ शप्यं
लभ्यं॥ नानुबंधकृतमसारूप्यं॥ अतो न ण्यत्॥ तव्यदादयस्तु स्युरेव॥ आङोयि॥ आङः परस्य लभेर्नुम् यादौ प्रत्यये विवक्षिते
नुमि कृते उपधत्वाभावाण्ण्यदेव॥ आलंभ्या गौः॥ उपात्प्रशंसायां॥ उपलंभ्यः साधुः॥ स्तुतौ किं॥ उपलभ्यमस्माच्छाकाद उपलभ्यः॥ शकिस
होश्च॥ शक्यं॥ सह्यं॥ गदमदचरयमश्चानुपसर्गे॥ गद्यं॥ मद्यं॥ चर्यं॥ चरेराङि चागुरौ॥ आचर्यो देशः॥ गंतव्य इत्यर्थः॥ अगु
रौ किं॥ आचार्यो गुरुः॥ यमेर्नियमार्थं॥ सोपसर्गान्मा भूदिति॥ प्रयाम्यं॥ निपूर्वात्स्यादेव॥ तेन न तत्रत्यवृद्धिनियम्यमिति वार्त्ति
कप्रयोगात्॥ एतेन नियम्यस्य नायुक्तिः॥ तथा नियम्या नवृद्धिर्व्यवस्था प्रसादिव्याख्यातं॥ नियमे साधुरिति वा॥ अवद्यप
ण्यवर्या गर्ह्यपणितव्यानिरोधेषु॥ वदेर्नञि उपपदे वदः सुपीति यत्क्यपौ॥ प्राप्तयोर्यद्वसोपि गर्ह्यायामेव सुप्रसार्यं नि
पातनं॥ अवद्यं पापं॥ गर्ह्ये किं॥ अनुद्यं गुरुनाम॥ तद्धि न गर्ह्यं॥ वचनानर्हं च॥ आत्मनाम न सादिस्मृतेः॥ पण्या गौः॥ व्यवहर्तव्ये
त्यर्थः॥ पाण्यमन्यत्॥ स्तुत्यमित्यर्थः॥ अनिरोधोऽप्रतिबंधः॥ तस्मिन्विषये वृङो यत्॥ शतेन वर्या कन्या॥ वृत्यान्या॥ वहं क
रणं॥ वह्यं स्यनेनेति वह्यं शकटं॥ करणे किं॥ वाह्यं वोढव्यं॥ अर्यः स्वामिवैश्ययोः॥ ऋगतौ॥ अस्मात् यत्॥ ण्यतोपवादः॥ अ

॥सि॰कौ॰॥ अर्यः स्वामिवैश्ययोः ॥ अनयोः किं ॥ आर्यो ब्राह्मणः ॥ प्राप्तव्य इत्यर्थः ॥ उपसर्या काल्या प्रजने ॥ गर्भग्रहणे प्राप्तकाला चेदित्यर्थः ॥ उप
सर्या गौः ॥ गर्भाधानार्थं वृषभेणोपगन्तुं योग्येत्यर्थः ॥ प्रजने काल्येति किं ॥ उपसार्या काशी ॥ प्राप्तव्येत्यर्थः ॥ अजर्यं संगतं ॥ नञ्पूर्वान्जी
र्यतेः कर्तरि यत् संगतं चेद्विशेष्यं ॥ न जीर्यतीत्यजर्यं ॥ तेन संगतमार्येण रामाजर्यं कुरु द्रुतमिति भट्टिः ॥ मृगैरजर्यं जरसोपदिष्टमदेह
१०७॥ बंधाय पुनर्बबंधे इत्यत्र तु संगतमिति विशेष्यमध्याहार्यं ॥ संगतं किं ॥ अजरिता कंबलः ॥ भावे तु संगत कर्तृके पिण्यदेव ॥ अजार्यं
संगतेन ॥ वदः सुपि क्यप् च ॥ अनुपसर्गात् सुप्युपपदे वदेः क्यप् स्यात् ॥ ब्रह्मोद्यं ॥ ब्रह्म यं
वद्यं ॥ भुवो भावे ॥ क्यप् स्यात् ॥ ब्रह्मणो भावो ब्रह्मभूयं ॥ सुपीत्येव ॥ भव्यं ॥ अनुपसर्ग इत्येव ॥ प्रभव्यं ॥ हनस्त च ॥ अनुपसर्गे सुप्युपप
दे हन्तेः भावे क्यप् स्यात् तकारश्चान्तादेशः स्यात् ॥ ब्रह्मणो हननं ब्रह्महत्या ॥ स्त्रीत्वं लोकात् ॥ एतिस्तुशास्वृदृजुषः क्यप् ॥ एभ्यः क्यप् स्यात् ॥
इत्यः स्तुत्यः शिष्यः वृत्यः आदृत्यः जुष्यः ॥ इत्यः ॥ स्तुत्यः ॥ शास इदङ्हलोः ॥ शिष्यः ॥ वृ इति वृञो ग्रहणं न वृङः ॥ वृत्यः ॥ वृङस्तु वार्या ॥ ऋत्विजः ॥ आदृत्यः ॥
जुष्यः ॥ पुनः क्यब्ग्रहणं परस्यापि ण्यतो बाधनार्थं ॥ अवश्यस्तुत्यः ॥ शंसिदुहिगुहिभ्यो वेति काशिका ॥ शस्यं शंस्यं ॥ दुह्यं दोह्यं गुह्यं ॥ १०७॥
गोह्यं ॥ प्रशास्य स्वस्त्रः ॥ ईड वंद वृ शंस दुहां ण्यत इति सूत्रे वृ इत्यबलात् क्षेसेःसिद्धं ॥ इत्यर्थोस्तु मूलं मन्यं ॥ आङ्पूर्वादंजेः संज्ञायामुपसंख्या
नं ॥ आज्यं ॥ व्यक्तिम्रक्षणकांतिगतिषु ॥ बाहुल्यकालाकरणे क्यप् ॥ आनिदितां लोपः ॥ आज्यं ॥ ऋदुपधाच्चाक्लृपिचृतेः ॥ हत्यः ॥ वृत्यं ॥
+ब्रह्मवेदः तस्य वदनमित्यर्थः कर्मणि प्रत्यया विलेके उपसर्गे तु ण्यदेव अनुवाद्यं अपवाद्यं ६

वृध्यं ॥ वृध्यं ॥ कृपिचृतोस्तु कल्प्यं ॥ चर्त्यं ॥ तपरकरणं किं ॥ कृत ॥ कीर्त्यं ॥ अनित्यण्यंतास्चुरादय इति णिजभावे ण्यत् ॥ णिजन्तात्तु यदेव ॥
ई चलनः ॥ वाक्यप् ॥ आह्वनः ॥ खेयः ॥ ई चेति हस्वः सुपठः ॥ भृञोऽसंज्ञायां ॥ भृत्याः कर्मकराः ॥ भर्तव्या इत्यर्थः ॥ क्रियाशब्दोयं न संज्ञा ॥ स
म्भवकं ॥ संभृत्याः ॥ संभार्याः ॥ असंज्ञायामेव विकल्पार्थमिदं वार्त्तिकं ॥ असंज्ञायां किं ॥ भार्या नाम क्षत्रियाः ॥ अपक्कर्षतार्या वधू
रिति ॥ इहापि संज्ञायां समजेति क्यपाभाव्यं ॥ संज्ञापर्युदासस्तु पुंसि चरितार्थः ॥ सत्यं ॥ बिभर्तेः स्त्रीइति दीर्घाता भार्या ण्यत् ॥ क्यश्च
१ भवतेरेव ॥ तदनुबंधग्रहणे इति परिभाषया ॥ मृजेर्विभाषा ॥ मृजेः क्यप् वा स्यात् पक्षे ण्यत् ॥ मृज्यः ॥ चजोः कु घिण्यतोः ॥ तस्य ऋत्यस्य
कुत्वं स्यात् घिति ण्यति च ॥ मृजेर्वृद्धिः ॥ मार्ग्यः ॥ न्यंकादीनां च ॥ कुत्वं स्यात् ॥ न्यंकुः ॥ नावं चेरिक प्रत्ययः ॥ राजसूयसूर्यमृषोद्यरुच्यकु
प्यकृष्टपच्याव्यथ्याः ॥ एते सप्त क्यबंता निपात्यंते ॥ राज्ञा सोतव्यो ऽभिषवद्वारा निष्पादयितव्यः ॥ यद्वा लतात्मकः सोमो सस्यतेकंच राजा ५
ते त्वेति अधिकरणे क्यप् ॥ निपातनाद्दीर्घः ॥ राजसूयं ॥ अर्धर्चादिः ॥ सरत्याकाश इति सूर्यः ॥ कर्तरि क्यप् ॥ निपातनादुत्वं ॥ यद्वा षू
प्रेरणे तुदादिः ॥ सुवति कर्मणि लोकं प्रेरयति ॥ क्यपो रुट् ॥ मृषोपपदात् वदेः कर्मणि नित्यं क्यप् ॥ मृषोद्यं ॥ विशेष्यनिघ्नोयं ॥ उक्थाय
सो द्विर्थं गुणात्मपाघात् ॥ रोचते रुच्यः ॥ गुपेरादेः कुत्वं च संज्ञायां ॥ सुवर्णरजतभिन्नं धनं कु[illegible]प्यं ॥ कौप्यमन्यत् ॥ कृष्टे स्वयमेव पच्यंते कृ गो
ष्टपच्याः ॥ कर्मकर्तरि ॥ शुद्धे तु कर्मणि कृष्टपाक्याः ॥ न व्यथते अव्यथ्यः ॥ सिध्यंत्यस्मिन् ॥ सिदेरुश्चान्त्य क्यप् ॥ यस्मिन्नर्थ लंब ॥ तिनान्ति
निष्ठायामनिट इति वक्तव्यं गर्ग्यं

कूलं भिनत्तीति भिद्यः ॥ उज्झत्युदकमित्युद्ध्यः ॥ नदे किं ॥ भेत्ता ॥ उज्झिता ॥ पुष्यसिध्यौ नक्षत्रे ॥ अधिकरणे क्यप् निपात्यते ॥ पुष्यंत्यस्मिन्न कृं॰कृ॰
॥सि॰कौ॰॥ न्नर्था इति पुष्यः ॥ सिध्यंत्यस्मिन्नर्था इति सिध्यः ॥ विपूयविनीयजित्या मुंजकल्कहलिषु ॥ पूङो नीञो जिश्च क्यप् ॥ विपूयो मुंजः ॥ रज्ज्वादिक
रणाय शोधयितव्य इत्यर्थः ॥ विनीयः कल्कः ॥ पिष्ट औषधविशेष इत्यर्थः ॥ पापमित्यन्ये ॥ जित्यो हलिः ॥ बलेन कृष्टव्य इत्यर्थः ॥ हस
॥७९॥ भीकरणार्थं स्थूलकाष्ठं ॥ अन्यत्तु विपर्व्यं ॥ विनेयं जेयं च ॥ प्रत्यपिभ्यां ग्रहेः ॥ छंदसीति वक्तव्यं ॥ प्रतिगृह्यं ॥ अपिगृह्यं ॥ लोके तु प्रतिग्रा
ह्यं ॥ अपिग्राह्यं ॥ पदास्वैरिबाह्यापक्ष्येषु च ॥ अवगृह्यं ॥ प्रगृह्यं पदं ॥ अस्वैरी परतंत्रः ॥ गृह्यकाः शुकाः ॥ पंजरादिबंधनेन परतंत्री इत्यर्थः ॥
बाह्यायां ॥ ग्रामगृह्या सेना ॥ ग्रामबहिर्भूतेत्यर्थः ॥ स्त्रीनिर्देशात्पुंनपुंसकयोर्न ॥ पक्षभवः पक्ष्यः ॥ दिगादित्वाद्यत् ॥ आर्यैर्गृह्यते आर्यगृ
ह्यः ॥ तत्पक्षाश्रित इत्यर्थः ॥ विभाषा कृवृषोः ॥ क्यप् स्यात् ॥ कृत्यं ॥ वृष्यं ॥ पक्षे ॥ ऋहलोर्ण्यत् ॥ ऋवर्णांताद्धलंताच्च धातोर्ण्यत्स्यात् ॥ कार्यं
व वर्ष्यं ॥ युग्यं च पत्रे ॥ पत्रं वाहनं ॥ युग्यो गौः ॥ अत्र क्यप् कुत्वं च निपात्यते ॥ अमावस्यदन्यतरस्यां ॥ अमोपपदाद्वसेरधिकरणे ण्यत् ॥ ॥७९॥
द्धौ ह्रस्वत्वं पाक्षिकं ह्रस्वश्च निपात्यते ॥ अमा सह वसतोऽस्यां चंद्रार्कावित्यमावस्या वा ॥ अमावास्या वा ॥ ऋहलोर्ण्यत् ॥ चजोः
रिति कुत्वं ॥ पाक्यं ॥ पाणौ सृजेर्ण्यद्वाच्यः ॥ ऋदुपधलक्षणक्यपोऽपवादः ॥ पाणिभ्यां सृज्यते पाणिसर्ग्या रज्जुः ॥ समवपूर्वाच्च ॥ समवसर्ग्या ॥
न क्वादेः ॥ क्वादेर्धातोश्चजोः कुत्वं न ॥ गर्ज्यं ॥ वार्तिककारस्तु चजोरिति सूत्रे निष्ठायामनिट इति पूरयित्वा न क्वादेरिति प्रत्याचख्यौ ॥ ॥

तेन अर्जितर्जिप्रभृतीनां न कुत्वं निष्ठायां सेट्त्वात् ॥ शुचुग्लुचुप्रभृतीनां क्वादित्वेऽपि कुत्वं स्यादेव ॥ सूत्रमते तु यद्यपि पूर्वविरो
तमात्तं तथापि यथोत्तरं मुनीनां प्रामाण्यं ॥ अजिव्रज्योश्च ॥ न कुत्वं ॥ समाजः ॥ परिव्राजः ॥ भुजन्युब्जौ पाण्युपतापयोः ॥ एतयोरेतौ
निपात्येते ॥ भुज्यतेऽनेनेति भुजः पाणिः ॥ हलश्चेति घञ् ॥ न्युब्जंत्यस्मिन्निति न्युब्ज उपतापो रोगः ॥ पाण्युपतापयोः किं ॥ भोगः ॥ समु
६ द्गः ॥ प्रयाजानुयाजौ यज्ञांगे ॥ एतौ निपात्येते यज्ञांगे ॥ पंच प्रयाजाः ॥ त्रयोऽनुयाजाः ॥ यज्ञांगे किं ॥ प्रयागः ॥ अनुप्रयागः ॥ वंचेर्गतौ ॥ कु
त्वं न ॥ वंच्यं ॥ गतौ किं ॥ वंक्यं काष्ठं ॥ कुटिलीकृतमित्यर्थः ॥ ओक उचः के ॥ उचेर्गुणः कुत्वं निपात्येते के परे ॥ ओकः शकुंतवृषलौ ॥ इगु
पधलक्षणः कः ॥ घञा सिद्धमंतोदात्तार्थमिदं ॥ ण्य आवश्यके ॥ कुत्वं न ॥ अवश्यपाच्यं ॥ यजयाचरुचप्रवचर्चश्च ॥ ण्ये कुत्वं न ॥ याज्यं
याच्यं ॥ रोच्यं ॥ प्रवाच्यं ग्रंथविशेषः ॥ ऋच अर्च्यं ॥ ऋदुपधत्वेष्यत एव ज्ञापकात्ण्यत् ॥ त्यजेश्च ॥ त्याज्यं ॥ सृजिपूज्योश्चेति काशि
का ॥ तच्च पूजेर्ग्रहणं चिंत्यं ॥ भाष्यानुक्तत्वात् ॥ ण्यत्प्रकरणे त्यजेरुपसंख्यानमिति भाष्यं ॥ वचोऽशब्दसंज्ञायां ॥ वाच्यं ॥ शब्दसं
ख्यायां तु वाक्यं ॥ प्रयोज्यनियोज्यौ शक्यार्थे ॥ प्रयोक्तुं शक्यः प्रयोज्यः ॥ नियोज्यो दासः ॥ भोज्यं भक्ष्ये ॥ भोग्यमन्यत् ॥ ण्यत्प्रक
रणे लपिदभिभ्यां चेति वक्तव्यं ॥ लाप्यं ॥ दभिर्धातुश्च पठितोऽपि वार्तिकबलात्स्वीकर्तव्यः ॥ दाभ्यः ॥ ओरावश्यके ॥ उवर्णां
ताद्धातोर्ण्यत्स्यादवश्यंभावे द्योत्ये ॥ लाव्यं ॥ पाव्यं ॥ आसुयुवपिरपिलपित्रपिचमश्च ॥ षुञ् ॥ आसाव्यं ॥ यु मिश्रणे ॥ याव्यं ॥ वाप्यं ॥

रण्यं॥ लाप्यं॥ त्राप्यं॥ राम्यं॥ आनाय्योऽनित्ये॥ आङ्पूर्वान्नयतेर्ण्यदायादेशश्च निपात्यते॥ दक्षिणाग्निविशेष एवेदं॥ स हि गा कृदं॰कृ॰
॥सि॰उ॰॥ र्हपत्यादानीयतेऽनित्यश्च॥ सततमप्रज्वलनात्॥ आनेयोऽन्यो घटादिः॥ वैश्यकुलादेरानीतो दक्षिणाग्निश्च॥ प्रणाय्योऽसंमतौ॥
संमतिः प्रीतिविषयीभवनं कर्मव्यापारः॥ तथा त्यागेच्छारोपितं मतिः॥ प्रणाय्यश्चोरः॥ प्रीत्यनर्ह इत्यर्थः॥ प्रणाय्योऽन्तेवासी॥ विरक्त इ
॥९०॥ त्यर्थः॥ प्रणेयोऽन्यः॥ पाय्यसान्नाय्यनिकाय्यधाय्या मानहविर्निवाससामिधेनीषु॥ मीयतेऽनेनेति पाय्यं मानं॥ ण्यत्॥ धात्वादेः प
त्वं॥ आतो युगिति युक्॥ सम्यङ् नीयते होमार्थमग्निं प्रतीति सान्नाय्यं हविर्विशेषः॥ ण्यदायादेशौ समो दीर्घश्च निपात्यते॥ नि
चीयतेऽस्मिन् धान्यादिकमिति निकाय्यो निवासः॥ अधिकरणे ण्यत्॥ आयधात्वादेः कुत्वं च निपात्यते॥ धीयतेऽनया समिद
ति धाय्या ऋक्॥ क्रतौ कुण्डपाय्यसंचाय्यौ॥ कुंडेन पीयतेऽस्मिन् सोमः कुंडपाय्यः क्रतुः॥ संचीयतेऽसौ संचाय्यः॥ अग्नौ परिचाय्योपचा
य्यसमूह्याः॥ अग्निधारणार्थे स्थलविशेषे एते साधवः॥ अन्यत्र तु परिचेयं॥ उपचेयं॥ संवाह्यं॥ चित्याग्निचित्ये च॥ चीयतेऽसौ चित्यो
ग्निः॥ अग्नेश्चयनमग्निचित्या॥ प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च॥ त्वया गंतव्यं॥ गमनीयं॥ गम्यं॥ इह लोडादिबाधो मा भूदिति पु ॥९०॥
नः कृत्यविधिः॥ अप्यधिकारादूर्ध्वं वासरूपविधिः क्वचिन्नेति ज्ञापयति॥ तेन क्तल्युट्तुमुन्खलर्थेषु नेति सिद्धं॥ ॥अर्हे कृत्यतृचश्च॥
स्तोतुमर्हः स्तुत्यः॥ स्तुतिकर्मा॥ स्तोता॥ स्तुतिकर्त्ता॥ लिङ्बाधा मा भूदिति कृत्यतृचोर्विधिः॥ ॥भव्यगेयप्रवचनीयोपस्थानीयजन्याप्ला
रि

व्यापात्या वा॥ एते कृत्यांताः कर्त्तरि वा निपात्यंते॥ पक्षे तयोरेवेति सकर्मकात्कर्मणि॥ अकर्मकात्तु भावे ज्ञेयाः॥ भवतीति भव्यः॥ भव्यमने
न वा॥ गायतीति गेयः साम्नामयं॥ गेयं साम्नानेन वा॥ इत्यादि॥ शकि लिङ् च॥ चात्कृत्याः॥ वोढुं शक्यो वोढव्यः॥ वहनीयो वाह्यः॥ लिङ्बा
धा मा भूदिति कृत्योक्तिः॥ लाघवादनेनैव ज्ञापनसंभवे प्राग्दिष्टत्वेन कृत्याश्चेति सूत्रस्थ॥ अ र्हे कृत्यतृचोर्ग्रहणं॥ ॥इति कृत्यप्रक्रि
या समाप्ता॥ ॥ण्वुल्तृचौ॥ धातोरेतौ स्तः॥ कर्त्तरि कृदिति कर्त्रर्थे॥ युवोरनाकौ॥ कारकः॥ कर्त्ता॥ वोढुमर्हो वोढा॥ का
रिका॥ कर्त्री॥ गाङ्कुटेति ङित्वं॥ कुटिता॥ अञ्णिदित्कृत्तेनङित्वं॥ कोटकः॥ विज इट्॥ विजिता॥ हनस्तोऽचिण्णलोः॥ घातकः॥
आतो युक्॥ दायकः॥ नोदात्तोपदेशस्येति न वृद्धिः॥ शमकः दमकः॥ अनिटस्तु नियामकः॥ जनिवध्योश्च॥ वधहिंसायां॥ वधकः॥ जनकः
रधिजभोरचि॥ रंधकः॥ जंभकः॥ नेट्यलिटि रधेः॥ रधिता॥ रद्धा॥ मस्जिनशोर्झलीति नुम्॥ मंक्ता॥ नंष्टा॥ नशिता॥ रभेरशब्लिटोः
रंभकः॥ रब्धा॥ लभेश्च॥ लंभकः॥ लब्धा॥ तीषसह॥ एषिता॥ एष्टा॥ सहिता॥ सोढा॥ दरिद्रातेरालोपः॥ दरिद्रिता॥ ण्वुलि न॥ दरि
द्रायकः॥ कृत्यल्युट इत्येव सूत्रमस्तु॥ यत्र हि विहितास्ततोऽन्यत्रापि स्युरित्यर्थात्॥ एवं च बहुलग्रहणं योगविभागेन कृन्मात्रस्या
र्थव्यभिचारार्थं॥ पादाभ्यां ह्रियते पादहारकः॥ कर्मणि ण्वुल्॥ कर्मः कर्त्तर्यात्मनेपदविषयात्कृत इण्निषेधो वाच्यः॥ प्रक्रंता॥
कर्त्तरीति किं॥ प्रक्रमितव्यं॥ आत्मनेपदेति किं॥ संक्रमिता॥ अनन्यभावे विषयशब्दः॥ तेनानुपसर्गात्क्रमतेर्विकल्पार्हस्य न

प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुप इति इकारः ७

कृदंत॰

निषेधः॥ क्रमिता॥ तदर्हत्वमेवतृतीयपक्षं॥ तेनकंतेत्यपीतिकेचित्॥ गमेरिडित्यत्रपरस्मैपदग्रहणं तङानयोरभावं लक्षयति॥ संजि
॥सि॰कौ॰॥ गमिषिता॥ एवंनर्द्रुम्भतुर्यः॥ विहसिता॥ षङन्ताण्वुल्॥ अल्लोपस्यस्थानिवत्वान्नवृद्धिः॥ पापचकः॥ यङ्लुगंतात्पापाचकः॥ नं
दिग्रहिपचादिभ्योल्युणिन्यचः॥ नंद्यादेर्ल्युः ग्रहादेर्णिनिः पचादेरच्॥ नंदयतीतिनंदनः॥ जनमर्दयतीतिजनार्दनः॥ मधुसूदनः॥ वि
॥१८१॥ भीषयतीतिविभीषणः॥ लवणः॥ नंद्यादिगणेनिपातनाण्णत्वं॥ ग्राही॥ स्थायी॥ मंत्री॥ विशयी॥ वृद्ध्यभावोनिपातनात्॥
विषयी॥ इह षत्वमपि॥ परिभावी॥ परिभवी॥ पाक्षिकोवृद्ध्यभावोनिपात्यते॥ पचादिराकृतिगणः॥ शिवशमरिष्टस्य करे॥ क
र्मणिघटोऽठच्॥ इतिसूत्रयोः करोतेर्घटेश्च अच्प्रयोगात्॥ अच्प्रत्यये परे यङ्लुग्विधानं॥ केषांचित्सानुबंधः अनुबंधसंज्ञार्थः
केषांचित्स्वरार्थः॥ केषांचिद्बाधकबाधनार्थः॥ पचतीतिपचः॥ नदट्॥ चोरट्॥ देवट्॥ इत्यादयष्टितः॥ नदी॥ चोरी॥ देवी॥ दीव्य
तेरिगुपधेतिकः प्राप्तः॥ आरट्॥ श्वपचट्॥ अनयोःकर्मण्यण्प्राप्तः॥ न्यंक्वादिषुपाठात्श्वपाकोऽपि॥ यङोचिचेतिलुक्॥ नधातु
लोपइतिगुणवृद्धिनिषेधः॥ चेक्रियः॥ नेन्यः॥ लोलुवः॥ पोपुवः॥ मरीमृजः॥ चरिचलिपतिवदीनांवाद्वित्वमच्याक्चाभ्यासस्येतिवक्त ॥८१॥
व्यं॥ आगमस्यदीर्घत्वसामर्थ्यादभ्यासह्रस्वोहलादिःशेषश्च न॥ चराचरः॥ चलाचलः॥ पतापतः॥ वदावदः॥ हंतेर्घत्वं च॥ घन
मभ्यासस्य॥ उत्तरस्यतुअभ्यासाच्चेतिकुत्वं॥ घनाघनः॥ पाटेर्णिलुक्चोक्चदीर्घश्चाभ्यासस्य॥ पाटूपटः॥ पटोचरः॥ चलः॥ पतः॥

वदः॥ हनः॥ पाटः॥ राजेःकृतीतिवानुम्॥ राजिंचरोराजिचरः॥ इगुपधज्ञाप्रीकिरःकः॥ एभ्यःकःस्यात्॥ क्षिपः॥ लिखः॥ बुधः॥ कृशः॥ ज्ञः॥
प्रीणातीतिप्रियः॥ किरतीतिकिरः॥ वासरूपविधिनाण्वुल्तृचावपि॥ क्षेपकः॥ क्षेप्ता॥ आतश्चोपसर्गे॥ कःस्यात्॥ श्याद्व्यधेतिणस्या
पवादः॥ सुग्लः॥ प्रज्ञः॥ पाघ्राध्माधेट्दृशःशः॥ पिबतीतिपिबः॥ जिघ्रः॥ धमः॥ धयः॥ धयाकन्या॥ धेटष्टित्वात्स्तनंधयीतिस्त्री
त्वङीप्प्राप्तः॥ खशोऽन्यत्रनेष्यतइतिहरदत्तः॥ पश्यतीतिपश्यः॥ घ्रःसंज्ञायांव्याजादित्वादितिनिर्देशात्॥ ॥अनुपसर्गाल्लिंपविंदधा
रिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च॥ एभ्यःशःस्यात्॥ लिंपः॥ विंदः॥ धारयः॥ पारयः॥ वेदयः॥ उदेजयः॥ चेतयः॥ सातिःसौत्रः॥ सुखार्थो
हेतुमण्ण्यंतः॥ सातयः॥ वासरूपन्यायेनक्विपिस्यात्॥ परसात्मा॥ सालंतासकाः॥ षहमर्षणेचुरादिः॥ हेतुमण्ण्यंतोवा॥ साहयः॥ अ
नुपसर्गात्किं॥ प्रलिपः॥ नौलिंपेर्वाच्यः॥ निलिंपादेवाः॥ गवादिषुविंदेःसंज्ञायां॥ गोविंदः॥ अरविंदं॥ ददातिदधात्योर्विभाषा॥ शःस्या
त्॥ ददः॥ दधः॥ पक्षेवक्ष्यमाणोणः॥ अनुपसर्गादित्येव॥ प्रदः॥ प्रधः॥ ज्वलितिकसंतेभ्योणः॥ इतिशब्दआद्यर्थः॥ ज्वलादिभ्यःकसंतादिभ्यो
णःस्याद्वा॥ पक्षेअच्॥ ज्वालः॥ ज्वलः॥ चालः॥ चलः॥ अनुपसर्गादित्येव॥ उज्ज्वलः॥ तनेरुपसंख्यानं॥ इहानुपसर्गादितिविभाषेतिचनसं
बध्यते॥ अवतनोतीत्यवतानः॥ श्याद्व्यधास्रुसंस्र्वतीणवसावहृलिहश्लिषश्वसश्च॥ श्यैङ्प्रभृतिभ्योनित्यंणःस्यात्॥ श्यैङःश्वस्य
श्चादंतत्वात्सिद्धेपृथग्ग्रहणं उपसर्गेकं बाधितुं॥ अवश्यायः॥ प्रतिश्यायः॥ आतः॥ दायः॥ धायः॥ व्याधः॥ स्रुगतौ॥ आङ्पूर्वः॥ संस्र

वेश्रः॥ आस्रावः॥ संस्रावः॥ अत्यायः॥ अवसायः॥ अवहारः॥ लेहः॥ श्लेषः॥ श्वासः॥ दुन्योरनुपसर्गे॥ णः स्यात्॥ दुनोतीति दावः॥ नीसाहच॥ कृदंत॰
॥ सि॰ उ॰॥ र्यात्सानुबंधकाद्दुनोतेरेव णः॥ दवतेस्तु पचाद्यच्॥ दवः॥ नयतीति नायः॥ उपसर्गे प्रदवः॥ प्रणयः॥ विभाषाग्रहः॥ णो वा स्यात्॥ प
९२ लेऽच्॥ व्यवस्थितविभाषेयं॥ तेन जलचरे ग्राहः॥ ज्योतिषि ग्रहः॥ भवतेश्चेति काशिका॥ भावाः पदार्थाः॥ भवो देवः संसारश्च॥ भा
ष्यमते तु भाष्यपाठादिभ्यं तादच्॥ भावः॥ गेहे कः॥ गेहकार्यग्रहेः कः स्यात्॥ गृह्णाति धान्यादिकमिति गृहं॥ तात्स्थ्यात् गृह
दाराः॥ शिल्पिनि ष्वुन्॥ क्रियाकौशलं शिल्पं तद्वति कर्त्तरि ष्वुन् स्यात्॥ नृतिखनिरंजिभ्य एव॥ नर्त्तकः॥ नर्त्तकी॥ खनकः॥ खनकी॥
असि अके परे नर् रंजेर्नलोपो वाच्यः॥ रजकः॥ रजकी॥ भाष्यमते तु नृतिखनिभ्यामेव ष्वुन्॥ रंजेस्तु क्वुन् शिल्पिसंज्ञयोरिति क्वुन्
टाप्॥ रजिका॥ पुंयोगे तु रजकी॥ गस्थकन्॥ गायतेस्थकन् स्यात् शिल्पिनि कर्त्तरि॥ गाथकः॥ ण्युट् च॥ गायनः॥ टिड्ढाणञ्॥ ङीप्॥
हश्च व्रीहिकालयोः॥ हाको हाङश्च ण्युट् स्यात् व्रीहिकालयोः कर्त्रोः॥ जहात्युदकमिति हायनो व्रीहिः॥ जहाति भावानिति हायनो वर्षं॥
जिहीते प्राप्नोतीति वा॥ प्रुसृल्वः समभिहारे वुन्॥ समभिहारग्रहणेन साधुकारित्वं लक्ष्यते॥ प्रवकः॥ सरकः॥ लवकः॥ आशिषि ९३
च॥ आशीर्विषयार्थवृत्तेर्धातोर्वुन् स्यात् कर्त्तरि॥ जीवतात् जीवकः॥ नंदतात् नंदकः॥ आशीः प्रयोक्तृधर्मः॥ आशास्तिः पित्रादे
रियमुक्तिः॥ कर्मण्यण्॥ कर्मण्युपपदे धातोरण् प्रत्ययः स्यात्॥ उपपदसमासः॥ कुंभं करोतीति कुंभकारः॥ आदित्यं पश्यतीत्या

दावनभिधानात्॥ शीलिकामिभक्ष्याचरिभ्यो णः॥ अणोऽपवादोऽयं वार्त्तिकं॥ मांसशीला॥ मांसकामा॥ मांसभक्षा॥ कल्याणा
चारा॥ ईक्षिक्षमिभ्यां च॥ सुखप्रतीक्षा॥ बहुक्षमा॥ कथं तर्हि गंगाधर भूधरादयः॥ कर्मणः शेषत्वविवक्षायां भविष्यति॥ ह्वावामश्च॥
अपवादः स्यात् कापवादः॥ स्वर्गह्वायः॥ तंतुवायः॥ धान्यमायः॥ आतोऽनुपसर्गे कः॥ आदंताद्धातोरनुपसर्गात् कर्मण्युपपदे कः स्यादणो
आतो लोपः॥ गोदः॥ पार्ष्णित्रं॥ अनुपसर्गे किं॥ गोसंदायः॥ कविधौ सर्वत्र प्रसारणिभ्यो डः॥ ब्रह्मज्ञिनाति ब्रह्मज्यः॥ सर्वत्रग्रहणात् आ सं॰
तश्चोपसर्गे॥ आह्वः॥ प्रह्वः॥ सुपि स्थः॥ सुपीति योगो विभज्यते॥ सुप्युपपदे आदंतात् कः स्यात्॥ द्वाभ्यां पिबतीति द्विपः॥ समस्थः॥ ततः
स्थः॥ सुपि स्थितेः कः॥ आरंभसामर्थ्याद्भावे॥ आखूनामुत्थानमाखूत्थः॥ प्रष्ठोऽग्रगामिनि॥ प्रतिष्ठत इति प्रष्ठो गौः॥ अग्रतो गच्छतीत्यर्थः॥
अग्ने इति किं॥ प्रस्थः॥ अंबांबगोभूमिसव्यापद्वित्रिकुशेकुशंकुंगुमंजिपुंजिपरमेबर्हिर्दिव्यग्निभ्यः स्थः॥ स्थ इति कप्रत्ययांतस्यानुक
रणं॥ षष्ठ्यर्थे प्रथमा॥ एभ्यः स्थस्य सस्य षः स्यात्॥ द्विष्ठः॥ द्युतऊर्ध्वं कर्मणि सुपीति द्वयमप्यनुवर्त्तते॥ तत्राकर्मकेषु सुपीत्यस्य संब
धः॥ तुंदशोकयोः परिमृजापनुदोः॥ तुंदशोकयोः कर्मणोरुपपदयोरात्यांकः स्यात्॥ आलस्यसुखाहरणयोरिति वक्तव्यं॥ तुंदप
रिमार्ष्टीति तुंदपरिमृजोऽलसः॥ शोकापनुदः सुखस्याहर्त्ता॥ आलस्यादन्यत्र तु तुंदपरिमार्ज एव॥ यश्च संसारामारत्वोपदेशेन

शोकमपनुदतीति शोकापनोदः ॥ कप्रकरणे मूलविभुजादिभ्य उपसंख्यानं ॥ मूलानि विभुजतीति मूलविभुजो रथः ॥ आकृतिग कृदंत॰
॥ सि॰कौ॰ ॥ णोयं ॥ महीध्रः ॥ कुध्रः ॥ गिलतीति गिलः ॥ प्रेदहः ॥ दाज्ञपाकानातेश्चोपसृष्टात्कर्मण्युपपदे कः स्यादणोपवादः ॥ सर्वप्रदः ॥ पथिप्र
ज्ञः ॥ अनुपसर्गे इत्युक्तेः प्राप्तेन्यस्मिन्सति कः ॥ गोसंप्रदायः ॥ सामिख्यः ॥ गोसंख्यः ॥ गापोष्टक् ॥ अनुपसृष्टाभ्यामाभ्यां टक्स्यात्
॥ ८३ ॥ कर्मण्युपपदे ॥ सामगः ॥ सामगी ॥ उपसर्गे तु सामसंगायः ॥ पिबतेः सुराशीध्वोरिति वाच्यं ॥ सुरापी ॥ शीधुपी ॥ अन्यत्र क्षीर
पा ब्राह्मणी ॥ सुरां पाति रक्षतीति सुरापा ॥ हरतेरनुद्यमनेऽच् ॥ अंशहरः ॥ अनुद्यमने किं ॥ भारहारः ॥ शक्तिलांगलांकुशतो
मरयष्टिघटघटीधनुष्षु ग्रहेरुपसंख्यानं ॥ शक्तिग्रहः ॥ लांगलग्रहः ॥ सूत्रे च धार्यर्थे ॥ सूत्रग्रहः ॥ यस्तु सूत्रं केवलमुपादत्ते न
तु धारयति तत्राणेव ॥ सूत्रग्राहः ॥ वयसि च ॥ उद्यमनार्थं सूत्रं ॥ कवचहरः कुमारः ॥ आङि ताच्छील्ये ॥ पुष्पाण्याहरति तच्छीलः
पुष्पाहरः ॥ ताच्छील्ये किं ॥ भारहारः ॥ अर्हः ॥ अर्हतेरच् स्यात्कर्मण्युपपदे णोपवादः ॥ पूजार्हा ब्राह्मणी ॥ स्तंबकर्णयो रमिजपोः
हस्तिसूचकयोरिति वक्तव्यं ॥ स्तंबे रमते स्तंबेरमो हस्ती ॥ तत्पुरुषे कृतीति हलदंतादिति वाऽलुक् ॥ कर्णेजपः सूचकः ॥ ८३ ॥
शमि धातोः संज्ञायां ॥ शंभवः ॥ शंवदः ॥ पुनर्धातुग्रहणं बाधकविषयेपि प्रवृत्त्यर्थं ॥ कृञो हेत्वादिषु टो मा भूत् ॥ शंकरा नाम परि

व्राजिकात्तच्छीला ॥ अधिकरणे शेतेः ॥ खे शेते इति खशयः ॥ पार्श्वादिषूपसंख्यानं ॥ पार्श्वाभ्यां शेते पार्श्वशयः ॥ पृष्ठशयः ॥ उ
दरेण शेते उदरशयः ॥ उत्तानादिषु कर्तृषु ॥ उत्तानः शेते उत्तानशयः ॥ अवमूर्धशयः ॥ अवनतो मूर्धा यस्य सोऽवमूर्धा ॥ अधोमु
खः शेते इत्यर्थः ॥ गिरौ डश्छंदसि ॥ गिरौ शेते गिरिशः ॥ कथं तर्हि गिरिशमुपचचार प्रत्यहं सा सुकेशीति ॥ गिरिरस्यास्तीति विग्र
हे लोमादित्वाच्छः ॥ चरेष्टः ॥ अधिकरण उपपदे ॥ [illegible] ॥ कुरुचरः ॥ कुरुचरी ॥ भिक्षासेनादायेषु च ॥ भिक्षां चरतीति भिक्षाचरः
सेनाचरः ॥ आदायेति ल्यबंतं ॥ आदायचरः ॥ कथं प्रेक्ष्यामितां सहचरीमिति ॥ पचादिषु चर इति पाठात् ॥ पुरोऽग्रतोऽग्रेषु सर्तेः ॥
पुरःसरः ॥ अग्रतःसरः ॥ अग्रमग्रेण वाग्रे वा सरतीत्यग्रेसरः ॥ सूत्रे अग्रे इति एदंतत्वमपि निपात्यते ॥ कथं तर्हि यूथं तदग्रसरगर्वित
कृष्णसारमिति बाकुलकादिति हरदत्तः ॥ पूर्वे कर्तरि ॥ कर्तृवाचिनि पूर्वशब्दे उपपदे सर्तेष्टः स्यात् ॥ पूर्वः सरतीति पूर्वसरः ॥ क
र्तरि किं ॥ पूर्वं देशं सरतीति पूर्वसारः ॥ कृञो हेतुताच्छील्यानुलोम्येषु ॥ एषु द्योत्येषु करोतेष्टः स्यात् ॥ अतः कृकमितसः ॥
यशस्करी विद्या ॥ [illegible] श्राद्धकरः ॥ वचनकरः ॥ दिवाविभानिशाप्रभाभास्कारांतानंतादिबह्वनांदीकिंलिपिलिबिबलिभक्तिक
र्तृचित्रक्षेत्रसंख्याजंघाबाह्वहर्यत्तद्धनुररुष्षु ॥ एषु कृञः टः स्याद्धेत्वादावपि ॥ दिवाकरः ॥ विभाकरः ॥ निशाकरः ॥ प्रभा

कस्कादित्वादिति: ... अतः कृकमिकंसकुंभपात्रकुशाकर्णीष्वनव्ययस्य ... कस्कादि०

करः। भास्करः। अंतकरः। अनंतकरः। आदिकरः। बहुकरः॥ बहुश इत्यवैपुल्यार्थं संख्यापेक्षया पृथग्ग्रहणं। लिपिलिबिशब्दौ पर्या कृदंत०
सि०कौ० यौ। संख्या। एककरः। द्विकरः। कस्कादित्वादहस्करः॥ नित्यसमासे नुत्तरपदस्थस्येति षत्वं। धनुष्करः। अरुष्करः॥ किंयत्तद्बहुषु कृ
ञो ज्विधानमिति वक्तव्यं वार्तिकं॥ किंकरा। यत्करा। तत्करा। हेत्वादिषु टं बाधित्वा परत्वादच्। पुंयोगे ङीष्। किंकरी। कर्मणि भृ
१८४ तौ। कर्मशब्द उपपदे करोतेष्टः स्यात्॥ कर्मकरो भृतकः। कर्मकारोऽन्यः॥ नशब्दश्लोककलहगाथावैरचाटुसूत्रमंत्रपदेषु। एषु कृञो
ऽहेतुन। हेत्वादिषु प्राप्तः प्रतिषिध्यते॥ शब्दकारः। श्लोककार इत्यादि॥ स्तंबशकृतोरिन्॥ व्रीहिवत्सयोरिति वक्तव्यं। स्तंबकरिर्व्री
हिः॥ शकृत्करिर्वत्सः॥ व्रीहिवत्सयोः किं। स्तंबकारः॥ शकृत्कार इत्यादि॥ हरतेर्दृतिनाथयोः पशौ। दृतिनाथयोरुपपदयोः हरत
इन्स्यात्पशौ कर्तरि॥ दृतिं हरतीति दृतिहरिः॥ नाथं नासारज्जुं हरतीति नाथहरिः॥ पशौ किं॥ दृतिहारः॥ नाथहारः॥ फलेग्रहिरात्मं
भरिश्च। फलानि गृह्णातीति फलेग्रहिः॥ उपपदस्य एदंतत्वं ग्रहेरिन् प्रत्ययश्च निपात्यते॥ आत्मानं बिभर्तीत्यात्मंभरिः॥ आत्मनो
मुमागमः। चान्नुइनः॥ वा कुक्षिंभरिः॥ बाहुलकादात्मोदरकुक्षिष्विति पेठुः॥ ज्योत्स्नाकरं समुदंतरयश्च कोशाङ्क्षितिसुरारिः॥ एजेः १८५
खश्॥ ण्यंतादेजेः खश् स्यात्॥ अरुर्द्विषदजंतस्य मुम्॥ अरुषो द्विषतोऽजंतस्य च मुमागमः स्यात् खिदंते उत्तरपदे न त्वव्ययस्य॥ खि
त्वात्स्वादि॥ जनमेजयतीति जनमेजयः॥ वातशुनीतिलशर्धेषु अजधेट्तुदजहातिभ्यः खश उपसंख्यानं। वातमजा मृगाः॥ १

स्वित्यस्य नव्ययस्य॥ खित्यंते परे पूर्वपदस्य ह्रस्वः स्यात्॥ ततो नुम्॥ शुनिंधयः॥ तिलंतुदः॥ शर्धंजहा माषाः॥ शर्धोऽपानशब्दः॥ तंज
हातीति विग्रहः॥ जहातिरित्तसावितण्यर्थः॥ नासिकास्तनयोर्ध्माधेटोः॥ अत्र वार्तिकं॥ स्तनधेटो नासिकायां ध्मश्चेति वाच्यं। स्तनं
धयतीति स्तनंधयः॥ धेटष्टित्वात्स्तनंधयी। नासिकंधमः॥ नासिकंधयः॥ नाडीमुष्ट्योश्च॥ एतयोः कर्मणोरुपपदयोर्ध्माधेटोः खश्
स्यात्॥ यथासंख्यं नेष्यते। नाडिंधमः॥ नाडिंधयः॥ मुष्टिंधमः मुष्टिंधयः॥ घटीखारीखरीषूपसंख्यानं॥ घटिंधमः॥ घटिंधयः॥ इ
त्यादि॥ खारी परिमाणविशेषः॥ खरी गर्दभी। उदि कूले रुजिवहोः॥ उत्पूर्वाभ्यां रुजिवहिभ्यां कूले कर्मण्युपपदे खश् स्यात्॥
कूलमुद्रुजतीति कूलमुद्रुजः॥ कूलमुद्वहः॥ वहाभ्रे लिहः॥ वहःस्कंधः॥ तं लेढीति वहंलिहो गौः॥ अरादित्वाच्छपो लुक्॥ खशो
ङित्त्वान्न गुणः॥ अभ्रंलिहो वायुः॥ परिमाणे पचः॥ प्रस्थंपचा स्थाली॥ खारिंपचः कटाहः॥ मितनखे च॥ मितंपचा ब्राह्मणी॥ नखं
पचा यवागूः॥ पचिरत्र तापवाची॥ विध्वरुषोस्तुदः॥ विधुंतुदः॥ [illegible] मुमि कृते संयोगांतस्य लोपः॥ अरुंतुदः॥ असूर्यललाट
योर्दृशितपोः॥ असूर्यमिति असमर्थ[illegible]समासः॥ दृशिना नञः संबंधात्॥ सूर्यं न पश्यंतीत्यसूर्यंपश्या राजदाराः॥ ललाटंतपः॥
सूर्यः॥ उग्रंपश्येरंमदपाणिंधमाश्च॥ एते निपात्यंते॥ उग्रमिति क्रियाविशेषणं॥ तस्मिन्नुपपदे दृशेः खश्॥ उग्रं पश्यतीत्युग्रंपश्यः॥
इरा उदकं तेन माद्यति दी[illegible]प्यते अबिंधनत्वादिति इरंमदो मेघज्योतिः॥ इह निपातनात् श्यन्न॥ पाणयो ध्मायंते अस्मिन्निति

षा

पाणिंधमोऽध्वा॥ अंधकारा घाहतः दुःसर्पः॥ तत्र सर्पाद्यपनोदाय पाणयः शब्दायंते॥ प्रियवशेवदः खच्॥ प्रियंवदः वशंवदः॥ कृदंत०
॥सि० ५०॥ गमेः सुपि वाच्यः॥ असंज्ञार्थमिदं॥ मितंगमो हस्ती॥ विहायसो विह इति वाच्यं॥ खच्च डिद्वा वाच्यः॥ विहंगः॥ विहंगमः॥ भुजंगः॥
भुजंगमः॥ द्विषत्परयोस्तापेः खच् स्यात्॥ खचि ह्रस्वः॥ खच्परे णौ उपधाया ह्रस्वः॥ द्विषंतं परं वा तापयतीति द्विषंतपः परं
॥१८४॥ तपः॥ घटघटीग्रहणाल्लिंगविशिष्टपरिभाषा अनित्या॥ तेनेह न॥ द्विषतीं तापयतीति द्विषतीतापः॥ वाचि यमो व्रते॥ वाक् ष.
शब्दे उपपदे खच् स्याद्व्रते गम्ये॥ वाचंयमपुरंदरौ च॥ वाक्पुरोरम् तत्वं निपात्यते॥ वाचंयमो मौनव्रती॥ व्रते किं॥ अशक्त्यादिना
वाचं यच्छतीति वाग्यामः॥ पूःसर्वयोर्दारिसहोः॥ पुरं दारयतीति पुरंदरः॥ सर्वंसहः॥ सहिग्रहणमसंज्ञार्थं॥ भगेदारेर्दारिरिति
काशिका॥ बाहुलकेन लब्धमिदमिति साङ्कः॥ भगं दारयतीति भगंदरः॥ सर्वकूलाभ्रकरीषेषु कषः॥ सर्वंकषः खलः॥ कूलंकषा
नदी॥ अभ्रंकषो वायुः॥ करीषंकषा वात्या॥ मेघर्तिभयेषु कृञः॥ मेघंकरः॥ ऋतिंकरः॥ भयंकरः॥ भयशब्देन तदंतविधिः॥
अभयंकरः॥ क्षेमप्रियमद्रेऽण् च॥ एभ्यः कृञोऽण् स्यात्॥ चात् खच्॥ क्षेमकारः॥ क्षेमंकरः॥ प्रियकारः॥ प्रियंकरः॥ मद्रंकरोतीति म ॥१८४॥
द्रकारः॥ वेति वाच्येऽण्ग्रहणं हेत्वादिषु टो मा भूदिति॥ कथं तर्हि॥ अस्मार्कं क्षेमकरा इति॥ कर्मणः शेषत्वविवक्षायां प
चाद्यच्॥ आशिते भुवः करणभावयोः॥ आशितशब्दे उपपदे भवतेः खच्॥ आशितो भवत्यनेन आशितंभव ओदनः॥ आ

शितस्य भवनं आशितंभवं॥ संज्ञायां भृतॄवृजिधारिसहितपिदमः॥ विश्वं बिभर्तीति विश्वंभरः॥ विश्वंभरा॥ रथंतरं साम॥ अ
दृहस्ये न तरतीति सुसान्नि मान्नं न त्वत्र यवार्थेनुगमः॥ पतिंवरा कन्या॥ शत्रुंजयो हस्ती॥ युगंधरः पर्वतः॥ शत्रुंसहः॥ शत्रुंतपः॥ अरिंदमः॥ द
मिशामनाय्यां॥ तेन सकर्मक इत्युक्तं॥ मतांतरे तु अंतर्भावितण्यर्थोऽत्र दमिः॥ गमश्च॥ सुतंगमः॥ अंतात्यंताध्वदूरपारसर्वानंतेषु डः॥ सं
ज्ञायामिति निवृत्तं॥ एभ्यो गमेर्डः स्यात्॥ डित्वसामर्थ्याद्भस्यापि टिलोपः॥ अंतं गच्छतीत्यंतगः इत्यादि॥ सर्वत्र [illegible] पन्नयो रुपसंख्या
नं॥ सर्वत्रगः॥ पन्नं पतितं गच्छतीति पन्नगः॥ पन्नमिति पद्यतेः क्तांतविशेषणं॥ उरसो लोपश्च॥ उरसा गच्छतीत्युरगः॥ सुदुरोरधिकरणे॥
सुखेन गच्छत्यत्र सुगः॥ दुर्गः॥ अन्यत्रापि दृश्यत इति वक्तव्यं॥ ग्रामगः॥ डे च विहायसो विहादेशो वाच्यः॥ विहगः॥ आशिषि हनः॥ शत्रुं
वध्यात् शत्रुहः॥ आशिषि किं॥ शत्रुघातः॥ दारावाहनोऽणंतस्य च टः संज्ञायां॥ दारुशब्दे उपपदे आङ्पूर्वाद्धंतेरण् कारस्यांतादेशो वक्तव्य
दूलर्थः॥ दार्वाघाटः॥ चारौ वा॥ चार्वाघाटः॥ चार्वाघातः॥ कर्मणि समि च॥ कर्मण्युपपदे संपूर्वाद्धंतेरुक्तं वक्तव्यं॥ वर्णान् संहंतीति वर्ण
संघाटः॥ वर्णसंघातः॥ पदसंघाटः॥ पदसंघातः॥ अपे क्लेशतमसोः॥ अपपूर्वाद्धंतेर्डः स्यात्॥ अनाशीरर्थमिदं॥ क्लेशापहः पुत्रः॥ त
मोपहः सूर्यः॥ कुमारशीर्षयोर्णिनिः॥ कुमारघाती॥ शिरसः शीर्षभावो निपात्यते॥ शीर्षघाती॥ लक्षणे जायापत्योष्टक्॥ हं

तेष्वकलक्षणवति कर्त्तरि॥ जायाघ्नो ना॥ पतिघ्नी स्त्री॥ अमनुष्यकर्त्तृके च॥ जायाघ्नस्तिलकालकः॥ पतिघ्नी पाणिरेखा॥ पित्त
॥सि० ३०॥ घ्नं घृतं॥ अमनुष्ये किं॥ आखुघातः शूद्रः॥ अपकथं बलस्य... शत्रुघ्नः कृतघ्न इत्यादि॥ मूलविभुजादित्वात् सिद्धं॥ चौर
घातो नगरघातो हस्तीति वा कुलकार्षणि॥ शक्तौ हस्तिकपाटयोः॥ हंतेष्टक्स्यात् शक्तौ द्योत्यायां॥ मनुष्यकर्तृकार्थमिदं॥ हस्तिघ्ना
॥८६॥ प्र० ना॥ कपाटघ्नश्चोरः॥ कवाटेति पाठांतरं॥ पाणिघताडघौ शिल्पिनि॥ हंतेष्टक् टिलोपो घत्वं च निपात्यते पाणिताडयोरुपपदयोः॥ शिल्पि
नि किं॥ पाणिघातः॥ ताडघातः॥ राजघ उपसंख्यानं॥ राजानं हंतीति राजघः॥ आढ्यसुभगस्थूलपलितनग्नांधप्रियेषु च्व्यर्थेष्वच्वौ कृ
ञः करणे ख्युन्॥ एषु च्व्यर्थेष्वच्व्यंतेषु कर्मसूपपदेषु कृञः ख्युन् स्यात्॥ अनाढ्यमाढ्यं कुर्वंत्यनेन आढ्यंकरणं॥ अच्वौ किं॥ आ
ढ्यीकुर्वंत्यनेन॥ इह प्रतिषेधसामर्थ्याल्ल्युडपीति काशिका॥ भाष्यमते तु स्यादेव॥ अच्व्यर्थविवक्षितत्वात्॥ कर्त्तरि भुवः खिष्णुच्खु
कञौ॥ आढ्यादिषु च्व्यर्थेष्वच्व्यंतेषु भवतेरेतौ स्तः॥ अनाढ्य आढ्यो भवति आढ्यंभविष्णुः॥ आढ्यंभावुकः॥ स्पृशोनुदके क्वि
न्॥ घृतस्पृक्॥ कर्मणीति निवृत्तं॥ मंत्रेण स्पृशतीति मंत्रस्पृक्॥ ऋत्विगित्यादिना व्याख्यातं॥ त्यदादिषु दृशो नालोचने कञ् च॥ समाना ॥८६॥
ऽन्ययोश्चेति वाच्यं॥ सदृक्॥ सदृशः॥ अन्यादृक्॥ अन्यादृशः॥ क्सोपि वाच्यः॥ तादृक्षः॥ सदृक्षः॥ अन्यादृक्षः॥ सत्सूद्विष

स्पृश प्रश्नेति ... जस्तेन ... कुलं ...
दधृक्
आत्मनेभाषा इति ... ले

स

द्रुहदुहयुजविदभिदछिदजिनीराजामुपसर्गेपि क्विप्॥ एभ्यः क्विप्स्यादुपसर्गे सत्यसति च सुप्युपपदे॥ द्युसत्॥ उपनिषत्॥ अंडसूः
प्रसूः॥ मित्रद्विट्॥ प्रद्विट्॥ मित्रध्रुक्॥ प्रध्रुक्॥ गोधुक्॥ प्रधुक्॥ अश्वयुक्॥ प्रयुक्॥ ... वेदवित्॥ निवित्॥ विश्वजित् इत्यादि
अग्रग्रामाभ्यां नयतेर्णो वाच्यः॥ अग्रणीः॥ ग्रामणीः॥ भजो ण्विः॥ सुप्युपसर्गे चोपपदे भजेर्ण्विः स्यात्॥ अंशभाक्॥ प्रभाक्॥ अदो
ऽनन्ने॥ विट् स्यात्॥ आममत्ति आमात्॥ सस्यात्॥ अनन्ने किं॥ अन्नादः॥ क्रव्ये च॥ पूर्वेणैव वासरूप इति प्राप्ताण्बाधनार्थं॥ क्र वासिद्धेर्थ
व्यात्॥ आममांसभक्षक इत्यर्थः॥ कथं तर्हि क्रव्यादोऽस्रप आशर इति॥ पक्वमांसशब्दे उपपदेऽण्॥ उपपदस्य क्रव्यादेशः पृषोदरादि
त्वात्॥ दुहः कब्घश्च॥ कामदुघा॥ अन्येभ्योपि दृश्यंते॥ छंदसीति निवृत्तं॥ मनिन्क्वनिब्वनिपो विच् एते प्रत्यया धातोः स्युः॥ नेड्वशि वानिपू
कृति॥ वशादेः कृत इण्न स्यात्॥ शॄ सुशर्मा॥ प्रातरित्वा॥ विड्वनोरनुनासिकस्यात्॥ अनुनासिकस्यात्स्याद्विड्वनिपरे॥ वि
जायत इति विजावा॥ ओण् अपनयने॥ अवावा॥ विच्॥ रोट्॥ रेट्॥ सुगण्॥ क्विप् च॥ अयमपि दृश्यते॥ सत्सूद्विषेति तु अस्यैव प्रपंचः
उखास्रत्॥ पर्णध्वत्॥ वाहभ्रट्॥ अंतः॥ पदांतस्य नेति तेर्नस्य णत्वं स्यात्॥ उपसर्गस्थान्निमित्तात्परश्चेत्॥ हप्राण्॥ शास इ
दितीत्वं॥ मित्राणि शास्तीति मित्रशीः॥ आशास्तेः क्वावुपधाया इत्वं वाच्यं॥ आशीः॥ इत्वोत्वे॥ गीः॥ पूः॥ इस्मन्त्रन्क्विषु
छदिसंवरणे॥ च॥ एषु छादेर्ह्रस्वः स्यात्॥ तनुच्छत्॥ अनुनासिकस्य क्विझलोः क्ङिति दीर्घः॥ मोनो धातोः॥ प्रतान्॥ प्रशान्॥ धूरित्यर्थः॥ अक्षधूः

ज्वरत्वरेत्यूठ्॥ जूः जुरौ जुरः॥ तूः॥ स्रूः॥ ऊः॥ मूः॥ अवनावतीति ऊनौः॥ ऊनावौ ऊनावः॥ मूः मुवौ मुवः॥ सुमूः सुम्वौ सुम्वः॥
॥ सिजु ॥ राल्लोपः॥ मूर्छा॥ मूः मुरौ मुरः॥ धुर्वी धूः॥ गमः क्वौ॥ अनुनासिकलोपः स्यात्॥ अंगगत्॥ गमादीनामिति वक्तव्यं॥ परीतत्॥
॥१८७॥ संयत्॥ सुनत्॥ ऊङ् च गमादीनामिति वक्तव्यं लोपश्च॥ अग्रगूः॥ अग्रेगूः॥ खः करः॥ वातप्रमीः॥ शंस्ठः॥ शंस्ठाः॥ शमिधातोरि
सर्वबाधितु सूत्रं॥ सुप्यजातौ णिनिस्ताच्छील्ये॥ अजात्यर्थे सुपि धातोर्णिनिः स्यात्ताच्छील्ये द्योत्ये॥ उष्णभोजी॥ शीतभोजी॥
अजातौ किं॥ ब्राह्मणानामंत्रयिता॥ ताच्छील्ये किं॥ उष्णं भुंक्ते कदाचित्॥ इदृ इति कारेणोपसर्गभिन्न एव सुपि णिनिरिति व्या
ख्याय उत्प्रतिभ्यामाङि सर्त्तेरुपसंख्यानमिति पठितं॥ हरदत्तमाधवादिभिस्तु तदेवानुसृतं॥ एतच्च भाष्यविरोधादुपेक्ष्यं॥
प्रसिद्ध्योपसर्गेपि णिनिः॥ सवस्त्रुवोपजीविनां॥ अनुयायिवर्गः॥ पतत्यधो धाम विसारि॥ नवं वनीयाः प्रसवोनुऊविस्त्रिरि
सादौ॥ साधुकारिण्युपसंख्यानं॥ ब्रह्मणि वदः॥ अताच्छील्यार्थं वार्त्तिकद्वयं॥ साधुदायी॥ ब्रह्मवादी॥ कर्त्तर्युपमाने॥ णिनिः
स्यात्॥ उपपदार्थः कर्त्ता प्रत्ययार्थस्य कर्त्तुरुपमानं॥ उष्ट्र इव क्रोशति उष्ट्रक्रोशी॥ ध्वांक्षरावी॥ अताच्छील्यार्थं
रसूत्रं॥ कर्त्तरि किं॥ अपूपानिव भक्षयति माषान्॥ उपमाने किं॥ उष्ट्रः क्रोशति॥ व्रते॥ णिनिः स्यात्॥ स्थंडिलशायी॥ बहुल
माभीक्ष्ण्ये॥ पौनःपुन्ये द्योत्ये सुप्युपपदे णिनिः स्यात्॥ क्षीरपायिण उशीनराः॥ मनः॥ सुपि मन्यतेर्णिनिः॥ दर्शनीयमानी॥ ॥१८७॥

आत्ममाने खश्च॥ स्वकर्मके मनने वर्त्तमानान्मन्यतेः सुपि खश्स्याच्चाणिनिः॥ पंडितमात्मानं मन्यते पंडितंमन्यः॥ पंडितमानी॥ खि
त्यनव्ययस्य॥ कालिंमन्या॥ अनव्ययस्य किं॥ दिवामन्या॥ इच एकाचोऽम्प्रत्ययवच्च॥ इजंतादेकाचोम्स्यात्स च स्वाद्यमवत् खिदंते परे
औतोम्शसोः॥ गांमन्यः॥ वाम्शसोः॥ स्त्रियंमन्यः॥ स्त्रीमन्यः॥ नरंमन्यः॥ भुवंमन्यः॥ श्रियमात्मानं मन्यते श्रियंमन्यं कुलं॥ भाष्यकार
वचनात् श्रीशब्दस्य ह्रस्वो सुम्नोरभावश्च॥ भूते॥ अधिकारोयं॥ वर्त्तमाने लडिति यावत्॥ करणे यजः॥ करणे उपपदे भूतार्थयजे
र्णिनिः स्यात्कर्त्तरि॥ सोमेनेष्टवान् सोमयाजी॥ अग्निष्टोमेनेष्टवानग्निष्टोमयाजी॥ कर्मणि हनः॥ पितृघाती॥ कर्मणीत्येतत्स
ह इति यावदधिक्रियते॥ ब्रह्मभ्रूणवृत्रेषु क्विप्॥ एषु कर्मसूपपदेषु हंतेर्भूते क्विप् स्यात्॥ ब्रह्महा॥ भ्रूणहा॥ वृत्रहा॥ क्विप्चेत्येव सि
द्धे नियमार्थमिदं॥ ब्रह्मादिष्वेव हंतेरेव भूते एव क्विबेवेति चतुर्विधोत्र नियम इति काशिका॥ ब्रह्मादिष्वेव क्विबेवेति द्विविधो नियम
इति भाष्यं॥ सुकर्मपापमंत्रपुण्येषु कृञः॥ सोकर्मादिषु कृञः क्विप्स्यात्॥ त्रिविधोत्र नियम इति काशिका॥ सुकृत्॥ कर्मकृत्॥ मं
त्रकृत्॥ पुण्यकृत्॥ पापकृत्॥ क्विबेवेति नियमात्कर्म कृतवानित्यत्राण् न॥ कृञ एवेति नियमात् मंत्रमधीतवान् मंत्राध्यायः॥ अत्र न क्वि
प्॥ भूत एवेति नियमान्मंत्रं करोति करिष्यति वेति विवक्षायां न क्विप्॥ स्वादिष्वेवेति नियमाभावादन्यस्मिन्नुपपदेपि क्विप्॥ शास्त्रकृत्

वि

माष्यकृत्॥ सोमेसुञः॥ सोमसुत्॥ चतुर्विधोनियमइतिकाशिका॥ एवमुत्तरसूत्रेपि॥ अग्नौचेः॥ अग्निचित्॥ कर्मण्यग्न्याख्या ॥ ८८०॥
॥सि०७॥ यां॥ कर्मण्युपपदेकर्मण्येवकारकेचिनोतेःक्विप्स्यात्॥ अग्न्याधारस्थलविशेषस्याख्यायां॥ श्येनइवचितःश्येनचित्॥ कर्मणीनि
विक्रियः॥ कर्मण्युपपदेविपूर्वात्क्रीणातेरिनिःस्यात्॥ कुत्सितग्रहणंकर्तव्यं॥ सोमविक्रयी॥ घृतविक्रयी॥ दृशेःक्वनिप्॥ कर्मणिभू
॥८८॥ तेइत्येव॥ पारंदृष्टवान्पारदृश्वा॥ राजनियुधिकृञः॥ क्वनिप्स्यात्॥ युधिरंतर्भावितण्यर्थः॥ राजानंयोधितवान्राजयुध्वा॥ राजकृत्वा
सहेच॥ कर्मणीतिनिवृत्तं॥ सहयुध्वा॥ सहकृत्वा॥ सप्तम्यांजनेर्डः॥ सरसिजं॥ मंदुरायांजातोमंदुरजः॥ ह्यापोरितिह्रस्वः॥ पंचम्या
मजातौ॥ जातिशब्दवर्जितेपंचम्यंतेउपपदेजनेर्डःस्यात्॥ संस्कारजः॥ अदृष्टजः॥ उपसर्गेचसंज्ञायां॥ प्रजास्यात्संततौजने॥ अ
नौकर्मणि॥ अनुपूर्वाज्जनेःकर्मण्युपपदेडःस्यात्॥ पुमांसमनुरुध्यजातापुमनुजा॥ अन्येष्वपिदृश्यते॥ अन्येष्वप्युपपदेषुजने
र्डःस्यात्॥ अजः॥ द्विजः॥ ब्राह्मणजः॥ अपिशब्दःसर्वोपाधिव्यभिचारार्थः॥ तेनधात्वंतरादपिकारकांतरेष्वपिक्वचित्॥ परितःखा ॥८८९॥
तापरिखा॥ ॥क्तक्तवतूनिष्ठा॥ एतौनिष्ठासंज्ञौस्तः॥ निष्ठा॥ भूतार्थवृत्तेर्धातोर्निष्ठास्यात्॥ तत्र तयोरेवेतिभावकर्मणो
क्तः॥ कर्त्तरिकृदितिकर्त्तरिक्तवतुः॥ उकावितौ॥ स्नातंमया॥ स्तुतस्त्वयाविष्णुः॥ विष्णुर्विश्वंकृतवान्॥ निष्ठायामण्यदर्थे॥

अत्रसंतस्यबाधोनारिदीर्घः
तेन उक्तं ध्येति तुम्॥ २

[illegible]

ण्यदर्थेभावकर्मणी ततोन्यत्रनिष्ठायांक्षियोदीर्घःस्यात्॥ क्षियोदीर्घात्॥ निष्ठातस्यनःस्यात्॥ क्षीणवान्॥ भावकर्मणोस्तुक्षितः
कामोमया॥ श्युकःकिति॥ श्रितः॥ श्रितवान्॥ भूतः॥ भूतवान्॥ वृतः॥ वृतवान्॥ उर्णोतेर्णुवद्भावोवाच्यः॥ तेनैकाच्त्वान्नेट्॥ ऊ
र्णुतः॥ नुतः॥ वृतः॥ रदाभ्यांनिष्ठातोनःपूर्वस्यचदः॥ रेफदकाराभ्यांपरस्यनिष्ठातस्यनःस्यात्निष्ठापेक्षयापूर्वस्यधातोर्दकारस्यच॥
शॄहिंसायां॥ ऋतइत्॥ रपरः॥ णत्वं॥ शीर्णः॥ बहिरंगत्वाद्दुःदुरसिद्धत्वान्नेह॥ हृतस्यापत्यंकार्त्तिः॥ भिन्नः॥ छिन्नः॥ संयोगादेरातोधातो तो॰४
र्यण्वतः॥ यण्वत्संयोगादेरादंतान्निष्ठातस्यनःस्यात्॥ द्राणः॥ ग्लानः॥ ल्वादिभ्यः॥ एकविंशतेर्लूञादिभ्यःप्राग्वत्॥ लूनः॥ ज्या॥
ग्रहिज्या॥ जीनः॥ दुग्वोर्दीर्घश्च॥ उगतौ॥ दूनः॥ दुदुउपतापइत्यस्यतुनग्रहणंसानुबंधत्वात्॥ श्रदुतयादुतयेतिमाघः॥ गूनः॥ पू
ञोविनाशे॥ पूनायवाः विनष्टाइत्यर्थः॥ पूतमन्यत्॥ सिनोतेर्ग्रासकर्मकर्त्तृकस्य॥ सिनोग्रासः॥ ग्रासेतिकिं॥ सितापाशेनस
करी॥ कर्मकर्त्तृकेतिकिं॥ सितोग्रासोदेवदत्तेन॥ ओदितश्च॥ भुजो॰॥ भुग्नः॥ टुओश्वि॰॥ उच्छूनः॥ ओहाकत्यागे॥ प्रहीणः॥ स्वा ॥घुमास्था॰॥
दयस्तुओदितइत्युक्त॥ सूनः॥ सूनवान्॥ दूनः॥ दूनवान्॥ ओदिन्मध्येडीङःपाठसामर्थ्यान्नेट्॥ उड्डीनः॥ द्रवमूर्त्तिस्पर्शयोःश्यः॥
द्रवस्यमूर्त्तौकाठिन्येस्पर्शेचार्थेश्यैङःसंप्रसारणंस्यान्निष्ठायां॥ श्येष्वस्यर्ग॥ श्यैङोनिष्ठातस्य नःस्पर्शेर्थे॥ हलइतिदी

स्याद

सि०कौ० घं॥ शीनं घृतं॥ अस्पर्शे किं॥ शीतं जलं॥ द्रवमूर्तिस्पर्शयोरिति किं॥ संश्यानो वृश्चिकः॥ शीतात्संकुचित इत्यर्थः॥ प्रतेश्च॥ प्र कृ०८० निष्ठा०
तिपूर्वस्य श्यः संप्रसारणं निष्ठायां॥ प्रतिशीनः॥ विभाषाभ्यवपूर्वस्य॥ श्यः संप्रसारणं वा स्यात्॥ अभिश्यानं अभिशीनं घृतं॥ अव
श्यानो ऽवशीनो वृश्चिकः॥ व्यवस्थितविभाषेयं॥ तेनेह न॥ समवश्यानः॥ अंचो ऽनपादाने॥ अंचो निष्ठातस्य नः स्यान्नत्वपादाने॥
॥८४॥ यस्य विभाषा॥ यस्य क्वचिद्विभाषयेड्विहितस्ततो निष्ठाया इण्न स्यात्॥ उदितो वेति क्त्वायां वेट्क॥ त्वादिहनेट्॥ समक्नः॥ अनपा नत स्या सि
दाने किं॥ उदक्तमुदकं कूपात्॥ नत्वस्यासिद्धत्वाद्धत्वे निष्पन्ने प्राप्ते॥ निष्ठादेशः षत्वस्वरप्रत्ययेड्विधिषु सिद्धो वाच्यः॥ वृक्णः॥ एला इला
वृक्णवान्॥ परिस्कंदः प्राच्यभरतेषु॥ दिवो ऽविजिगीषायां॥ दिवो निष्ठातस्य नो ऽविजिगीषायां॥ द्यूनः॥ विजिगीषायां तु द्यूतं॥ परतः कृते
निर्वाणो ऽवाते॥ अवात इति छेदः॥ निपूर्वाद्वातेर्निष्ठातस्य नत्वं स्यान्न चेद्वातः कर्ता॥ निर्वाणो ऽग्निर्मुनिर्वा॥ वाते तु निर्वातो वातः॥ ॥८२॥
शुषः कः॥ निष्ठातस्येत्येव॥ शुष्कः॥ पचो वः॥ पक्वः॥ क्षायो मः॥ क्षामः॥ स्त्यः प्रपूर्वस्य॥ प्रात्स्त्यः संप्रसारणं निष्ठायां॥ प्रस्त्यो ऽन्यतरस्यां॥
निष्ठातस्य मो वा स्यात्॥ प्रस्तीमः॥ ४५४ पूर्वेण मूर्धन्ये प्राप्ते तदभावो निपात्यते॥ परिस्कंदः प्राच्येति किं॥ परिष्कंदः॥ परस्येति विकल्पः॥ ४२
प्रस्तीतः॥ प्रात्किं॥ स्त्यानः॥ अनुपसर्गात्फुल्लक्षीबकृशोल्लाघाः॥ ञिफला॥ फुल्लः॥ निष्ठातस्य लत्वं निपात्यते॥ क्तवत्वेकदेशस्या

स्तंभेरिति षत्वे प्राप्ते, प्रतिस्तब्धनिस्तब्धौ च, अभ्यवत्वं न स्यात् ५ परिस्कंदः ५

पीदं निपातनमिष्यते॥ फुल्लवान्॥ क्षीबादिषु तु क्तप्रत्ययस्यैतेर्वलोपः॥ तस्यासिद्धत्वात्प्राप्तस्येटो ऽभावश्च निपात्यते॥ क्षीबो मत्तः॥
कृशस्तनुः॥ उल्लाघो नीरोगः॥ अनुपसर्गात्किं॥ आदितश्च॥ आकारेतो निष्ठाया इण्न स्यात्॥ तिव॥ चरफलोरत उत्स्यात्तादौ कि
ति॥ प्रफुल्तः॥ प्रक्षीबितः॥ प्रकृशितः॥ प्रोल्लाघितः॥ कथं तर्हि लोध्रद्रुमं सानुमतः प्रफुल्लमिति॥ फुल्लविकसने॥ पचाद्यच्॥ सूत्रं तु फु
ल्लतादिनिवृत्त्यर्थं॥ उत्फुल्लसंफुल्लयोरुपसंख्यानं॥ नुदविदोंदत्राघ्राह्रीभ्यो ऽन्यतरस्यां॥ एभ्यो निष्ठातस्य नो वा॥ नुन्नः॥ नुत्तः॥ विद वि
चारणे॥ रौधादिकस्य ग्रहणं॥ उंदिना परेण साहचर्यात्॥ विन्नः॥ वित्तः॥ वेत्तेस्तु विदितः॥ विद्यतेर्विन्नः॥ उंदी॥ श्वीदितो निष्ठायां॥ श्व
यतेरीदितश्च निष्ठाया इण्न॥ उन्नः॥ उत्तः॥ त्राणः॥ त्रातः॥ घ्राणः॥ घ्रातः॥ ह्रीणः॥ ह्रीतः॥ न ध्याख्यापॄमूर्छिमदां॥ एभ्यो निष्ठातस्य नत्वं न
स्यात्॥ ध्यातः॥ ख्यातः॥ उदोष्ठ्यपूर्वस्य॥ रपरः॥ पूर्तः॥ राल्लोपः॥ मूर्तः॥ मत्तः॥ वित्तो भोगप्रत्यययोः॥ विंदतेर्निष्ठांतस्य निपातो ऽयं भो
ग्ये प्रतीते चार्थे॥ वित्तं धनं॥ वित्तः पुरुषः॥ अनयोः किं॥ विन्नः॥ विभाषा गमहनेति क्वसौ वेट् त्वादिहनेट्॥ भित्तं शकलं॥ भिन्न
मन्यत्॥ ऋणमाधमर्ण्ये॥ ऋतमन्यत्॥ स्फायः स्फी निष्ठायां॥ स्फीतः॥ इण् निष्ठायां॥ निरः कुषो निष्ठाया इट् स्यात्॥ यस्य विभाषे
ति निषेधे प्राप्ते पुनर्विधिः॥ निष्कुषितः॥ वसतिक्षुधोरिट्॥ आभ्यां क्त्वानिष्ठयोर्नित्यमिट् स्यात्॥ उषितः॥ क्षुधितः॥ अंचेः पूजा

ऋधातोः क्तेतकारस्य नत्वं निपात्यते अधमर्णव्यवहारे। २

॥ सि०कौ० यां॥ पूजार्थादंचेः क्त्वानिष्ठयोरिट् स्यात्॥ अंचितः॥ गतौ तु अक्तः॥ लुभो विमोहने॥ लुभः क्त्वानिष्ठयोरिट् स्यात्॥ न तु गार्ध्ये॥ लुभितः॥ गा कृदं० नि०
र्ध्ये तु लुब्धः॥ क्लिशः क्त्वानिष्ठयोः॥ इड्वा स्यात्॥ क्लिश उपतापे॥ नित्यं प्राप्ते विकल्पः॥ क्लिशू विबाधने॥ अस्य क्त्वायां विकल्पे सिद्धेपि निष्ठा
॥ ९० ॥ यां निषेधे प्राप्ते विकल्पः॥ क्लिशितः॥ क्लिष्टः॥ पूङश्च॥ पूङः क्त्वानिष्ठयोरिड्वा स्यात्॥ पूङ् क्त्वा॥ पूङः क्त्वानिष्ठा च सेट् किन्न॥ पवितः॥ पूतः
क्त्वाग्रहणमुत्तरार्थं॥ नोपधादित्यत्र हि क्त्वैव संबध्यते॥ निष्ठा शीङ् स्विदिमिदिक्ष्विदिधृषः॥ एभ्यः सेण्निष्ठा किन्न॥ शयितः॥ शयित
वान्॥ अनुबंधनिर्देशो [illegible] यङ्लुङ्निवृत्त्यर्थः॥ [illegible] शेशयितः॥ शेशयितवान्॥ आदिकर्मणि निष्ठा वक्तव्या॥ आदिकर्मणि क्तः कर्तरि च॥
आदिकर्मणि यः क्तः स कर्तरि स्यात्॥ वाड्भावकर्मणोः॥ विभाषा भावादिकर्मणोः॥ भावे आदिकर्मणि च आदितो निष्ठाया इड्वा स्यात्॥
प्रस्वेदितश्चैत्रः॥ प्रस्वेदितं तेन॥ ञिष्विदेस्त्वादिरत्र न गृह्यते॥ ञिद्भिः साहचर्यात्॥ स्विद्यते स्म स्विदितः स्विन्नमेव॥ ञिमिदा ञिक्ष्विदा॥ दा
दिवादीस्वादीव॥ प्रमेदितः॥ प्रमेदितवान्॥ प्रक्ष्वेदितः॥ प्रक्ष्वेदितवान्॥ प्रधर्षितः॥ प्रधर्षितवान्॥ धर्षितं तेन॥ सेट् किं॥ प्रस्विन्नः॥ ९०॥
प्रस्विन्नं तेनेत्यादि॥ मृषस्तितिक्षायां॥ सेण्निष्ठा किन्न स्यात्॥ मर्षितः॥ मर्षितवान्॥ क्षमायां किं॥ अपमृषितं वाक्यं॥ अविस्प
ष्टमित्यर्थः॥ उदुपधाद्भावादिकर्मणोरन्यतरस्यां॥ उदुपधात्परा भावादिकर्मणोः सेण्निष्ठा वा किन्न स्यात्॥ द्योतितं॥ फतितं॥

मोदितं॥ मुदितं॥ साधुना॥ प्रद्योतितः॥ प्रफतितः॥ प्रमोदितः॥ प्रमुदितः साधुः॥ उदुपधात्किं॥ विदितं॥ भावे इत्यादि किं॥ रुचितं कार्षा
पणं॥ सेट् किं॥ कुष्टं॥ शब्विकरणेभ्य एवेष्यते॥ नेह॥ गुध्यतेर्गुधितं॥ निष्ठायां सेटि॥ णेर्लोपः स्यात्॥ भावितो भावितवान्॥ श्वीदितदीत
नेड्॥ संप्रसारणं॥ शूनः॥ शीनः॥ गुहू॥ गूढः॥ वनु॥ तनु॥ वतः॥ ततः॥ पतस्मिन्वेट्कत्वादिडभावे प्राप्ते द्वितीयाश्रितेति सूत्रे निपातनादि
ट्॥ पतितः॥ सेऽसिचीति वेट्कत्वात् द्रुहोऽन्तत्वादीनामीदित्वेना [illegible] नित्यत्व [illegible] ज्ञापनाद्वा॥ तेनाधावितमित्यादि॥ यस
विभाषेत्यत्र एकार इत्येव॥ दरिद्रितः॥ क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानि मंथमनस्तमः [illegible] सक्ताविस्पष्टस्वरानाया
सभृशेषु॥ क्षुब्धादीन्यष्टौ अनिट्कानि निपात्यंते समुदायेन मंथादिषु वाच्येषु॥ द्रवद्रव्यसंपृक्ताः सक्तवो मंथः॥ मंथनदंडश्च॥
क्षुब्धो मंथश्चेत्॥ स्वान्तं मनः॥ ध्वान्तं तमः॥ लग्नं [illegible] सक्तं॥ निष्ठानत्वमपि निपातनात्॥ म्लिष्टमविस्पष्टं॥ विरिब्धः स्वरः॥ म्लेछ
रेभृ अनयोरुपधाया इत्वमपि निपात्यते॥ फाण्टं अनायाससाध्यः कषायविशेषः॥ माधवस्तु नवनीतभावाद्यागवस्थापन्नं द्रव्यं फा
ण्टमिति वेदभाष्ये आह॥ बाढं भृशं॥ अन्यत्र तु क्षु [illegible] भितं इति तु आगमशास्त्रस्यानित्यत्वात्॥ स्वनितं॥ ध्वनितं॥ लगितं॥
म्लेछितं॥ विरेभितं॥ फणितं॥ बाहितं॥ धृषिशसी वैयात्ये॥ एतौ निष्ठायां अनिट्कौ एव॥ धृष्टः॥ विशस्तः॥ अन्यत्र तु धर्षितः॥

तः क्षुभे २ नि ६

मिनि

॥सि० कु०॥ विशसितः ॥ शासादिकर्मणोस्तु वैयात्ये धृषिर्नास्ति ॥ अत एव नियमार्थमिदं सूत्रं वृत्तिः ॥ धृषेरादित्वे फलं विंसमिति हरदत्तः ॥ भाष्यवत्कस्मात्प्रा कृ० नि०
दिकर्मणोर वैयात्ये विकल्पमाह ॥ धृष्टं ॥ धर्षितं ॥ प्रधृष्टः ॥ प्रधर्षितः ॥ दृढः स्थूलबलयोः ॥ स्थूले बलवति च निपात्यते ॥ दृहदृहिहृद्धौ ॥ क्तस्य इड
॥७९॥ भावः ॥ तस्य ढत्वं ॥ हलोपः ॥ दृहितो दृंहितोन्य ॥ प्रभौ परिवृढः ॥ दृहदृहिहृद्धौ ॥ निपातनं प्राग्वत् ॥ परिवृढः ॥ परिवृं ८३
हितोन्यः ॥ कृच्छ्रगहनयोः कषः ॥ कषो निष्ठायामिण्न स्यादेतयोरर्थयोः ॥ कष्टं दुःखं तत्कारणं च ॥ स्यात्कष्टं दुःखमात्मलिं ॥ कष्टो मोहः कष्टशा
रव ५ स्त्रं ॥ दुरवगाहमित्यर्थः ॥ कषितमन्यत् ॥ घुषिरविशब्दने ॥ घुषिर्निष्ठायामनिट् स्यात् ॥ घुष्टा रज्जुः ॥ अविशब्दने किं ॥ घुषितं वाक्यं ॥ शब्देन प्र
कटीकृतार्थ ... प्रायमित्यर्थः ॥ अर्देः संनिविभ्यः ॥ एतत्पूर्वादर्देर्निष्ठायामिण्न स्यात् ॥ समर्णः ॥ न्यर्णः ॥ व्यर्णः ॥ अर्दितोन्यः ॥ अभेश्चाविदूर्ये ॥ अ
भ्यर्णं ॥ नातिदूरं ॥ आसन्नं वा ॥ अभ्यर्दितमन्यत् ॥ णेरध्ययने वृत्तं ॥ ण्यन्ताद्वृत्तेः क्तस्येडभावो णिलुक् चाधीयमानेर्थे ॥ वृत्तं छन्दश्छात्रेण
संपादितं ॥ अधीतमिति यावत् ॥ अन्यत्र वर्त्तिता रज्जुः ॥ श्रृतं पाके ॥ श्रातेः श्रपयतेश्च क्तस्येडभावो निपात्यते ॥ क्षीरहविषोः पाके ॥ श्रृतं क्षीरं ॥७९॥
स्वयमेव विक्लिन्नं ॥ पक्वं वेत्यर्थः ॥ क्षीरहविर्भ्यामन्यत्र तु श्राणं श्रपितं वा ॥ वा दान्तशान्तपूर्णदस्तस्पष्टछन्नज्ञप्ताः ॥ एते णिचि निष्ठान्ता वा निपात्यं
ते ॥ पक्षे दमितः ॥ शमितः ॥ पूरितः ॥ दासितः ॥ स्पाशितः ॥ छादितः ॥ ज्ञपितः ॥ रुष्यमत्वरसंघुषास्वनां ॥ एभ्यो निष्ठाया इड् वा ॥ रुषितः ॥ रुष्टः ॥ अ
मितः ॥ आन्तः ॥ त्वरितः ॥ तूर्णः ॥ अस्यादित्वे फलं मंदं ॥ संघुषितः ॥ संघुष्टः ॥ आस्वनितः ॥ आस्वान्तः ॥ हृषेर्लोमसु ॥ हृषेर्निष्ठाया लोमसु

स्पाशितः

छितः छातः ६

विषय इड् वा स्यात् ॥ हृषितं हृष्टं लोम ॥ विस्मितप्रतिघातयोश्च ॥ हृष्टो हृषितो मैत्रः ॥ विस्मितः प्रतिहतो वेत्यर्थः ॥ अन्यत्र तु ॥ हृषु
अलीके ॥ उदित्वान्निष्ठायां नेट् ॥ हृष्टस्तुष्टो ॥ इट् ॥ अपचितश्च ॥ चायतेर्निपातोयं ॥ अपचितः ॥ अपचायितः ॥ प्यायः पी ॥ वास्या
कृपः न्निष्ठायां ॥ व्यवस्थितविभाषेयं ॥ तेन स्वाङ्गे नित्यं ॥ पीनं मुखं ॥ अन्यत्र तु प्यानः ॥ पीनः स्वेदः ॥ सोपसर्गस्य तु प्रप्यानः ॥ आङ्पू
८३ र्वस्यान्धूधसोः स्यादेव ॥ आपीनोंधः ॥ आपीनमूधः ॥ ह्लादो निष्ठायां ॥ ह्रस्वः स्यात् ॥ प्रह्लन्नः ॥ द्यतिस्यतिमास्थामित्ति किति ॥
एषामकारोन्तादेशः स्यात्तादौ किति ॥ ईत्वदत्वयोरपवादः ॥ दितः ॥ सितः ॥ मा माङ् मेङ् ॥ मितः ॥ स्थितः ॥ शाच्छोरन्यतरस्यां ॥ शितः
शातः ॥ छितः छातः ॥ व्यवस्थितविभाषात्वाद्व्रतविषये श्यतेर्नित्यं ॥ संशितं व्रतं ॥ सम्यक् संपादितमित्यर्थः ॥ संशितो ब्राह्मणः ॥ व्र
तविषयकयत्नवानित्यर्थः ॥ दधातेर्हिः ॥ तादौ किति ॥ अभिहितं ॥ निहितं ॥ दो दद्घोः ॥ घुसंज्ञकस्य दा इत्यस्य दथ् स्यात्तादौ किति ॥
चर्त्वं ॥ दत्तः ॥ घोः किं ॥ देपूड् अवदातः ॥ तान्तो वायमादेशः ॥ नचैवं विदत्तमित्यादावुपसर्गस्य दस्तीति दीर्घापत्तिः ॥ तकारादेश
द्विधानात् ॥ दान्तो वा ॥ धान्तो वा ॥ न च दान्तत्वे निष्ठानत्वं ॥ धान्तत्वे झषस्तथोर्धोध इति धत्वं च शक्यं ॥ संनिपातपरिभाषाविरोधा
त् ॥ अच उपसर्गात्तः ॥ अजन्तादुपसर्गात्परस्य दा इत्यस्य घोः अचस्तः स्यात्तादौ किति ॥ चर्त्वं ॥ अवत्तः ॥ अवदत्तं विद

प्रत्तः

५५

तंत्रप्रदत्तंवादिकर्मणि॥ सुदत्तमनुदत्तंवनिदत्तमितिवेष्यने॥ १॥ बशाहृषयाप्राप्तं॥ दत्तिः॥ इगंतोपसर्गस्यदीर्घःस्यादादेशे ॥ ५०॥०
॥क्तिप्र॥ यस्तकारस्तदादावुत्तरपदे॥ खचिरीवेतिवर्त्वमाश्रयात्सिद्धं॥ नीत्तं॥ सूत्तं॥ घुमास्थेतीत्वं॥ धेट्॥ धीतं॥ गीतं॥ पीतं॥ ऊनसने
सात्वं॥ जातं॥ सातं॥ खातं॥ अदोजग्धिर्ल्यप्तिकिति॥ ल्यबितिलुप्तसप्तमीकं॥ अदोजग्धिःस्याल्ल्यपितादौकितिच॥ इ
॥२२॥ कारउच्चारणार्थः॥ धत्वं॥ जग्धोऽसुरिः॥ जग्धः॥ आदिकर्मणिक्तःकर्तरिच॥ प्रकृतःकटंसः॥ प्रकृतःकटःतेन॥ निष्ठायामण्यद
र्थे इतिदीर्घः॥ क्षियोदीर्घादितिनत्वं॥ प्रक्षीणःसः॥ वाक्रोशदैन्ययोः॥ क्षियोनिष्ठायांदीर्घोवास्यादाक्रोशेदैन्येच॥ क्षीणायु
क्षितायुर्वा॥ क्षीणोयंतपस्वीक्षितोवा॥ निनदीभ्यांस्नातेःकौशले॥ आभ्यांस्नातेःसस्यषस्यात्कौशलेगम्ये॥ निष्णातःशास्त्रे
षु॥ नदीष्णः॥ सुपीतिकः॥ स्तत्रंप्रतिष्णातं॥ प्रतेःस्नातेःषत्वं॥ प्रतिष्णातंसूत्रं॥ शुद्धमित्यर्थः॥ अन्यत्रप्रतिस्नातं॥ कपिष्ठलो ॥१२॥
गोत्रे॥ कपिष्ठलोनामकापिष्ठलिःपुत्रः॥ गोत्रेकिं॥ कपीनांस्थलंकपिस्थलं॥ विकुशमिपरिभ्यःस्थलं॥ एभ्यःस्थलस्यसस्यषःस्या
त्॥ विष्ठलं॥ कुष्ठलं॥ शमिष्ठलं॥ परिष्ठलं॥ गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च॥ एभ्यःकर्तरिक्तःस्या
द्भावकर्मणोश्च॥ गंगांगतः॥ गंगाप्राप्तः॥ ग्लानःसः॥ लक्ष्मीमाश्लिष्टोहरिः॥ शेषमधिशयितः॥ वैकुंठमधिष्ठितः॥ शिव

यस्य

५५

मुपासितः॥ हरिदिनमुपोषितः॥ राममनुजातः॥ गरुडमारूढः॥ विश्वमनुजीर्णः॥ पक्षेप्राप्तागंगातेनेत्यादि॥ क्तोऽधिकरणेच
ध्रौव्यगतिप्रत्यवसानार्थेभ्यः॥ एभ्योधिकरणेक्तःस्याद्यथाप्राप्तं॥ ध्रौव्यमस्थैर्यं॥ मुकुंदस्यासितमिदमिदंयातंरमापतेः॥ भुक्तमने
नेतदनंतस्येत्यादि॥ द्रुगोप्योदिदृक्षवः॥ १॥ पक्षेआसेरकर्मकत्वात्कर्तरिभावेच॥ आसितोमुकुंदः॥ आसितंतेन॥ गत्यर्थेभ्यः कर्तरि
कर्मणिच॥ रमापतिरिदंयातस्तेनेदंयातमित्यादि॥ भुजेःकर्मणि॥ अनंतेनेदंभुक्तं॥ कथंभुक्ताब्राह्मणाइति॥ भुक्तमस्त्येषा
मितिमत्वर्थेऽच्॥ वर्तमानेइत्यधिकृत्य॥ ञीतःक्तः॥ ञिक्ष्विदा॥ क्ष्विण्णः॥ ञिइंधी॥ इद्धः॥ मतिबुद्धिपूजार्थेभ्यश्च॥ मति
रिच्छा॥ बुद्धेःपृथगुपादानात्॥ राज्ञांमतः॥ इष्टः॥ तेरिष्यमाणइत्यर्थः॥ बुद्धः॥ विदितः॥ पूजितः॥ अर्चितः॥ चकारोऽनुक्तसमुच्चया
र्थः॥ शीलितोरक्षितःक्षांतः॥ आक्रुष्टोजुष्टइत्यादि॥ नपुंसकेभावेक्तः॥ क्लीबत्वविशिष्टेभावेकालसामान्येक्तःस्यात्॥ जल्पि
तं॥ शयितं॥ हसितं॥ सुयजोर्ङ्वनिप्॥ सुनोतेर्यजेश्चङ्वनिप्स्याद्भूते॥ सुत्वा॥ सुत्वानौ॥ यज्वा॥ यज्वानौ॥ जीर्यतेरतृन्॥ भू
तेइत्येव॥ जरन्॥ जरंतौ॥ जरंतः॥ वासरूपन्यायेननिष्ठापि॥ जीर्णो॥ जीर्णवान्॥ छंदसिलिट्॥ लिटःकानज्वा॥ क्वसुश्च॥ इ
हभूतसामान्येछंदसिलिट्॥ तस्यविधीयमानौक्वसुकानचावपिछंदस्येवेतित्रिमुनिमतं॥ कवयस्तुबहुलंप्रयुंजते॥ तंतस्थिवां

आत २

संनगरोपकंठे॥ श्रेयांसि सर्वाण्यधिजग्मुषस्ते इत्यादि॥ वस्वेकाजाद्घसां॥ कृतद्विर्वचनानामेकाचामादंतानां घसेश्च वसोरिट्॥ ह० स०प्र०
॥सि०उ०॥ नान्येषां॥ आदिवान्॥ आदिवान्॥ ददिवान्॥ ऊक्षिवान्॥ एषां किं॥ बभूवान्॥ भाषायां सदवसश्रुवः॥ सदादिभ्यो भूतसामा
न्ये भाषायां लिट् वा स्यात्तस्य नित्यं क्वसुः॥ निषेदुषीमासनबंधधीरः॥ अध्यूषुषस्तामभवज्जनस्य॥ शुश्रुवान्॥ उपे
॥९३॥ युषिवाननाश्वाननूचानश्च॥ एते निपात्यंते॥ उपपूर्वादिणो भाषायामपि कर्तृमात्रे लिट् तस्य नित्यं क्वसुः स्यात्॥ इट्॥ उपेयिवान्॥
उपेयुषः स्वामपि मूर्तिमग्र्यां॥ उपेयुषी उपेतिं विवक्षितं॥ ईयिवान्॥ समीयिवान्॥ नञ्पूर्वादश्नातेः क्वसुरिडभावश्च॥ अन
श्नतेरनाश्नुष इति भारविः॥ अनुपूर्वाद्वचेः कर्तरि कानच्॥ वेदस्यानुवचनं कृतवाननूचानः॥ विभाषा गमहनविदविशां॥
एभ्यो वसोरिड्वा॥ जग्मिवान्॥ जगन्वान्॥ जघ्निवान्॥ जघन्वान्॥ विविदिवान्॥ विविद्वान्॥ विविशिवान्॥ विविश्वान्॥
विशिना साहचर्याद्विदेर्ग्रहणं॥ वेत्तेस्तु विविद्वान्॥ दृशेश्च॥ ददृशिवान्॥ ददृश्वान्॥ लटः शतृशानचावप्रथमासमानाधि
करणे॥ अप्रथमान्तेन सामानाधिकरण्ये सतीत्यर्थः॥ शबादि॥ पचंतं चैत्रं पश्य॥ आने मुक्॥ अंगस्यातो मुगागमः स्यादा ॥९३॥
ने परे॥ पचमानं चैत्रं पश्य॥ लडित्यनुवर्त्तमाने पुनर्लड्ग्रहणमधिकविधानार्थं॥ तेन प्रथमासामानाधिकरण्येपि क्वचित्

दत्ते ३

सन्ब्राह्मणः॥ माङ्याक्रोशे इति वाच्यं॥ मा जीवन्॥ माङि लुङिति प्राप्ते एतद्वचनसामर्थ्याल्लट्॥ संबोधने च॥ हे पचन्॥ हे पचमान॥
लक्षणहेत्वोः क्रियायाः॥ क्रियायाः परिचायिके हेतौ चार्थे वर्त्तमानाद्धातोर्लटः शतृशानचौ स्तः॥ शयाना भुंजते यवनाः॥ अर्जयन्वसति॥ ह
रिं पश्यन्मुच्यते॥ हेतुः फलं कारणं च॥ कृत्यचः॥ प्रपीयमाणः सोमः॥ ईदासः॥ परस्यानस्य ईत् स्यात्॥ आदेः परस्य॥ आसीनः॥ विदेः
शतुर्वसुः॥ विदेः परस्य शतुर्वसुरादेशो वा॥ विद्वान्॥ विदन्॥ विदुषी॥ तौ सत्॥ तौ शतृशानचौ सत्संज्ञौ स्तः॥ लृटः सद्वा॥ व्यवस्थितवि ॥९४॥
भाषेयं॥ तेनाप्रथमासामानाधिकरण्ये प्रत्ययोत्तरपदयोः संबोधने लक्षणहेत्वोश्च नित्यं॥ करिष्यन्तं करिष्यमाणं वा पश्य॥ करिष्यतोऽ
पत्यं कारिष्यतः॥ करिष्यद्भक्तिः॥ हे करिष्यन्॥ अर्जयिष्यन्वसति॥ प्रथमासामानाधिकरण्येपि क्वचित्॥ करिष्यति॥ करिष्यन्॥ पूङ्यजोः शा
नन्॥ वर्त्तमाने॥ पवमानः॥ यजमानः॥ ताच्छील्यवयोवचनशक्तिषु चानश्॥ एषु द्योत्येषु कर्तरि चानश्॥ भोगं भुंजानः॥ कवचं बिभ्राणः॥ शत्रुं
निघ्नानः॥ इङ्धार्योः शत्रकृच्छ्रिणि॥ आभ्यां शतृ स्यादकृच्छ्रिणि कर्तरि॥ अधीयन्॥ धारयन्॥ अकृच्छ्रिणि किं॥ कृच्छ्रेणाधीते धारयति
द्विषोऽमित्रे॥ द्विषन् शत्रुः॥ सुञो यज्ञसंयोगे॥ सर्वे सुन्वन्तः॥ सर्वे यजमानाः सत्रिणः॥ अर्हः प्रशंसायां॥ अर्हन्॥ आक्वेस्तच्छीलतद्ध
र्मतत्साधुकारिषु॥ क्विपमभिव्याप्य वक्ष्यमाणाः प्रत्ययास्तच्छीलादिषु कर्तृषु बोध्याः॥ तृन्॥ कर्त्ता कटान्॥ अलंकृञ्निराकृञ्प्र

॥सि०कौ०॥ नञोत्पवोत्पतोन्मदरुच्यपत्रपहतुश्फसदचरश्लुच् ॥ अलंकरिष्णुरित्यादि ॥ णेश्छंदसि ॥ वीरुधः पारयिष्णवः ॥ भुवश्च ॥ छंदसीत्येव ॥ भ कृ० वर्त्त०
विष्णुः ॥ कथं तर्हि जगत्प्रभोरप्रभविष्णु वैष्णवमिति ॥ निरंकुशाः कवयः ॥ चकारोऽनुक्तसमुच्चयार्थः ॥ भ्राजिष्णुरिति वृत्तिः ॥ एवं क्षयिष्णुः ॥ नै
॥९४॥ तज्ज्ञाप्येष्टं ॥ ग्लाजिस्थश्च ग्स्नुः ॥ छंदसीति निवृत्तं ॥ गित्यनन्तुक्तितः ॥ तेन स्थईत्वं न ग्लास्नुः ॥ गित्वान्न गुणः ॥ जिष्णुः ॥ स्थास्नुः ॥ दाङ्कः
श्युकः किती त्यत्र गकारप्रश्लेषादिट् नेच् ॥ भूस्नुः ॥ दंशेश्छंदस्युपसंख्यानं ॥ दंक्ष्णवः पशवः ॥ त्रसिगृधिधृषिक्षिपेः क्नुः ॥ ॥ नेड्वशि
तुः कृति ॥ त्रस्नुः ॥ गृध्नुः ॥ धृष्णुः ॥ क्षिप्नुः ॥ शमित्यष्टाभ्यो घिनुण् ॥ उकार उच्चारणार्थ इति काशिका ॥ अनुबंध इति भाष्यं तेन शमिनिति
राशमिनीत्र इत्यत्र गित इत्वेति ह्रस्वविकल्पः ॥ नचैवं शमीशमिनावित्यत्र नुम्प्रसंगः ॥ झल्ग्रहणमुपकृष्य झलंतानामेव तद्विधा
नात् ॥ नोदात्तोपदेशस्येति वृद्धिनिषेधः ॥ शमी ॥ तमी ॥ दमी ॥ श्रमी ॥ भ्रमी ॥ क्षमी ॥ क्लमी ॥ प्रमादी ॥ उत्पूर्वान्मदेः ॥ अलंकृञादि सूत्रेणोक्तु
क्तो वासरूपविधिना घिनुणपि ॥ उन्मादी ॥ ताछील्केषु वासरूपविधिर्नास्तीति तु प्रायिकं ॥ संपृचानुरुधाङ्यमाङ्यसपरिसृसंसृ
जपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरजभजातिचरापचरामुषाभ्याहनश्च ॥९४॥
घिनुण् ॥ संपर्की ॥ अनुरोधी ॥ आयामी ॥ परिसारी ॥ संसर्गी ॥ परिदेवी ॥ संज्वरी ॥ परिक्षेपी ॥ परिराटी ॥ परिवादी ॥ परिदाही ॥ परिमोही
दोषी ॥ द्वेषी ॥ द्रोही ॥ दोही ॥ योगी ॥ आक्रीडी ॥ विवेकी ॥ त्यागी ॥ रागी ॥ भागी ॥ अतिचारी ॥ अपचारी ॥ आमोषी ॥ अभ्याघाती ॥ वौकषल

स्रंभः स्रंभी

सकत्थस्रंभः ॥ विकाषी ॥ विलासी ॥ विकत्थी ॥ विस्रंभी ॥ अपेच्चलषः ॥ वाहौ ॥ अपलाषी ॥ विलाषी ॥ प्रेलपसृद्रुमथवदवसः ॥ प्रलापी ॥ प्रसारी ॥ प्र
द्रावी ॥ प्रमाथी ॥ प्रवादी ॥ प्रवासी ॥ निंदहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासूयो वुञ् ॥ पंचम्यर्थे प्रथमा ॥ एभ्यो वुञ्
स्यात् ॥ निंदकः ॥ हिंसकः ॥ इत्यादि ॥ ण्वुला सिद्धे वुञ्वचनं ज्ञापकं ॥ ताछील्यादिषु वासरूपन्यायेन तृजादयो नेति ॥ देविक्रुशोश्चोपसर्गे ॥ आदे
वकः ॥ आक्रोशकः ॥ उपसर्गे किं ॥ देवयिता ॥ क्रोष्टा ॥ चलनशब्दार्थादकर्मकाद्युच् ॥ चलनार्थाच्छब्दार्थाच्च युच् स्यात् ॥ चलनः ॥ चोपनः ॥ कं
पनः ॥ शब्दनः ॥ रवणः ॥ अकर्मकात्किं ॥ पठिता विद्यां ॥ अनुदात्तेतश्च हलादेः ॥ अकर्मकाद्युच् ॥ वर्त्तनः ॥ वर्धनः ॥ अनुदात्तेतः किं ॥ भवि
ता ॥ हलादेः किं ॥ एधिता ॥ अकर्मकात्किं ॥ वसिता वस्त्रं ॥ जुचंक्रम्यदंद्रम्यसृगृधिज्वलशुचलषपतपदः ॥ जु इति सौत्रो धातुर्गतौ वेगे च ॥
जवनः ॥ चंक्रमणः ॥ दंद्रमणः ॥ सरणः ॥ पूर्वेण सिद्धे यङ्ग्रहणं लषपतपदार्थं उकञा बाधा मा भूदिति ॥ तेन ताछीलिकेषु परस्परं वासरूपवि
धिर्नास्ति ॥ तेनालंकृञस्तृन्न ॥ क्रुधमंडार्थेभ्यश्च ॥ क्रोधनः ॥ रोषणः ॥ मंडनः ॥ भूषणः ॥ नयः ॥ यकारांताच्च युन् ॥ क्नूयिता ॥ क्ष्मायिता ॥ सू
ददीपदीक्षश्च ॥ युचो न ॥ सूदिता ॥ दीपिता ॥ नमिकंपी तिसूत्रेण युचो बाधसिद्धे दीपिग्रहणं ज्ञापयति ॥ ताछीलिके षु वासरूपविधिर्ना
स्तीति प्रायिकमिति ॥ तेन कत्था ॥ कमना युवतिः ॥ कंप्रा कमना शाखा ॥ यदि सूददीपयुचो न तर्हि कथं मधुसूदन इति ॥ नंद्यादिः ॥ लषपत

अथानंतता... इति अथादेशः ४

भ्य

गम

॥सि॰कौ॰॥ पदस्थाभूवृषहनकमशॄभ्य उकञ् ॥ लाषुकः ॥ पातुकः ॥ पादुकः इत्यादि ॥ जल्पभिक्षकुट्टलुंटवृङः षाकन् ॥ जल्पाकः ॥ भिक्षाकः ॥ कुट्टाकः ॥ कृदंत॰
लुंटाकः ॥ वराकः ॥ प्रजोरिनिः ॥ प्रजवी ॥ प्रजविनौ ॥ प्रजविनः ॥ जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च ॥ जयी ॥ दरी ॥ क्षयी ॥ विश्र- कैवराकी॰
॥९५॥ यी ॥ अत्ययी ॥ वमी ॥ अव्यथी ॥ अभ्यमी ॥ परिभवी ॥ प्रसवी ॥ स्पृहिगृहिपतिदयिनिद्रातंद्राश्रद्धाभ्य आलुच् ॥ आद्यास्त्रयश्चुरादावदंं-
ताः ॥ स्पृहयालुः ॥ पतयालुः ॥ गृहयालुः ॥ दयालुः ॥ निद्रालुः ॥ तत्पूर्वो द्राः ततो नांतत्वं निपात्यते ॥ तंद्रालुः ॥ श्रद्धालुः ॥ शीङो वाच्यः ॥ शया-
लुः ॥ दाधेट्सिशदसदो रुः ॥ दारुः ॥ धारुः ॥ सेरुः ॥ शद्रुः ॥ सद्रुः ॥ ~~सृमरः~~ ॥ सृघस्यदः क्मरच् ॥ सृमरः ॥ घस्मरः ॥ अद्मरः ॥ भंजभासमिदो घुरच् ॥
भंगुरः ॥ भासुरः ॥ मेदुरः ॥ विदिभिदिच्छिदेः कुरच् ॥ विदुरः ॥ भिदुरं ॥ छिदुरं ॥ इण्नशजिसर्तिभ्यः क्वरप् ॥ इत्वरः ॥ इत्वरी ॥ नश्वरः ॥ जित्वरः ॥ सृत्व-
रः ॥ गत्वरश्च ॥ गमेरनुनासिकलोपो निपात्यते ॥ गत्वरः ॥ गत्वरी ॥ जागरूकः ॥ जागर्तेरूकः स्यात् ॥ जागरूकः ॥ यजजपदशां यङः ॥ एभ्यो
यङंतेभ्य ऊकः स्यात् ॥ दशामिति भाविना नलोपेन निर्देशः ॥ यायजूकः ॥ दंदशूकः ॥ नमिकंपिस्म्यजसकमहिंसदीपो रः ॥ नम्रः ॥ कंप्रः ॥ ॥९९॥
स्मेरः ॥ जसिर्नञ्पूर्वः क्रियासातत्ये वर्त्तते ॥ अजस्रं ॥ संततमित्यर्थः ॥ कम्रः ॥ हिंस्रः ॥ दीप्रः ॥ सनाशंसभिक्ष उः ॥ चिकीर्षुः ॥ आशंसुः ॥ भि-
क्षुः ॥ विंदुरिच्छुः ॥ वेत्तेर्नुम् इषेश्छत्वं च निपात्यते ॥ वेत्तीति शीलो विंदुः ॥ इच्छतीति शीलः इच्छुः ॥ क्याच्छंदसि ॥ देवान् जिगाति सुम्नयुः ॥

जंजपूकः

आदृगमहनजनः किकिनौ लिट् च ॥ आदंतादृदंताद्गमादिभ्यश्च किकिनौ स्तश्छंदसि तौ च लिड्वत् ॥ बभ्रिर्वज्रं पपिः सोमं ददिर्गाः ॥ जग्मि-
र्युवा ॥ जघ्निर्वृत्रममित्रियं ॥ जज्ञिः ॥ भाषायां धाञ्कृसृगमिजनिनमिभ्यः ॥ दधिः ॥ चक्रिः ॥ सस्रिः ॥ जग्मिः ॥ जज्ञिः ॥ नेमिः ॥ सासहिर्वा- कौ
वहिश्चाचलिः पापतीनामुपसंख्यानं ॥ यङंतेभ्यः सहत्यादिभ्यः किकिनौ तेन यग्भावश्च निपात्यते ॥ स्वपितृषोर्नजिङ् ॥ स्वप्नक् ॥ तृष्ण-
पः क् ॥ तृष्णजौ ॥ तृष्णजः ॥ धृष्णुरित्याद्यमिति काशिकादौ ॥ धृष्णक् ॥ शॄवंद्योरारुः ॥ शरारुः ॥ वंदारुः ॥ भियः क्रुक्लुकनौ ॥ भीरुः ॥ भीलुकः ॥
क्रुकन्नपि वाच्यः ॥ भीरुकः ॥ स्थेशभासपिसकसो वरच् ॥ स्थावरः ॥ ईश्वरः ॥ भास्वरः ॥ पिसृ पेसृ गतौ ॥ पेस्वरः ॥ कस्वरः ॥ यश्च यङः ॥ यातेर्य- स
ङंताद्वरच् ॥ अतो लोपः ॥ तस्य यलोपं प्रति स्थानिवत्त्वनिषेधाल्लोपो व्योरिति यलोपः ॥ अल्लोपस्य स्थानिवत्त्वमाश्रित्य ॥ तो
लोपे प्राप्ते वरे लुप्तं न स्थानिवत् ॥ यायावरः ॥ भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप् ॥ विभ्राट् ॥ भाः ॥ भासौ ॥ धुर्वी हिंसा-
यां ॥ राल्लोप इति वलोपः ॥ धूः ॥ धुरौ ॥ विद्युत्तौ ऊर्क् ॥ पूः ॥ पुरौ ॥ दृशिग्रहणस्यापकर्षणाज्जवतेर्दीर्घः ॥ जूः ॥ जुवौ ॥ जुवः ॥ ग्रावशब्दस्यपा-
नुनासमासः स्तुवेर्निपात्यते ॥ ततः क्विप् ॥ ग्रावस्तुत् ॥ अन्येभ्योपि दृश्यते ॥ क्विप् ॥ छिद् ॥ छित् ॥ भित् ॥ दृशिग्रहणं विध्यंतरोपसं-
ग्रहणार्थं ॥ क्वचिद्दीर्घः ॥ क्वचिदसंप्रसारणं ॥ क्वचिद्द्वे ॥ क्वचिद्ह्रस्व ॥ तथा च वार्त्तिकं ॥ क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसंप्र-

॥सि॰ उ॰॥ सारणं च ॥ क्विप्वचीत्यादिना उणादिसूत्रेण केषांचित्सिद्धेः तच्छीलादौ तृन्नाबाधो माभूदिति वार्त्तिके ग्रहणं ॥ वक्तीति वाक् ॥ प्रच्छती कृदंत॰
॥९६॥ ति प्राट् ॥ आयतं स्तौतीत्यायतस्तूः ॥ कटं प्रवते कटप्रूः ॥ जूरुक्तः ॥ श्रयति हरिं श्रीः ॥ द्युतिगमिजुहोतीनां द्वे च ॥ दृशिग्रहणादभ्यास
संज्ञा ॥ दिद्युत् ॥ जगत् ॥ जुहोतेर्दीर्घश्च ॥ जुहूः ॥ दृ भये ॥ अभ्यासस्य ह्रस्वश्च ॥ दीर्यतीति दद्रत् ॥ ध्यायतेः संप्रसारणं च ॥ धीः ॥ भुवः संज्ञांत
रयोः ॥ मित्रभूर्नाम कश्चित् ॥ धनिकाधमर्णयोरंतरे यस्तिष्ठति विश्वासार्थं स प्रतिभूः ॥ विप्रसंभ्यो ड्वसंज्ञायां ॥ एभ्यो भुवो डुः स्या
शत द्रुः न्नतु संज्ञायां ॥ विभुर्व्यापकः ॥ प्रभुः स्वामी ॥ संभुर्जनिता ॥ संज्ञायां तु विभूर्नाम कश्चित् ॥ मितद्र्वादिभ्य उपसंख्यानं ॥ मितंद्र
त वतीति मितद्रुः ॥ शंभुः ॥ अंतर्भावितण्यर्थोऽत्र भवतिः ॥ धः कर्मणि ष्ट्रन् ॥ धेटो धाञश्च कर्मण्यर्थे ष्ट्रन् स्यात् ॥ धात्री जनन्यामलकी
वसुमत्युपमातृषु ॥ दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे ॥ दाबादेः ष्ट्रन् स्यात्करणेऽर्थे ॥ दात्रं नेत्रं ॥ श्री
तितुत्रथसिसुसरकसेषु च ॥ एषां दशानां कृत्प्रत्ययानामिण्न स्यात् ॥ शस्त्रं योत्रं स्तोत्रं तोत्रं सेत्रं सेक्त्रं मेढ्रं पत्रं दंष्ट्रा नद्ध्री ॥ ह ॥९६॥
लसूकरयोः पुवः ॥ पूङ्पूञोः करणे ष्ट्रन् स्यात् तच्चेत्करणं हलसूकरयोः ॥ हलस्य सूकरस्य वा पोत्रं ॥ मुखमित्यर्थः ॥ अर्तिलू
धूसूखनसहचर इत्रः ॥ अरित्रं लवित्रं धवित्रं सवित्रं खनित्रं सहित्रं चरित्रं ॥ पुवः संज्ञायां ॥ पवित्रं ॥ येनाज्यमुत्पूयते यच्चानामिकावेष्टनं ॥

कर्त्तरि चर्षिदेवतयोः ॥ पुवः इत्रः स्यात् ॥ ऋषौ करणे देवतायां कर्त्तरि ॥ ऋषिर्वेदमंत्रः ॥ तदुक्तमृषिणेति निर्देशात् ॥ पूयतेऽनेनेति पवित्रं
देवतायां तु अग्निः पवित्रं स मा पुनातु ॥ ॥ अथोणादयो लिख्यंते ॥ ॥ कृवापाजिमिस्वदिसाध्यशूभ्य उण् ॥ करोतीति कारुः
शिल्पी ॥ कारकश्च ॥ आतो युक् ॥ वातीति वायुः ॥ पातीति पायुर्गुदं ॥ जयत्यभिभवति रोगानिति जायुरौषधं ॥ मिनोति प्रक्षिपति देहे ऊ
ष्माणमिति मायुः पित्तं ॥ स्वादुः ॥ साध्नोति परकार्यमिति साधुः ॥ अश्नुते आशु शीघ्रं ॥ आशुर्व्रीहिः पाटलः स्यात् ॥ छंदसीणः ॥ मा
न आयो ॥ दृसनिजनिचरिचटिभ्यो ञुण् ॥ दीर्यते इति दारु ॥ स्नुः प्रस्थः सानु रस्त्रियां ॥ जानु ॥ जानुनी ॥ इदं जनिवध्योश्चेति न निषेधः ॥ अ
नुबंधद्वयं सामर्थ्यात् ॥ चारु रम्यं ॥ चाटु प्रियं वाक्यं ॥ मृगय्वादित्वात्कुप्रत्यये चटुरप्यपि ॥ किंजरयोः श्रिणः ॥ किं शृणातीति किंशारु
निर्जननं॥ घासिः सस्यं अग्निश्च॥ अजयतिभ्यांच॥ आजिः संग्रामः॥ आतिः पक्षी॥ पादेच॥ पदाजिः॥ पदातिः॥ आशिपणाय्योरुडायलु
कौच॥ अशेः रुद्र॥ राशिः पुंजः॥ पणायतेराय्लुक॥ पाणिः करः॥ वातेर्डिच्च॥ विः पक्षीस्त्रियावीत्यपि॥ प्रेहरतेः कूपे॥ प्रहिः कूपः॥ नौवे
यलोपः पूर्वस्यचदीर्घः॥ वेञ इण्स्याद्यलोपश्च॥ नेर्दीर्घः॥ नीविः॥ नीवीवस्त्रग्रंथौमूलधनेच॥ समाने[illegible]ःसंनोदात्तः॥ समानशब्देउ ख्यः २
पपदे[illegible] इत्यस्मादिण्स्यात्सचडित्॥ यलोपश्च॥ [illegible]ः समानस्य उदात्तः सइत्यादेशश्च॥ समानंख्यायतेजनैरिसः[illegible]रवा॥
ख्या

सि०उ० आ॰ ॰डिश्वि हनिस्यांङ्कस्वश्च॰॥ इण्स्यात्सवडितः॥ आङोङ्कस्वश्च॰॥ श्रियः पात्यश्रिकोटयः॥ सर्पे वृत्रासुरेप्याहिः॥ अवइः॥ रविः पविः॥ क्रु०उ०४
तरिः॥ कविः अरिः॥ अङ्किः॥ खनिकष्यज्यसिवसिवनिसनिध्वनिग्रंथिचलिभ्यश्च॰॥ खनिः॥ कषिर्हिंस्रः॥ आजिः॥ असिः॥ वासिर्वस्त्रं॥ वज्रं०२
॥१०४॥ वनिराग्निः॥ सनिर्भक्तिर्दानं च॥ ध्वनिः ग्रंथिः॥ चलिः॥ पशुः॥ इतेश्छंदसि॰॥ वर्तिः॥ भुजेः किच॥ भुजिः॥ कृगृशॄपृकुटिभिदिछिदिभ्य
श्च॰॥ इः कित्स्यात्॰॥ किरिर्वराहः॥ गिरिर्गोत्राक्षिरोगयोः॥ गिरिणाकाणः॥ शिरिः शलभहंतारः॥ पुरिर्नगरं राजा नदी च॰॥ कुटिः शाला
शरीरं च॰॥ भिदिर्वज्रं॰॥ छिदिः परशुः॥ कुडिकंप्योर्नलोपश्च॥ कुडिर्देहः॥ कुडिर्देहः॥ कपिः॥ सर्वधातुभ्यो मनिन्॰॥ क्रियत इति कर्म॥ वर्म॰
सद्म॰॥ जन्म॰॥ शर्म॥ वर्म॰॥ स्थाम बलं॰॥ इस्मन्निति ङ्कस्वः॥ छद्म॰॥ सुत्रामा॰॥ हंहर्नोच॰॥ नः नकारस्याकारः॥ ब्रह्म तत्त्वं तपो वेदा ब्रह्मा वि
प्रः प्रजापतिः॥ अकिशाकिभ्यां दृसि॰॥ अक्ष्मा॥ शाक्ष्मा॰॥ हृभृधृसृस्तृशृभ्य इमनिच्॰॥ हरिमा॰ कालः॥ भरिमा कुटुंबं॰॥ धरिमा रूपं
सरिमा वायुः॥ स्तरिमा तल्पं॥ शरिमा प्रसवः॥ जनिमृङ्भ्यामिमनिन्॰॥ जनिमा जन्म॰॥ मरिमा मृत्युः॥ वेत्रः सर्वत्र॰॥ छंदसि भाषा
॥१२५॥ यां वेत्सर्पः॥ वेमावायदंडः॥ अर्धर्चादिः॥ सामनी वेमनी इति वृत्तिः॥ नामन्सीमन्व्योमन्रोमन्लोमन्पाप्मन्ध्यामन्॰॥ सप्तामी
मनि॰ नंतानिपात्यंते॰॥ म्नायते ऽनेनेति नाम॰॥ सिनोति द्वीर्घः॥ सीमा॰॥ सीमानौ॥ सीमानः॥ पक्षेडाप्॰॥ सीम्नेसीमाः॥ मेत्र॰॥ अंतस्य॰

कोरनन्:३
त्वं॥ गुणः॥ व्योम॰॥ रौतेः रोम॥ लोम॥ पाप्मा पापं॥ ध्याम परिमाणं तेजश्च॰॥ मिथुनेमनिः॥ उपसर्गे क्रियेसंबद्धे मिथुने॥ स्वरापभिदं॰॥
सुशर्मा॰॥ सातिस्यां मनिन्मनिनौ॰॥ स्यति साम॥ सामनी॥ आत्मा॰॥ हनिमशिभ्यां सिकन्॰॥ हंसिका हंसयोषिति॰॥ मक्षिका॥
गि कासंन्॰॥ कवरः॥ ॰रुड च॰॥ गरुडः॥ इंदेः कमिनलोपश्च॰॥ इदं॥ कायतेर्डिमि॥ किम्॰॥ सर्वधातुभ्यः ष्ट्रन्॰॥ वस्त्रं॰॥ अस्त्रं॰ श
स्त्रं॰॥ इस्मन्निति ङ्कस्वत्वं॰॥ छादनाछत्रं॰॥ पत्र ॰छिगमिरमिहनिविश्यशां वृद्धिश्च॰॥ भ्राष्ट्रः॥ गात्रं शकटं॰॥ रात्रं सहस्रं॥ हात्रं मरणं॥ वेष्ट्रं
जगत्॰॥ आष्ट्रमाकाशः॥ दिवर्धश्च॥ द्योत्रं ज्योतिः॥ उषि॰ खनिभ्यां कित्॰॥ उष्ट्रः॥ खात्रं खनित्रं॰॥ मरणं जलाधारश्च॰॥ सिविसु
दि योरून्तत्॰॥ सूत्रं॥ मूत्रं॰॥ अमिचिमिदिशसिभ्यः क्तः॥ अंत्रं॰॥ चित्रं॰॥ मित्रं॥ शस्त्रं॰॥ पुवोह्रस्वश्च॰॥ पुत्रः॥ स्त्यायते॰ ड्रट्॥ स्त्री॰॥
गुध्वीपचिवचियमिसदिक्षदि॰भ्यः त्रः॥ गोत्रं स्यान्नामवंशयोः॥ गोत्रा पृथिवी॰॥ धत्रं गृहं॰॥ वेत्रं॥ पक्त्रं॥ वक्त्रं॥ यंत्रं॰॥ सत्रं॥ क्षत्रं॰॥ हु
ड्यामाश्रुभसिभ्यस्त्रन्॰॥ होत्रं॰॥ यात्रा॥ मात्रा॰॥ श्रोत्रं॰॥ भस्त्रा॰॥ गमेरा च॰॥ गात्रं॰॥ दाञिभ्यां छंदसि॥ दात्रं॰॥ पात्रं॰॥ भुवादिभ्यश्चाणि
त्रन्॰॥ भावित्रं॰॥ वादित्रं॰॥ गायित्रमादन॰॥ चरेर्वृत्ते॥ चारित्रं॰॥ अशित्रादिभ्य इत्रोत्रौ॰॥ अशित्रं॰॥ वहित्रं॥ धरित्री॰॥ त्रैङ् एवमादिभ्य
उत्रः॥ तोत्रं प्रहरणं॰॥ वरुत्रं प्रावरणं॰॥ अमेर्द्विषति चित्॰॥ अमित्रः शत्रुः॥ आसमिणू निकषिभ्यां॥ संपूर्वाद्रिणः निपूर्वात्

वेश्चात्स्यात्॥ स्वरादित्वादव्ययत्वं॥ समया॥ निकषा॥ चितेः कणः कश्च॥ चाकुलकाद्गुणः॥ चिक्कणं मसृणं स्निग्धं॥ सर्तेः स्मन्॥ सर्म॥ ऊ० ३०४
॥सि०उ०॥ पातेर्डुम्सुन्॥ पुमान्॥ रुचिवुऊिभ्यां किष्यन्॥ रुचिष्मिहं॥ कुजिष्मोरसः॥ वसेस्तिः॥ वस्तिर्नाभेरधोद्वयोः॥ वस्त्यः॥ स्पृशेः श्मण्॥ वा
कुलकाद्मासः॥ शास्तिः॥ राजदंडः॥ विश्वारव्यमगमस्यतीत्यगस्तिः॥ शाकंध्वादिः॥ सावसेः॥ स्वस्तिः॥ स्वरादिपाठादव्ययत्वं॥ दीव्यतेः॥ वित
॥११५॥ स्तिः॥ पादप्रथिस्यांनित्॥ पत्तिः॥ प्रथितिः॥ नितुत्रेष्वग्रहादीनामितीट्॥ हृणातेर्ह्रस्वश्च॥ हृतिः॥ कृतृकृपिभ्यः कीटन्॥ किरीटं॥ ति
रीटं सुवर्णशिरोवेष्टनं॥ कृपीटं कुक्षिवारिणोः॥ रुचिवचिकुचिकुटिभ्यः कितच्॥ रुचितं मिष्टं॥ उचितं॥ कुचितं परिमितं॥ कुटितं कु
टिलं॥ कुटिकुषिभ्यां क्मलन्॥ कुट्मलं॥ कुष्मलं॥ कुपेर्लश्च॥ कुल्मलं पापं॥ सर्वधातुभ्योऽसुन्॥ चेतः॥ सरः॥ पयः॥ सदः॥ रपेरत एच्च॥
रेपोऽवद्यं॥ अशेर्देवने युट् च॥ देवने रक्षतो॥ यशः॥ उब्जेर्बले बलोपश्च॥ ओजः॥ श्वेः संप्रसारणं च॥ शवः॥ शवसी॥ बलपर्यायोऽयं॥
श्रयतेः स्वांगे शिरः किच्च॥ श्रयतेः शिर आदेशः असुन् किच्च॥ शिरः॥ शिरसी॥ अर्तेरुरच्च॥ उरः॥ व्याधौ मुट् च॥ अर्शो गुदव्याधिः॥ उदके
नुट् च॥ अर्तेरसुन् स्यात्तस्य नुट्॥ अर्णः॥ अर्णसी॥ इण आगसि॥ एनः॥ रिचेर्धने घिच्च॥ चात्मसयस्यनुट्॥ घित्वात्कुत्वं॥ रे ॥११५॥
क्णः सुवर्णं॥ चायतेरन्ने ह्रस्वश्च॥ चनोऽन्नं॥ वृङ्शीङ्भ्यां रूपस्वांगयोः पुट् च॥ वर्पो रूपं॥ शेपो गुह्यं॥ स्रुरीभ्यां तुट् च॥ स्रोतः॥ रेतः॥

पातेर्बले जुट् च॥ पाजः॥ पाजसी॥ उदके थुट् च॥ पाथः॥ पाथसी॥ अन्ने च॥ पाथोऽन्नं॥ अदेर्नुम्धौ च॥ अदेर्निके वा च्येऽसुन्नुम
गमोधदेशश्च॥ अंधोऽन्नं॥ स्कंदेश्च स्वांगे॥ स्कंधः॥ स्कंधसी॥ आपः कर्माख्यायां [illegible] ह्रस्वो नुट् च वा॥ अप्नः॥ अपः॥ बाहुल
कादापः॥ आपसी॥ रूपे जुट् च॥ अक्नोरूपं॥ उदके नुम्भौ च॥ अंभः॥ न[illegible]र्दीर्घश्च॥ नभः॥ इण आग अपराधे च॥ आगः पापापराधौ
यो॥ अमेर्हुक् च॥ अंहः॥ रमेश्च॥ रंहः॥ [illegible]देशोह च॥ रमंतेऽस्मिन्नहः॥ अच्यंजियुजिभृजिभ्यः कुश्च॥ एभ्योऽसुन् कवर्गश्चांतादेशः॥ अं
कश्चिह्नशरीरयोः॥ अंगः पक्षी॥ योगः समाधिः॥ भर्गस्तेजः॥ भुरंजिभ्यां कित्॥ भुवः॥ रजः॥ वसेर्णित्॥ वासो वस्त्रं॥ चंदेरादेश्च छः॥ छं
दः॥ पचिवचिभ्यां सुट् च॥ पक्षसी तुस्थतौ पक्षे॥ वक्षो हृदयं॥ वहिहाधाञ्भ्यश्छंदसि॥ वहाः॥ अनड्वान्॥ हासाश्चंद्रः॥ धासाः पर्वतः॥
इति प्रांचः॥ वस्तुतस्तु णिदित्यनुवर्त्तते॥ न तु सुट्॥ तेन वहरूपधावृद्धिः॥ इतरयोरातो युगिति युक्॥ शोणाध्वच्छंदवासोहं॥ श्रोता
ह्वयं गणतस्तोमवाहाः॥ विश्वो विहायाः॥ त्वद्धाजीवाजंभरो विहायाः॥ देवो नयः पृथिवीं विश्वधायाः॥ अधारयत्पृथिवीं विश्वधायसं॥
धर्णसिंप्रहरिधायस्तमिसादिः॥ इण आसिः॥ अयाः॥ अग्निः॥ स्वरादिपाठादव्ययत्वं॥ मिथुनेऽसिः॥ सर्वं च ह्रस्वं॥ उपसर्गविशिष्टो धा
तुर्मिथुनं॥ तत्रासुनोऽपवादोऽसिः॥ स्वरार्थः॥ नञि हन एह च॥ अनेहाः॥ अनेहसौ॥ विधाञो वेध च॥ विदधातीति वेधाः॥ नुवो धुट्
स्वरसत्वं च॥ नाधाः॥ गतिकारको[illegible]ह्नोति स्वरत्वं च॥ असिः स्यात्॥ सुतपाः [illegible] जातवेदाः॥ गतिकारकोपपदात्कृदिकुत्तरपदप्र
पपदात्पूर्वप्र

कृतिस्वरत्वेसतिशेषस्यानुदात्तत्वेप्राप्तेतद[illegible]पवादार्थमिदं॥ चंद्रेमोडित्॥ चंद्रोपपदात् माङोसिःस्यात्सचडित्॥ चंद्रमाः॥ रजतम कृ॰उ॰५
॥सि॰उ॰॥ घृतत्वंच॥ ~~उषमतेरसिः॥ इरुडागमश्च॥ अंगिराः॥ सर्त्तेरप्पूर्वादसिः॥ प्रायेणा॥ वसेर्वकुलशिय॥ नक्षत्राः॥ उषःकित्॥ उषः॥ दमेरुन्~~
सिः॥ समानिर्दमुनाः॥ वयसिधाञः॥ वयोधास्तरुणः॥ पयसिच॥ पयोधाः॥ समुद्रोमेघश्च॥ पुरसिच॥ पुरोधास्तु पुरोहितः॥ पुरूरवाः॥ पु
॥११६॥ रूरवाहृस्वदीर्घौतेरसिश्चनिपात्यते॥ वसेर्वकुलशिय॥ नक्षत्रेः॥ उषःकित्॥ उषः॥ दमेरुनसिः॥ सत्तार्दमुनाः॥ अंगतेरसिः॥ इरुडा
गमश्च॥ अंगिराः॥ सर्त्तेरप्पूर्वादसिः॥ प्रायेणायंसंज्ञा॥ अप्सराः॥ अप्सरसौ॥ अप्सरसः॥ [illegible] विदिभुजिभ्यांविश्वे॥ विश्ववेदाः॥ विश्वभो
जाः॥ वशेःकनसिः संप्रसारणं॥ उशना॥ ॥ इल्कणादिभ्यश्चतुर्भ्यःपृषः॥ आदित्यबोधनुश्च॥ अङ्गतं॥ युधेन्॥ गोधूमः॥ मसे
रन्॥ मसरः॥ प्रथमपादेअसेरन्मसस्येलत्वव्याख्यातः॥ स्थःकिच॥ स्थूरोमनुष्यः॥ पातेरतिः॥ पातिः स्वामी॥ संपातिःपक्षिराजः॥ वा
तेर्नित्॥ वातिरादित्यसोमयोः॥ अर्त्तेश्च॥ अरतिरुद्वेगः॥ तृहेःक्नोहलोपश्च॥ तृणं॥ हृञ्कुटितनिताडिभ्यउल्संतुलुश्च॥ त्रियतेतु
यंतेतन्यंतेताड्यंतेइतिवातंडुलाः॥ दंसेष्टटनौनआच॥ दासःसेवकदस्य्वोः॥ दंशोभ्य॥ दाशोधीवरः॥ उदिचेर्डैसिः॥ उच्चैः॥ स्वरादिपा ॥११६॥
ठाद्व्ययत्वं॥ नौदीर्घश्च॥ नीचैः॥ सौरमेन्कोदमेपूर्वपदस्यचदीर्घः॥ स्मेःसुपूर्वाद्धेमेवाच्यक्तःस्यात्॥ किलाद्नुनासिकलोपः॥ स्मरतः॥
उपरातःकृपाकुश्च॥ कृञोपथुक्॥ कुवश्च॥ यत्सत्यय॥ पुण्यं॥ स्रंसेःशिकदुकिच॥ स्रंसतेःशिरादेशःयत्सलस्य॥ कित्तस्यकुआगम॥

श्च॥ शिक्यं॥ अर्त्तेःक्युरुश्च॥ उरणोमेषः॥ हिंसेरीरन्नीरचौ॥ हिंसीरोव्याघ्रदुष्टयोः॥ उदिदृणातेरजलौपूर्वपदांत्यलोपश्च॥ उदरं॥ दृ
पुवोरः॥ तवनेर्मुड्डोदात्तः॥ अवृक्षलवृइत्साध्धातोर्मुट्सवोदात्तः॥ मुखं॥ अमेःसन्॥ अंसः॥ मुहेःखोमूर्ख॥ मूर्खः॥ नेर्हलोपश्च॥ नखं॥ शीङो
ह्रस्वश्च॥ शिखा॥ माङऊखोमयश्च॥ मयूखः॥ कलिगलिभ्यांफगस्योत्॥ उल्फःशरीरावयवः॥ रोगश्च॥ गुल्फःपादग्रंथिः॥ स्फशेःश्वण्
शुनोऽच॥ श्वणःशुनोऽनत्ययौ॥ स्फइत्सादेशः॥ पार्श्वौस्त्रीकक्षयोरधः॥ पर्शुरायुधं॥ श्मनिश्रयतेर्डुन्॥ श्मश्रुमुखवाली॥ मुखमाश्रय
तीतिश्मश्रु॥ अश्नोत्याद्यश्च॥ अश्रुनयनजलं॥ जनेर्घन्लोपश्च॥ जटा॥ अनूतस्यजंघश्च॥ तस्यजनःजंघादेशःस्यात्॥ जंघा॥ हंतेः
शरीरावयवेद्वेच॥ जघनं॥ पश्चान्नितंबः॥ स्त्रीकट्याः॥ क्लीबेतुजघनंपुरः॥ क्लिशेरन्लोलोपश्च॥ लकारस्यलोपश्च॥ केशाः॥ फलेरितजा
देश्चपः॥ पलितं॥ कृञादिभ्यःसंज्ञायांवुन्॥ करकः॥ करका॥ कटकः॥ नरकः॥ नरकोनारकोऽपिचद्वावितिद्विरूपकोशः॥ सरकंगमनं॥
कोरकः॥ कोरकं॥ [illegible]वीक्ष्यते[illegible]घंतविपर्ययश्च॥ कीनकोवंशभेदः॥ पविमन्योरिकोपधायाः॥ पेचकः॥ मेचकः॥ जनेररष्ठच॥ जठरं॥
वृत्तिमनिभ्यांकिन्॥ वठरोमूर्खः॥ मठरोमुनिशांडिल्यः॥ बिदादित्वान्माठरोऽपि॥ गर्गादित्वान्माठर्यः॥ उडिदृणातेरजलौपूर्वपदांत्यस्य
लोपश्च॥ उंदरःमूषकत्रासौ॥ कृदरादयश्च॥ कुंदरःकुसूलः॥ मंदरंविलसात॥ सुंदरःसर्पः॥ हंतेर्मुन्वायंतयोर्घत्वंतत्व॥ घतनोमरकः॥ कं
भिगभिसामिभ्यस्तुन्हेतुश्च॥ कांतुःपक्षी॥ गांतुःपंथिकः॥ सांतुर्मशकः॥ हन्यतेःकन्यन्हिरच॥ कन्यन्मत्यस्य॥ हिरण्यं॥ कंजःपासः॥

क्र० ७३०५ सं.

कार्पासः ॥ बिल्वादित्वात्कार्पासं वस्त्रं ॥ अनेस्तुरच्च ॥ तुप्रत्ययः ॥ शांतादेशश्च ॥ अर्त्तुर्हस्ती योनिश्च ॥ तुर्णोतेर्डः ॥ ऊर्णा ॥ दधातेर्यनुट् ॥
सि० ५० ॥ धान्यं ॥ जीर्यतेः क्विन्रश्च वः ॥ जिव्रिः स्यात्काल पक्षिणोः ॥ बाकुल्कादुलिवृत्तिदीर्घो नः ॥ मव्यतेर्मलो पो मश्चाप तुर्द्धालः ॥ मव्यतेरात्
प्रत्ययः स्यात्तस्याऽप तुडागमः धातोर्यलोपो मकारश्चांतस्य ॥ ममापतालो विषये ॥ ऋजेः कीकन् ॥ ऋजीकः इंद्रो धूमश्च ॥ तनोतेर्डउः ॥
११ ॥ मन्त्रब्रः ॥ तितउः पुंसि स्त्रीलिंगे च ॥ अर्भक पृथुपाकावयसि ॥ ऋधुद्द्वौ ॥ अतो वुन्सकारश्चांतादेशश्च ॥ प्रयेः कुकन् संप्रसारणं च ॥ पि
५धमा ॥ बतेः कन् ॥ अव धावमार्वृ रेफः कुत्सिते ॥ वेर्दन्नित्यत् ॥ अवतेरम् ॥ वस्यपप्रेधः ॥ अवमः ॥ अधमः ॥ अर्तेर्वन् ॥ अर्वा ॥ रिफतेर्मो ह्रादि
त्व ॥ कादेः ॥ रेफः ॥ लीरीङो र्हस्वः प्रुट् च तरौ श्लेषणकुनयोः ॥ तरएतौ प्रत्ययौ क्रमात्तः ॥ धातोर्ह्रस्वः [illegible] प्रत्ययस्य पुट् ॥ लिप्तं ॥ लिप्टं
श्रौते ॥ रिप्रं कुत्सितं ॥ क्लिशेरीचोपधायाः कन्लोपश्च लो नामगमश्च ॥ क्लिशेः कन्स्यादुपधायाईत्वं लस्य लोपो नामागमश्च ॥ कीनाशो यमः ॥ कित्पक
लीवंसं ॥ अ[illegible]रास्नुकर्णणिकरट्च ॥ वकाराडुपधाया ईत्वं ॥ ईश्वरः ॥ वतेरन् ॥ वत्वारः ॥ प्राततेररन् ॥ प्रातः ॥ अमेस्तुट् च ॥ अंतर्मध्यं ॥ दहेर्गो
लोपो दश्च नः ॥ गप्रत्ययः धातोरंत्यस्य लोपो दकारस्य नकारः ॥ नगः ॥ सिवेः संज्ञायां हेतुमौ कश्च ॥ सिवतेः कप्रत्ययः हकारादेशाः नुमुत्स्यात् ॥ ११
व्याङिघ्रातेश्च जातौ ॥ कप्रत्ययः स्यात् ॥ व्याघ्रः ॥ हंतेरचघु[illegible]रच ॥ घोरः ॥ क्षमेरुपधालोपश्च ॥ वाद्च ॥ क्ष्मा ॥ तरतेर्डिः ॥ नयः ॥ नीन् ॥ ग्र
हेरनिः ॥ ग्रहणिः ॥ ङीपु ॥ ग्रहणी व्याधिभेदः ॥ प्रथेरमच् ॥ प्रथमः ॥ चेरच्च ॥ चरमः ॥ मंगेरलच् ॥ मंगलं ॥ ॥ इत्युणादौ पंचमः पादः समाप्तः ॥ ॥

श्रीः ॥ उणादयो बहुलं ॥ एते वर्त्तमाने संज्ञायां बहुलं स्युः ॥ केचिदविहिता अप्यूह्याः ॥ संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे ॥ कार्याद्वि
द्यादनूबंधमेतच्छास्त्रमुणादिषु ॥ १ ॥ भूतेपि दृश्यंते ॥ भविष्यति गम्यादयः ॥ दाशगोघ्नौ संप्रदाने ॥ एतौ संप्रदाने निपात्येते ॥ दाशंति
तस्मै दाशः ॥ गां हंति तस्मै गोघ्नोतिथिः ॥ भीमादयोऽपादाने ॥ भीमः ॥ भीष्मः ॥ प्रस्कंदनः ॥ प्रपतः ॥ मूर्खः ॥ खलतिः ॥ ताभ्यामन्यत्रोणादयः ॥
संप्रदान[illegible] परामर्शार्थं ताभ्यामिति ॥ ततोऽसौ सवनितंतुः ॥ वृत्तं तदिति वर्त्म ॥ चरितं तदिति चर्म ॥ तुमुन्ण्वुलौ क्रियायां क्रियार्थायां
क्रियार्थायां क्रियायांमुपपदे भविष्यत्यर्थे धातोरेतौ स्तः ॥ मांतत्वादव्ययत्वं ॥ कृष्णं द्रष्टुं याति ॥ कृष्णं दर्शको याति ॥ अत्र वासरूपेण तृच्जादि
योन ॥ पुनर्ण्वुल्कृते ॥ समानकर्त्तृकेषु तुमुन् ॥ अक्रियार्थोपपदार्थमेतत् ॥ इच्छार्थेष्वेककर्तृकेषूपपदेषु धातोस्तुमुन्स्यात् ॥ इच्छ
तिभोक्तुं ॥ वष्टि वांछति वा ॥ शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषु तुमुन् ॥ एषूपपदेषु धातोस्तुमुन्स्यात् ॥ शक्नोति भोक्तुं
एवं धृष्णोत्यादौ ॥ अर्थग्रहणमस्तिनैव संबध्यते ॥ अनंतरत्वात् ॥ अस्ति भवति विद्यते वा भोक्तुं ॥ पर्याप्तिवचनेष्वलमर्थेषु ॥ पर्याप्ति
पूर्णता ॥ तद्वाचिषु सामर्थ्यवचनेषूपपदेषु तुमुन्स्यात् ॥ कालः समयो वेला अनेहा वा भोक्तुं ॥ प्रैषादिग्रहणमिहानुवर्त्तते ॥ तेनेह न
भवतानि कालः पचतीति वार्त्ता ॥ भाववचनाश्च ॥ भाव इत्यधिकृत्य वक्ष्यमाणा घञादयः क्रियार्थायां क्रियायांमाभविष्यति स्युः ॥ यागाय या
ति ॥ अण्कर्मणि च ॥ कर्मण्युपपदे क्रियार्थायां क्रियायां चाण्स्यात् ॥ ण्वुलोऽपवादः ॥ कांडलावो व्रजति ॥ परत्वात्कादीन्बाधते ॥ कंबलस

पर्याप्तो भोक्तुं प्रवीणः कुशलः पटुरित्यादि पर्याप्तिवचने भुङ्क्ते अलं भुक्त्वा अलमर्थे

योव्रजति॥ परुजविशस्पृशोघञ्॥ स्रविष्यतीतिनिर्वृत्तं॥ पद्यतेसौपादः॥ रुजतीतिरोगः॥ विशतीतिवेशः॥ स्पृशतीतिस्पर्शः॥ स्थिरेस्थ कौ० कृ०
॥सि०उ०॥ इतिलुप्तविभक्तिकं॥ सर्तेःस्थिरेकर्त्तरि घञ्स्यात्॥ सरतिकालांतरमितिसारः॥ व्याधिमत्स्यबलेषुचेतिवाच्यं॥ अतीसारोव्याधिः॥ अंतर्भा धातवे
वितण्यर्थोत्रसरतिः॥ रुधिरादिकमतिशयेनसारयतीत्यर्थः॥ विसारोमत्स्यः॥ सारोबलेदृढांशेच॥ भावे॥ सिद्धावस्थापन्नेवाच्येधातोर्घञ्स्या
॥११९॥ त्॥ पाकः॥ पाकौ॥ स्फुरतिस्फुलत्योर्घञि॥ एचआत्स्यात्॥ स्फारः॥ स्फालः॥ उपसर्गस्यघञ्यमनुष्येबहुलम्॥ दीर्घः॥ परीहारः॥ इकःकाशे॥ काशेउत्त
रपदेइगंतस्यैवप्रादेर्दीर्घः॥ नीकाशः॥ अनूकाशः॥ इकःकिं॥ प्रकाशः॥ नोदात्तोपदेशस्येतिनवृद्धिः॥ शमः॥ आङ्पूर्वात्तु आचामः॥ कामः॥
वामः॥ विश्रामइतितुअपाणिनीयं॥ स्यदोजवे॥ यंदेर्घञिनलोपोवृद्ध्यभावश्चनिपात्यते॥ स्यदोवेगः॥ अन्यत्रस्यंदः॥ अवोदैधौद्मप्रश्रथ
हिमश्रथाः॥ अवोदः॥ अवक्लेदनं॥ एधः॥ इंधनं॥ ओद्मः॥ उंदनं॥ श्रंथेर्नलोपोवृद्ध्यभावश्च॥ अकर्त्तरिचकारकेसंज्ञायां॥ कर्त्तृभिन्नेका
रकेघञ्स्यात्॥ घञिचभावकरणयोः॥ रंजेर्नलोपः॥ रागः॥ अनयोःकिं॥ रंजंत्यस्मिन्नंगः॥ प्रास्यतेइतिप्रासः॥ संज्ञायामितिप्रायिकं॥
केसवतालाभतोलव्धः॥ इतउर्ध्वंभावेकर्त्तरिकारकेइति॥ हलश्चेत्युपेबरूलमितियावद्द्वयमनुवर्त्तते॥ परिमाणाख्यायांसर्वेभ्यः॥ घञ् अ ॥११९॥
जपोर्बाधनार्थमिदं॥ एकस्तंडुलनिचायः॥ द्वौशूर्पनिष्पावौ॥ द्वौकारौ॥ दारजारौकर्त्तरिणिलुक्च॥ दारयंतीतिदाराः॥ जरयंतीतिजाराः॥ इ
ङश्च॥ घञोपवादः॥ उपेत्यअस्माद्धीयतइत्युपाध्यायः॥ अपादानेस्त्रियामुपसंख्यानं॥ तदंताच्चवाङीष्॥ उपाध्यायाउपाध्यायी॥

अ

य

भृवायुवर्णनिवृत्तेषु॥ भृइत्यविभक्तिकोनिर्देशः॥ शारोवायुः॥ करणेघञ्॥ शारोवर्णः॥ चित्रीकरणमिहधात्वर्थः॥ निश्रियतेआश्रियतेऽनेने
तिनिवृत्तमावरणं॥ बाहुलकात्करणेक्तः॥ गौरिवाकृतनीशारः प्रायेणशिशिरेकृशः॥ अकृतप्रावरणइत्यर्थः॥ उपसर्गेरुवः॥ घञ्॥ संरा
वः॥ उपसर्गेकिं॥ रवः॥ अभिनिसःस्तनःशब्दसंज्ञायां॥ अस्मात्स्तनेःसस्यमूर्धन्यः॥ अभिनिष्टानोवर्णः॥ शब्दसंज्ञायांकिं॥ अभिनिस्तनतिमृदं
गः॥ समियुद्रुदुवः॥ संयूयतेमिश्रीक्रियतेगुडादिभिरितिसंयावः॥ पिष्टविकारोऽपूपविशेषः॥ संद्रावः॥ संदावः॥ श्रिणीभुवोनुपसर्गे॥ श्रायः॥
नायः॥ भावः॥ अनुपसर्गेकिं॥ प्रश्रयः॥ प्रणयः॥ प्रभवः॥ कथंप्रभावोराज्ञइतिप्रकृष्टोभावइतिप्रादिसमासः॥ कथंराज्ञोनयइतिबाहुलकात्॥
वौक्षुश्रुवः॥ विक्षावः॥ विश्रावः॥ वौकिं॥ क्षवः॥ श्रवः॥ अवोदोर्नियः॥ अधोनयनमवनायः॥ उन्नायः॥ ऊर्ध्वंनयनं॥ कथमुन्नयः॥ उत्प्रे
क्षेति॥ बाहुलकात्॥ प्रेद्रुस्तुस्रुवः॥ प्रद्रावः॥ प्रस्तावः॥ प्रस्रावः॥ प्रेतिकिं॥ द्रवः॥ स्तवः॥ स्रवः॥ निरभ्योःपूल्वोः॥ निष्पूयतेशूर्पादिभिरितिनिष्पा
वोधान्यविशेषः॥ अभिलावः॥ निरभ्योःकिं॥ पवः॥ लवः॥ उन्न्योर्ग्रः॥ उद्गारः॥ निगारः॥ उन्न्योःकिं॥ गरः॥ कृधान्ये॥ कृइत्यस्माद्धान्यविषयका
उन्न्योर्घञ्स्यात्॥ उत्कारोनिकारोधान्यस्य॥ विक्षेपइत्यर्थः॥ धान्येकिं॥ भिक्षोत्करः॥ पुष्पनिकरः॥ यज्ञेसमिस्तुवः॥ समेत्यस्तुवंतियस्मि
न्देशेद्विजाःसंस्तावः॥ यज्ञेकिं॥ संस्तवःपरिचयः॥ प्रेस्त्रोयज्ञे॥ अयज्ञइतिवेद॥ यज्ञेइतिप्रकृतत्वात्॥ प्रस्तारः॥ अयज्ञेकिं॥ बं

हिषः अक्तरो मुष्टिविशेषः॥ प्रथने वावशब्दे॥ विपूर्वात्स्तृणातेर्घञ्स्यात्॥ अशब्दविषये प्रथने॥ पटस्य विस्तारः॥ प्रथने किं॥ तृणविस्तरः॥ अशब्दे कृ०१०उ०
॥सि०उ०॥ किं॥ ग्रंथ विस्तरः॥ छंदोनाम्नि च॥ स्त्रइत्यनुवर्त्तते॥ विष्टारपंक्तिश्छंदः॥ विस्तीर्यंते ऽस्मिन्नक्षराणीति अधिकरणे घञ्॥ ततः कर्मधारयः॥
छंदोनाम्निवेतिषत्वं॥ उदियहः॥ उद्ग्राहः॥ समि मुष्टौ॥ मल्लस्य संग्राहः॥ मुष्टौ किं॥ द्रव्यस्य संग्रहः॥ परिन्योर्नीणोर्द्यूताभ्रेषयोः॥ परिपूर्वान्नय
॥१२१९॥ तेर्निपूर्वादिणश्च घञ्स्यात् क्रमेण द्यूते अभ्रेषे च विषये॥ परिणायेन शारान्हंति॥ समंतान्नयनेनेत्यर्थः॥ एषोऽन्यायः॥ उचितमित्यर्थः॥ २४
द्यूताभ्रेषयोः किं॥ परिणयो विवाहः॥ न्यायो नाशः॥ परावनुपात्यय इणः॥ क्रमप्राप्तस्य अनतिपातो ऽनुपात्ययः॥ तव पर्यायः॥ अनुपात्यये
किं॥ कालस्य पर्ययः॥ अतिपात इत्यर्थः॥ व्युपयोः शेतेः पर्याये॥ तव विशायः॥ राजोपशायः॥ पर्याये किं॥ विशयः संशयः॥ उपशयः समीप
शयनं॥ हस्तादाने चेरस्तेये॥ हस्तादान इत्यनेन प्रत्यासत्तिरादेयस्य लक्ष्यते॥ पुष्पप्रचायः॥ हस्तादाने किं॥ वृक्षाग्रस्थानां फलानां यष्ट्या
प्रचयं करोति॥ अस्तेये किं॥ पुष्पप्रचयश्चौर्येण॥ निवासचितिशरीरोपसमाधानेष्वादेश्च कः॥ एषु चिनोतेर्घञ्॥ आदेश्च ककारः॥ उ
पसमाधानं राशीकरणं॥ तत्र धात्वर्थः॥ अन्ये प्रत्ययार्थस्य कारकोपाधिभूताः॥ निवासे॥ काशीनिकायः॥ चितौ॥ आकायमग्निं चि ॥११२॥
न्वीत॥ शरीरे॥ चीयते ऽस्मिन्नस्थ्यादिकमिति कायः॥ समूहे॥ गोमयनिकायः॥ एषु किं॥ चयः॥ चः क इति वक्तव्ये आदेरिति किं॥

यः॥ लुकि आदेरेव यथा स्यादिति॥ गोमयानां निकायः॥ पुनः पुना राशीकरणमित्यर्थः॥ संघे चानौत्तराधर्ये॥ चेर्घञ्॥ आदेश्च कः॥ भि
क्षूणां निकायः॥ प्राणिनां समूहः संघः॥ अनौत्तराधर्ये किं॥ सूकरनिचयः॥ संघे किं॥ ज्ञानकर्मसमुच्चयः॥ कर्मव्यतिहारे णच्स्त्रियां॥ स्त्रीलिंगे स्या
द्भावे॥ णचः स्त्रियामञ्॥ नकर्मव्यतिहारे॥ अत्र ऐचू न स्यात्॥ व्यावक्रोशी॥ व्यावहासी॥ अभिविधौ भाव इनुण्॥ अणिनुणः॥ आदिवृद्धिः॥
इनण्यनपत्ये॥ सांराविणं वर्त्तते॥ आक्रोशेवन्योर्ग्रहः॥ अवनि एतयोर्ग्रहेर्घञ्स्यात् शापे॥ अवग्राहस्ते जाल्म भूयात्॥ अभिभव इत्यर्थः॥ निग्राहस्ते जाल्म
द्वि:खंड. यात्॥ बाध इत्यर्थः॥ आक्रोशे किं॥ अवग्रहः पदस्य॥ निग्रहश्चोरस्य॥ प्रे लिप्सायां॥ पात्रप्रग्राहेण चरति भिक्षुः॥ परौ यज्ञे॥ उत्तरः परिग्राहः॥
स्फ्यन वेद्याः स्वीकरणं॥ नौ वृ धान्ये॥ वृ इति लुप्तपंचमीकं॥ नीवाराः॥ धान्ये किं॥ निवरा कन्या॥ उन्न्योर्ग्रः॥ उत्पूर्वान्नि पूर्वाच्च ग्रः॥ प्रवरा सीत नेति
वत्॥ कृ धान्ये॥ उद्ग्रायः॥ उद्धावः॥ उत्प्लावः॥ उद्द्रावः॥ कंपपतनांताः समुत्कुध्या इति वाऊलकात्॥ विभाषा ऽङिरुप्लुवोः॥ आरा
वः॥ आरवः॥ आप्लावः॥ आप्लवः॥ अवे ग्रहो वर्षप्रतिबंधे॥ विभाषेति वर्त्तते॥ अवग्राहः॥ अवग्रहः॥ वर्षप्रतिबंधे किं॥ अवग्रहः पदस्य॥
२३ प्रे वणिजां॥ प्रे ग्रहेर्घञ्वा वणिजां संबंधिनि प्रत्यये॥ तुलाप्रग्राहेण चरति॥ तुलाप्रग्रहेण॥ रश्मौ च॥ प्रग्रहः॥
प्रग्राहः॥ वृणोतेराच्छादने॥ विभाषा प्र इत्येव॥ प्रावारः॥ प्रवरः॥ परौ भुवो ऽवज्ञाने॥ परिभावः॥ परिभवः॥ अवज्ञाने किं॥ सर्वतो भवनं प
रिभवः॥ एरच्॥ चयः॥ जयः॥ भयादीनामुपसंख्यानं॥ नपुंसके भावे क्त इति निवृत्त्यर्थं॥ भयं॥ वर्षं॥ ऋदोरप्॥ करः॥ गरः॥ शरः॥ यवः॥ लवः॥

स्तवः॥ पवः॥ ह्रस्वासनयोर्विष्टरः॥ अनयोर्विपूर्वस्य स्तृञः षत्वं निपात्यते॥ विष्टरो वृक्ष आसनं च॥ वृक्षेति किं॥ वाक्यस्य विस्तरः॥ ग्रहवृदृनि कौ॰ ध॰
॥सि॰उ॰॥ श्चिगमश्च॥ अप् स्यात्॥ घञो ऽपवादः॥ ग्रहः॥ वरः॥ दरः॥ निश्चयः॥ गमः॥ वशिरण्योरुपसंख्यानं॥ वशः॥ रणः॥ घञर्थे कविधानं स्थास्नापा
॥१२०॥ व्यधिहनियुध्यर्थं॥ प्रस्थः॥ विघ्नः॥ द्वित्वप्रकरणे के कृञादीनामिति वक्तव्यं॥ चक्रिः॥ चिक्लिदः॥ चक्नसः॥ उपसर्गे ऽदः॥ अप् स्यात्॥ घञपोश्च
अदो घस्लृ स्यात्॥ अपि च॥ प्रघसः॥ निघसः॥ उपसर्गे किं॥ घासः॥ नौ ण च॥ नावुपपदे अदेर्णः स्यादप् च॥ न्यादः॥ निघसः॥ व्यधजपो
रनुपसर्गे॥ अप् स्यात्॥ व्यधः॥ जपः॥ उपसर्गे तु आव्याधः॥ उपजापः॥ स्वनहसोर्वा॥ अप्॥ पक्षे घञ्॥ स्वनः॥ स्वानः॥ हसः॥ हासः॥ अनुप
सर्ग इत्येव॥ प्रस्वानः॥ प्रहासः॥ यमः समुपनिविषु च॥ एषु अनुपसर्गे च यमेरब्वा॥ संयमः॥ संयामः॥ उपयमः॥ उपयामः॥ नियमः॥ नियामः॥
वियमः॥ वियामः॥ यमः॥ यामः॥ नौ गदनदपठस्वनः॥ अब्वा स्यात्॥ निगदः॥ निगादः॥ निनदः॥ निनादः॥ निपठः॥ निपाठः॥ निःस्वनः॥ निः
स्वानः॥ क्वणो वीणायां च॥ नौ च अनुपसर्गे च वीणाविषये च क्वणतेरब्वा स्यात्॥ वीणाग्रहणं प्राद्यर्थं॥ निक्वणः॥ निक्वाणः॥ क्वणः॥ क्वाणः॥ वी
णायां तु प्रक्वणः॥ प्रक्वाणः॥ नित्यं पणः परिमाणे॥ अप् स्यात्॥ मूलकपणः॥ शाकपणः॥ व्यवहारार्थं मूलकादीनां परिमितो मुष्टिर्बध्यते सो ॥१२१॥
स्याविषयः॥ परिमाणे किं॥ पाणः॥ मदो ऽनुपसर्गे॥ धनमदः॥ उपसर्गे तु उन्मादः॥ प्रमदसंमदौ हर्षे॥ हर्षे किं॥ प्रमादः॥ संमादः॥ समुदोरजः पशु
षु॥ संपूर्वो ऽजिः समुदाये उत्पूर्वश्च प्रेरणे तस्मात्पशुविषयकादप् स्यात्॥ अघञपोरित्यत्र कवेरभावान्॥ समजः पशूनां संघः॥ उदजः पशू

नां प्रेरणं॥ पशुषु किं॥ समाजो ब्राह्मणानां॥ उदाजः क्षत्रियाणां॥ अक्षेषु ग्लहः॥ अक्षशब्देन देवनं लक्ष्यते॥ तत्र यत्पणरूपेण यद्गृह्यते तत्र ग्ल
ह इति निपात्यते॥ अक्षस्य ग्लहः॥ व्याकरणे मतिसरणग्लहा मदीव्यन्॥ अक्षेषु किं॥ पादस्य ग्रहः॥ प्रजने सर्तेः॥ प्रजनः प्रथमगर्भग्रहणं
गवामुपसरः॥ कथमवसरः प्रसर इति॥ अधिकरणे पुंसि संज्ञायामिति घः॥ ह्वः संप्रसारणं च न्यभ्युपविषु॥ निहवः॥ अभिहवः॥ उपहवः॥ वि
हवः॥ एषु किं॥ प्रह्वायः॥ आङि युद्धे॥ आहूयन्ते ऽस्मिन्निति आहवः॥ युद्धे किं॥ आह्वायः॥ निपानमाहावः॥ आङ्पूर्वस्य ह्वयतेः संप्रसारणमप् च
वृद्धिश्चोदकाधारश्चेद्वाच्यः॥ आहावस्तु निपानं स्यादुपकूपजलाशये॥ भावे ऽनुपसर्गस्य॥ ह्वयतेः संप्रसारणमप् च स्याद्भावे॥ हवः॥ हन
ध॰ श्च वधः॥ अनुपसर्गाद्धन्तेर्भावे अप् स्याद्वधादेशश्चान्तोदात्तः॥ वधेन दस्युं॥ चाद्घञ्॥ घातः॥ मूर्तौ घनः॥ मूर्तिः काठिन्यं तस्मिन्नभिधेये
हन्तेरप् स्याद्घनश्चादेशः॥ अभ्रघनः॥ कथं सैन्धवघनमानयेति॥ धर्मशब्देन धर्मी लक्ष्यते॥ अन्तर्घनो देशः॥ वाहीकग्रामविशेषसंज्ञेयं॥
अन्तर्घण इति पाठान्तरं॥ अगारैकदेशे प्रघणः प्रघाणश्च॥ द्वारदेशे द्वौ प्रकोष्ठावलिन्दौ आभ्यन्तरो बाह्यश्च॥ यस्मिन्काष्ठे अन्यानि काष्ठा
नि स्थापयित्वा तक्ष्यन्ते तदुद्घनः॥ अधिकरणे अप्॥ अपघनो ऽङ्गं॥ अङ्गं शरीरावयवः॥ स च हन्यते सर्वः॥ किन्तु पाणिः पादश्चेहाङ्गं॥ करणे
अप्॥ अपघातो ऽन्यः॥ ॥ करणे ऽयोविद्रुषु॥ एषु हन्तेः करणे अप् स्याद्घनादेशश्च॥ अयो हन्यते ऽनेनेत्ययोघनः॥ विघनः॥ द्रुघनः॥
द्रुघण इत्येके पूर्वपदात्संज्ञायामिति णत्वं॥ संज्ञेयं कुठारस्य॥ द्रुहंसः॥ स्तम्बे क च॥ स्तम्बे उपपदे हन्तेः करणे कः स्याद… प्॥ अप्॥ स्तम्बघ

नादेऽस्थन॥ स्तंबघ्नः॥ स्तंबघनः॥ करणइत्येव॥ स्तंबधान॥ परीघः॥ परौ हंतेरप्स्यात्करणे घश्च स्याद्धो वा॥ परिहन्यंतेऽनेनेति परिघः॥ परे कृ॰ त॰
॥ सि॰ ३॰ ॥ श्च घांकयोः॥ परेरफस्य लो वा स्यात् घशब्दे अंकशब्दे॥ परिघः॥ पलिघः॥ पर्यंकः॥ पल्यंकः॥ दुहन्तरेरप् घ इति हिलि त्रिमस्य नग्रहणं व्याख्या
॥१२७॥ नात्॥ उपघ्न आश्रये॥ उपपूर्वाद्धंतेरप्स्यादुपधालोपश्च॥ आश्रयशब्देन सामीप्यं लक्ष्यते॥ पर्वतेनोपहन्यते सामीप्येन गम्यते इति
पर्वतोपघ्नः॥ संघोद्घौ गणप्रशंसयोः॥ संहननं संघः॥ भावेऽप्॥ उद्धन्यते उत्कृष्टो ज्ञायत इत्युद्घः॥ कर्मण्यप्॥ गलघ्नानां वृत्स्य
त्वाद्वृतिर्ज्ञाने॥ निघो निमितं॥ समंतान्मितं निमितं॥ निर्विशेषं हन्यंते ज्ञायंत इति निघा वृक्षाः॥ समारोहपरिणाहा इत्यर्थः॥ परि
णाहो विशालता॥ ड्वितः क्त्रिः॥ अयं भाव एव स्वभावात्॥ क्त्रेर्मम्नित्यं॥ नित्यग्रहणात् त्रिमप् विषयः॥ अत एव क्त्र्यंतेन न विग्रहः॥ डुपच
ष्॥ पाके॥ पाकेन निर्वृत्तं पक्त्रिमं॥ डुवप्॥ उप्त्रिमं॥ ट्वितोऽथुच्॥ अयमपि स्वभावाद्भाव एव॥ टुवेपृ॥ वेपथुः॥ यजयाचयतविच्छप्रच्छरक्षो
नङ्॥ यज्ञः॥ याच्ञा॥ यत्नः॥ विश्नः॥ प्रश्नः॥ प्रश्ने चासन्नकाल इति ज्ञापकान्न संप्रसारणं॥ ङित्त्वं तु विश्न इत्यत्र गुणनिषेधाय॥ रक्ष्णः॥ ॥१२७॥
स्वपो नन्॥ स्वप्नः॥ उपसर्गे घोः किः॥ प्रधिः॥ अंतर्धिः॥ उपाधीयतेऽनेनेत्युपाधिः॥ कर्मण्यधिकरणे च॥ कर्मण्युपपदे घोः किः स्या

दधिकरणे चार्थे॥ जलानि धीयंतेऽस्मिन्निति जलधिः॥ स्त्रियां क्तिन्॥ स्त्रीलिंगे भावादौ क्तिन् स्यात् घञोऽपवादः॥ अजपौ तु परत्वाद्बा
धते॥ कृतिः॥ चितिः॥ स्तुतिः॥ स्फायी॥ स्फातिः॥ स्फीतिकाम इति प्रामादिकमेव॥ क्तांताद्बा ल्वर्थे मिनिविव अव इरिति वा समाधेयं॥ श्रु
यजि इषि स्तुभ्यः करणे॥ श्रूयतेऽनया श्रुतिः॥ यजेरिषेश्च इष्टिः॥ स्तुतिः॥ ऋल्वादिभ्यः क्तिन् निष्ठावद्वाच्यः॥ तेन नत्वं॥ कीर्णिः॥ गीर्णिः॥
लूनिः॥ धूनिः॥ पूनिः॥ दुगादशेति योगविभागात् क्तिनि ह्रस्वः॥ प्रह्लत्तिः॥ तिच॥ हीतिः॥ कुल्हतिः॥ वायतेः क्तिनि वीसभावो वाच्यः॥ अपचितिः॥
संपदादिभ्यः क्विप्॥ संपत्॥ विपत्॥ क्तिन्नपीष्यते॥ संपत्तिः॥ विपत्तिः॥ स्थागापापचो भावे॥ क्तिन् स्यात् अङोऽपवादः॥ प्रस्थितिः॥ उप
स्थितिः॥ संगीतिः॥ संपीतिः॥ पक्तिः॥ कथमवस्था संस्थेति॥ व्यवस्थायामपीति ज्ञापकात्॥ ऊतियूतिजूतिसातिहेतिकीर्तयश्च॥ एते
निपात्यंते॥ अवतेर्ज्वरत्वरेत्यूठ्॥ ऊतिः॥ स्वरार्थं वचनं॥ उदात्त इति हि वर्त्तते॥ यूतिः॥ जूतिः॥ अनयोर्दीर्घत्वं च निपात्यते॥ स्यतेः सातिः॥
इत्वाभावो निपात्यते॥ सनोतेर्वा जनसनेत्यात्वे कृते स्वरार्थं निपातनं॥ हंतेर्हिनोतेर्वा हेतिः॥ कीर्तिः॥ व्रजयजोर्भावे क्यप्॥ व्रज्या॥ इ
ज्या॥ संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः॥ समजादिभ्यः स्त्रियां भावादौ क्यप् स्यात् स संज्ञायां॥ अजेव

पिवीसावोनेतिवाच्यं॥ समजंतस्यामितिसमज्यासभा॥ निषीदंत्यस्यामितिनिषद्याआपणः॥ निपतंत्यस्यामितिनिपत्यापिच्छिलाभूः कृदंत०
॥सि०७०॥ मिः॥ मन्यते ऽनयेतिमन्यागळपार्श्वशिरा॥ विदंत्यनयाविद्या॥ सुत्याअभिषवः॥ शय्या॥ चर्या॥ इयतेऽनयाइ[illegible]त्यागिविका॥ कृञःश
॥१२२॥ श॥ कृञइतियोगविभागः॥ कृञःक्यप्स्यात्॥ कृत्याराव॥ चाक्रिच॥ क्रिया॥ कृतिः॥ इच्छा॥ इषोनिपातोयं॥ इच्छार्थ्यावेरा॥ यगभावश्च
इच्छा॥ परिचर्यापरिसर्यामृगयाटाटचानामुपसंख्यानं॥ शयकत्तनिपात्यते॥ परिचर्यापूजा॥ परिसर्यापरिसरणं॥ अत्रगुणोपि॥ मृ
गअन्वेषणे॥ चुरादावदंतः॥ अतोलोपाभावश्च॥ शयकिणिलोपः॥ मृगया॥ अटतेःशयकिटशद्दस्यद्वित्वं पूर्वभावेयकारनिवृत्तिर्दीर्घ
श्च॥ अटाटा॥ जागर्तेरकारोवा॥ पक्षेशः॥ जागरा॥ जागर्या॥ अप्रत्ययात्॥ प्रत्ययांतेभ्योधातुभ्यःस्त्रियामकारप्रत्ययःस्यात्॥ चि
कीर्षा॥ पुत्रकाम्या॥ गुरोश्चहलः॥ गुरुमतोहलंतात्स्त्रियामकारप्रत्ययःस्यात्॥ ईहा॥ ऊहा॥ गुरोःकिं॥ भक्तिः॥ हलःकिं॥ नीतिः॥ निघा
यांसेट्इतिवक्तव्यं॥ नेह॥ आप्तिः॥ तितुत्रेतिनेट्॥ दीप्तिः॥ तितुत्रेष्वग्रहादीनामितिवाच्यं॥ निगृहीतिः॥ निपठितिः॥ षिद्भिदादिभ्यो ॥१२२॥
ङ्॥ षिद्भ्योभिदादिभ्यश्चस्त्रियामङ्स्यात्॥ जृष्॥ जरा॥ त्रपूष्॥ त्रपा॥ भिदा॥ विदारणएवार्थं॥ भित्तिरन्या॥ छिदा॥ मदा॥ कृपेःसं
प्रसारणं॥ कृपा॥ चिंतिपूजिकथिकुंबिचर्चश्च॥ अङ्स्याद्युचोपवादः॥ चिंतापूजाकथाकुंबाचर्चा॥ आतश्चोपसर्गे॥ अङ्स्यात्

क्तिनोपवादः॥ प्रदा॥ उपदा॥ श्रदंतरोरुपसर्गवद्वृत्तिः॥ श्रद्धा॥ अंतर्द्धा॥ ण्यासश्रंथोयुच्॥ आकारस्यापवादः॥ कारणा॥ हारणा
आसना॥ श्रंथना॥ घट्टिवंदिविदिभ्यश्चेतिवक्तव्यं॥ घट्टना॥ वंदना॥ वेदना॥ इषेरनिच्छार्थस्य॥ अन्वेषणा॥ परेर्वा॥ पर्येष
णापरीष्टिः॥ रोगाख्यायांण्वुल्बहुलं॥ प्रच्छर्दिका॥ प्रवाहिका॥ विचर्चिका॥ कृचिल्ल॥ शिरोर्त्तिः॥ धात्वर्थनिर्देशेण्वुल्वक्तव्यः॥
आसिका॥ शायिका॥ इक्श्तिपौधातुनिर्देशे॥ पचिः॥ पचतिः॥ वर्णात्कारः॥ निर्देशइत्येव॥ अकारः॥ ककारः॥ राद्इफः॥ रेफः॥
मत्वर्थाच्छः॥ बहुलग्रहणादकारलोपः॥ मत्वर्थीयः॥ इणजादिभ्यः॥ आजिः॥ आतिः॥ इञ्वपादिभ्यः॥ वापिः॥ वासिः॥ स्वरेभेद॥ इ
कृष्यादिभ्यः॥ कृषिः॥ गिरिः॥ संज्ञायां॥ अत्रधातोर्ण्वुल्॥ उद्दालकपुष्पभंजिका॥ पर्यायार्हर्णोत्पत्तिषुण्वुच्॥ परि
प्रश्नेआख्यानेचगम्ये इञ्प्यात्ण्वुल्॥ विभाषाख्यानेपरिप्रश्नेन्येपि॥ कांत्वंकारिंकारिकांक्रियांकृत्यांकृतिंवाकार्षीः॥ सर्वां
कारिंकारिकां॥ क्रियांकृत्यांकृतिंवाकार्षं॥ एवंगणिंगणिकांगणनां॥ पाचिंपाचिकांपचांपक्तिं॥ पर्यायार्हर्णोत्पत्तिषुण्वुच्
पर्यायःपरिपाटीक्रमः॥ अर्हणमर्हः॥ योग्यता॥ पर्यायादिषुघोत्येषुण्वुच्वास्यात्॥ भवतआसिका॥ शायिका॥ अग्रगामि
का॥ भवानिक्षुभक्षिकामर्हति॥ ऋणेइक्षुभक्षिकांमेधारयसि॥ उत्पत्तौ॥ इक्षुभक्षिकाउदपादि॥ आक्रोशेनञ्यनिः॥ विभा
८

कृत्यल्युटो बहुलम् भावे कर्तरि कारके संज्ञायामिति निवृत्तं

वेति निवृत्तं ॥ नञि उपपदे अनिः स्यात् आक्रोशे ॥ अजीवनिस्ते शठ भूयात् ॥ अप्रयाणिः ॥ नपुंसके भावे क्तः ॥ ल्युट् च ॥ हसितं ॥ हसनं ॥ यो
॥सि०उ०॥ गविभाग उत्तरार्थः ॥ कर्मणि च येन संस्पर्शात्कर्तुः शरीरसुखं ॥ येन स्पृश्यमानस्य कर्तुः शरीरसुखमुत्पद्यते तस्मिन्कर्मण्युपपदे ल्युट्
॥१२७॥ स्यात् ॥ पूर्वेण सिद्धे नित्यसमासार्थं वचनं ॥ पयःपानं सुखं ॥ कर्तुरिति किं ॥ गुरोः स्नापनं सुखं ॥ नेह ॥ गुरुः कर्ता किंतु कर्म ॥ वायौ
अजेर्वीभावो वा ॥ प्रवयणं ॥ प्राजनं ॥ करणाधिकरणयोश्च ॥ ल्युट् स्यात् ॥ इध्मप्रव्रश्चनः ॥ कुठारः ॥ गोदोहनी स्थाली ॥ खलः ॥ आ
करणाधिकरणयोरित्यधिकारः ॥ अंतरदेशे ॥ अंतःशब्दादुत्तरस्य हन्तेर्नस्य णः स्यात् ॥ अंतर्हणनं ॥ देशे तु अंतर्हननो देशः ॥ अत्पूर्वस्यैव
अंतर्घ्नंति ॥ तपरः किं ॥ अंतरघानि ॥ अयनं च ॥ अयनस्य नस्य णोंतःशब्दात्परस्य ॥ अंतरयणं ॥ अदेश इत्येव ॥ अंतरयनो देशः ॥ पुंसि
संज्ञायां घः प्रायेण ॥ छादेर्घेऽद्व्युपसर्गस्य ॥ द्विप्रभृत्युपसर्गहीनस्य छादेर्ह्रस्वः स्याद्घे परे ॥ दंताश्छाद्यंतेऽनेनेति दंतच्छदः ॥ प्रच्छदः ॥
अद्व्यादि किं ॥ समुपाछादः ॥ आकुर्वंत्यस्मिन्नाकरः ॥ गोचरसंचरवहव्रजव्यजापणनिगमाश्च ॥ घांता निपात्यंते ॥ हलश्चेति वक्ष्यमाण ॥१२७॥
स्य घञोऽपवादः ॥ गावश्चरंत्यस्मिन्निति गोचरो देशः ॥ संचरंतेऽनेनेति संचरो मार्गः ॥ वहंत्यनेन वहः स्कंधः ॥ व्रजः ॥ व्यजः ॥ तालवृंतं ॥ नि
पातनाद्वीभावो न ॥ आपणः पण्यस्थानं ॥ निगच्छंत्यनेन निगमश्छंदः ॥ चात्कषः ॥ निकषः ॥ अवे तॄस्त्रोर्घञ् ॥ अवतारः कूपादेः ॥

आज भोजनः शालेयः करतं

कः

अवस्तारो जवनिका ॥ हलश्च ॥ हलंताद्घञ् स्याद्घापवादः ॥ अपमृज्यतेऽनेन व्याध्यादिरित्यपामार्गः ॥ विमार्गः समूहनी ॥ अध्यायन्यायोद्यावसंहा
राश्च ॥ अधीयतेऽस्मिन्नध्यायः ॥ नियंति उद्युवंति संहरंत्यनेनेति विग्रहः ॥ अवहाराधारावायानामुपसंख्यानं ॥ उदंकोऽनुदके ॥ उत्पूर्वादंचतेर्घञ् स्या
न्नतूदके ॥ घृतमुदच्यते उद्धृत्यतेऽस्मिन्निति घृतोदंकः ॥ चर्ममयं भांडं ॥ अनुदके किं ॥ उदकोदंचनः ॥ जालमानायः ॥ आनीयंते मत्स्या अनेने
ति आनायः ॥ जालमिति किं ॥ आनयनः ॥ खनो घ च ॥ चाद्घञ् ॥ आखनः ॥ आखानः ॥ घित्करणमन्यतोऽप्ययमिति ज्ञापनार्थं ॥ भगपदमित्यादि
खनेर्डडरेकेकवका वाच्याः ॥ आखः ॥ आखरः ॥ आखनिकः ॥ आखनिकबकः ॥ एते खनित्रवचनाः ॥ ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल् ॥ कर
णाधिकरणयोरिति निवृत्तं ॥ एषु दुःखसुखार्थेषूपपदेषु खल् स्यात्तयोरेवेति भावे कर्मणि च ॥ [illegible] ॥ ईषत्करः कटो भवता ॥ अकृच्छ्रे ॥ ईषत्करः सु
करः ॥ निमिमीलियां खलचोरात्वं नेति वाच्यं ॥ ईषन्निमयः ॥ दुष्प्रमयः ॥ सुविलयः ॥ निमयः ॥ मयः ॥ लभः ॥ उपसर्गात्खल्घञोः ॥ उपसर्गात्खल
घञोर्नुम् स्यात् ॥ ईषत्प्रलंभः ॥ दुष्प्रलंभः ॥ सुप्रलंभः ॥ उपालंभः ॥ उपसर्गात्किं ॥ ईषल्लभः ॥ लाभः ॥ न सुदुर्भ्यां केवलाभ्यां ॥ उपसर्गांतररहिताभ्यां सु
दुर्भ्यां लभेर्नुम् न स्यात्खल्घञोः ॥ सुलभं ॥ दुर्लभं ॥ केवलाभ्यां किं ॥ सुप्रलंभः ॥ अतिदुर्लंभः ॥ कथं तर्हि अतिसुलभमतिदुर्लभमिति ॥ यद्वा स्व
ती कर्मप्रवचनीयौ तदा भविष्यति ॥ कर्तृकर्मणोश्च भूकृञोः ॥ कर्तृकर्मणोरीषदादिषूपपदेषु भूकृञोः खल् स्यात् ॥ यथासंख्यं नेष्यते ॥ क
र्तृकर्मणी च धातोरव्यवधानेन प्रयोज्ये ॥ ईषदाढ्यंकरं ततः प्राक् ॥ कर्तृकर्मणोश्च्व्यर्थयोरिति वाच्यं ॥ खित्यनव्ययस्य ॥ अनाढ्येनाढ्येन

दुःखेनकृयते दुराढ्यंभवं॥ ईषदाढ्यंभवं॥ स्वाढ्यंभवं॥ दुराढ्यंकरः॥ स्वाढ्यंकरः॥ व्यर्थयोः किं॥ आढ्येन सुकृयते॥ आतो युच्॥ खलोऽप कृदंत॰
॥सि॰कौ॰॥ वादः॥ ईषत्पानः सोमो भवता॥ दुष्पानः॥ सुपानः॥ भाषायां शासियुधिदृशिधृषिमृषिभ्यो युज्वाच्यः॥ दुःशासनः॥ दुर्योधनः इत्यादि॥ षात
पदांतात्॥ नस्य णो न॥ निष्पानं॥ सर्पिष्पानं॥ षात्किं॥ निर्णयः॥ पदांतात्किं॥ कुष्णाति॥ पदे अंतः पदांतः॥ अयं सप्तमीसमासः॥ तेन हल॥ सु
॥१२४॥ सर्पिष्केण॥ आवश्यकाधमर्ण्ययोर्णिनिः॥ अवश्यंकारी॥ शतंदायी॥ कृत्याश्च॥ आवश्यकाधमर्ण्ययोरित्येव॥ अवश्यंहरिः सेव्यः॥ शतंदेयं॥
क्तिच्क्तौ च संज्ञायां॥ धातोः क्तिच्क्तौ स्यातामाशिषि संज्ञायां॥ तितनोतिनेट्॥ भवतात् भूतिः॥ नक्तिचि दीर्घश्च॥ अनिदितां नेति तनोत्या
च दीनां दीर्घानुनासिकलोपौ न स्तः क्तिचि परे॥ यंतिः॥ रंतिः॥ वंतिः॥ तंतिः॥ सनः क्तिचि लोपश्चास्यान्यतरस्यां॥ सनोतेः क्तिचि आत्वं वास्याल्लोप
श्च वा॥ सनुतात्॥ सातिः॥ सतिः॥ संतिः॥ देवा एनं देयासुः॥ देवदत्तः॥ अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वा॥ प्रतिषेधयोरलंखल्वोरुपप स्वोरु
दयोः क्त्वा स्यात्॥ प्राचांग्रहणं पूजार्थं॥ अमैवाव्ययेनेति नियमान्नोपपदसमासः॥ दो दद्घोः॥ अलंदत्त्वा॥ घुमास्था॥ पीत्वा खलु॥ ॥१२४॥
अलंखल्वोः किं॥ माकार्षीः॥ प्रतिषेधयोः किं॥ अलंकारः॥ उदीचां माङो व्यतीहारे॥ व्यतीहारेऽर्थे माङः क्त्वा स्यात्॥ अपूर्वकालार्थमिदं॥ मयतेरि
दन्यतरस्यां॥ मेङ इकारोऽन्तादेशः स्याल्ल्यपि॥ अपमित्य याचते॥ अपमाय्य॥ उदीचांग्रहणाद्यथाप्राप्तमिति॥ याचित्वा अपमयते॥ परावरयो
गे च॥ परेण पूर्वस्यावरेण परस्य योगे गम्ये धातोः क्त्वा स्यात्॥ अप्राप्य नदीं पर्वतः॥ परनदीयोगोऽत्र पर्वतस्य॥ अतिक्रम्य पर्वतं स्थिता नदी॥

अवरपर्वतयोगोऽत्र नद्याः॥ समानकर्तृकयोः पूर्वकाले॥ समानकर्तृकयोर्धात्वर्थयोः पूर्वकाले विद्यमानाद्धातोः क्त्वा स्यात्॥ क्त्वा तु अव्ययकृतो
भावे इति भावे॥ भुक्त्वा व्रजति॥ द्वित्वमतंत्रं॥ स्नात्वा भुक्त्वा पीत्वा व्रजति॥ अनुदात्तेस्त्वनुनासिकलोपः॥ विलुंनलोप्तोपि ति॥ स्वरत्यादेः स्मृकृ
क्तिनीति नित्यमिड्वा पूर्वविप्रतिषेधेन॥ स्वृत्वा॥ सूत्वा॥ धूत्वा॥ निस्कंदस्यंदोः॥ एतयोर्नलोपो न स्यात् क्त्वि परे॥ स्कंत्वा॥ उदि त्वा
तो वा॥ स्यंत्वा॥ स्यंदित्वा॥ न क्त्वा सेट्॥ सेट् क्त्वा किन्न स्यात्॥ शयित्वा॥ सेट् किं॥ कृत्वा॥ मृडमृदगुधकुषक्लिशवदवसः क्त्वा॥
एभ्यः सेट् क्त्वा कित्॥ मृडित्वा॥ क्लिशः क्केतिवेट्॥ क्लिशित्वा॥ क्लिष्ट्वा॥ उदित्वा॥ उषित्वा॥ रुदविदेति कित्वं॥ रुदित्वा॥ विदित्वा
मुषित्वा॥ गृहीत्वा॥ नोपधात्थफान्ताद्वा॥ सेट् क्त्वा कित्स्याद्वा॥ श्रथित्वा॥ श्रंथित्वा॥ गुफित्वा॥ गुंफित्वा॥ नोपधात्किं॥ कोपित्वा॥
रेफित्वा॥ वंचिलुंच्यृतश्च॥ सेट् क्त्वा किद्वा॥ वंचित्वा॥ वचित्वा॥ लुचित्वा॥ लुंचित्वा॥ ऋतित्वा॥ अर्तित्वा॥ तृषिमृषिकृशेः काश्यप
स्य॥ एभ्यः सेट् क्त्वा किद्वा॥ तृषित्वा॥ तर्षित्वा॥ मृषित्वा॥ मर्षित्वा॥ कृशित्वा॥ कर्शित्वा॥ रलो व्युपधादिति वा कित्वं॥ द्युतित्वा
द्योतित्वा॥ लिखित्वा॥ लेखित्वा॥ व्युपधात्किं॥ वर्त्तित्वा॥ रलः किं॥ सेवित्वा॥ हलादेः किं॥ एषित्वा॥ सेट् किं॥ भुक्त्वा॥ वसतिक्षुधो
रिट्॥ क्षुधित्वा॥ क्षोधित्वा॥ अंचेः पूजायामिति नित्यमिट्॥ अंचित्वा॥ गतौ तु अक्त्वा अंक्त्वापि॥ लुभो विमोहन इतीट्॥ लुभित्वा॥ ॥

वृश्चित्वा

लोभित्वा॥ विमोहने तु लुब्ध्वा॥ न क्त्वा सेट्॥ आर्धापरस्य क्त्वः कद्रू स्यात्॥ जरीत्वा॥ जरित्वा॥ उदितो वा॥ उदितः परस्य क्त्व इड्वा स्यात्॥ शमित्वा॥ अ ८६० को०
॥सि० ५०॥ नुनासिकस्य क्विझलोः क्ङितीति दीर्घः॥ शान्त्वा॥ क्षुभ्रस्विद्‌॥ पूत्वा॥ देवित्वा॥ क्रमश्च क्त्वि॥ क्रम उपधाया वा दीर्घः स्याज्झलादौ क्त्वि परे॥ क्रान्त्वा॥ क्रन्त्वा॥ सद्धिके
क्रमित्वा॥ पूङश्चेति वेट्॥ पवित्वा॥ पूत्वा॥ जान्तनशां विभाषा॥ जान्तानां नशेश्च नलोपो वा स्यात् क्त्वि परे॥ भक्त्वा॥ भंक्त्वा॥ रक्त्वा॥ रंक्त्वा॥ मस्जिनशोरि
॥१२५॥ ति नुम्॥ तस्य पक्षे लोपः॥ नष्ट्वा॥ नंष्ट्वा॥ रधादिभ्यश्चेति पक्षे नशित्वा॥ झलादाविति वाच्यं॥ नेह॥ अंजित्वा॥ उदित्वादिट्॥ पक्षे अक्त्वा॥ अंक्त्वा
जनसनखनामात्वं॥ खात्वा॥ खनित्वा॥ द्यतिस्यतीतीत्वं॥ दित्वा॥ सित्वा॥ मित्वा॥ स्थित्वा॥ दधातेर्हिः॥ हित्वा॥ जहातेश्च क्त्वि॥ हित्वा॥ हाङस्तु॥ हात्वा॥
अदो जग्धिः॥ जग्ध्वा॥ समासेऽनञ्पूर्वे क्त्वो ल्यप्॥ अव्ययपूर्वपदेऽनञ्समासे क्त्वो ल्यबादेशः स्यात्॥ तुक्॥ प्रकृत्य॥ अनञ् किं॥ अकृत्वा॥ पर्युदासा
श्रयणान्नेह॥ परमकृत्वा॥ त्वेष तुकारः सिद्धः॥ पदे लुकि च कर्तव्ये एकादेशशास्त्रमसिद्धं स्यात्॥ कोऽसिचत्॥ इह षत्वं न॥ अधीत्य॥ प्रेत्य॥ ह्रस्वस्येति तुक्॥
अनुदात्तोपदेशवनतितनोत्यादीनामनुनासिकलोपो वा ल्यपि॥ व्यवस्थितविभाषेयं॥ तेन मान्तानिटां वा॥ नान्तानिटां वनादीनां च नित्यं॥ आगत्य॥ आ
गम्य॥ प्रणत्य॥ प्रणम्य॥ प्रहत्य॥ प्रमत्य॥ प्रवत्य॥ वितत्य॥ अदो जग्धिः॥ अन्तरङ्गानपि विधीन्बहिरङ्गो ल्यब्बाधते॥ जग्धिविधौ ल्यब्ग्रहणात्॥ ॥१२५॥
तेन हित्वदत्त्वात्वेत्वदीर्घत्वमहृद्‌इडादेशो ल्यपि न॥ विधाय॥ प्रदाय॥ प्रखन्य॥ प्रस्थाय॥ प्रक्रम्य॥ आपृच्छ्य॥ प्रदीव्य॥ न ल्यपि॥ ल्यपि परे घुमास्थादीनामी
त्वं न॥ धेट्॥ प्रधाय॥ प्रमाय॥ प्रगाय॥ प्रपाय॥ प्रहाय॥ प्रसाय॥ मीनातिमिनोतीत्यात्वं॥ प्रमाय॥ निमाय॥ उपदाय॥ विभाषा लीयतेः॥ विलाय॥

विगणय्य प्रणमय्य प्रवेभिदय्य

विलीय॥ णिलोपः॥ उत्तार्य॥ विचार्य॥ ल्यपि लघुपूर्वात्॥ लघुपूर्वात्परस्य णेरयादेशः स्याल्ल्यपि॥ आपय्य॥ प्राप्य॥ क्षिय॥ क्षियो ल्यपि दीर्घः स्यात्॥
प्रक्षीय॥ ल्यपि च॥ वेञो ल्यपि संप्रसारणं न स्यात्॥ प्रवाय॥ ज्यश्च॥ प्रज्याय॥ व्यश्च॥ उपव्याय॥ विभाषा परेः॥ परेर्व्येञो वा संप्रसारणं ल्यपि॥ तुकं बाधित्वा
परत्वाद्धल इति दीर्घः॥ परिवीय॥ परिव्याय॥ कथं मुखं व्यादाय स्वपितीति॥ नेत्रे उन्मील्य हसतीति॥ व्यादानसंमीलनोत्तरकालेऽपि स्वापहासयोरनुवृ
त्तेः॥ तत्र पूर्वकालतामात्रं विवक्षितं॥ आभीक्ष्ण्ये णमुल् च॥ पौनःपुन्ये द्योत्ये क्त्वाविषये णमुल् स्यात्॥ क्त्वा च॥ द्वित्वं॥ स्मारं स्मारं नमति शिवं॥ स्मृत्वा
स्मृत्वा॥ पायं पायं॥ भोजं भोजं॥ श्रावं श्रावं॥ चिण्णमुलोर्दीर्घोऽन्यतरस्यां॥ णमुल्परे णौ वा दीर्घः॥ गामं गामं॥ गमं गमं॥ विभाषा चिण्णमुलोरिति नुम्वा॥ लंभं लंभं॥
लाभं लाभं॥ व्यवस्थितविभाषया उपसर्गस्य नित्यं नुम्॥ प्रलंभं प्रलंभं॥ जाग्रोऽविचिण्णल्ङित्सु गुणः॥ जागरं जागरं॥ ण्यन्तस्याप्येवं॥ न यद्यनाकांक्षे॥
यच्छब्दे उपपदे पूर्वकाले यत्नाभावान्न॥ यत्र पूर्वोत्तरक्रिये तद्वाक्यं॥ अपरं नाकांक्षते चेत्॥ यदयं भुंक्ते ततः पचति॥ इह क्त्वाणमुलौ न॥ अनाकांक्षे किं
यदयं भुक्त्वा व्रजति ततोऽधीते॥ विभाषाग्रेप्रथमपूर्वेषु॥ आभीक्ष्ण्य इति नानुवर्तते॥ एषूपपदेषु समानकर्तृकयोः पूर्वकाले क्त्वाणमुलौ वा स्तः॥
अग्रे भोजं व्रजति॥ अग्रे भुक्त्वा॥ प्रथमं भोजं॥ प्रथमं भुक्त्वा॥ पूर्वं भोजं॥ पूर्वं भुक्त्वा॥ पक्षे लडादयः॥ अग्रे भुंक्ते ततो व्रजति॥ आभीक्ष्ण्ये तु पूर्वं वि
प्रतिषेधनित्यमेव विधिः॥ अग्रे भोजं भोजं व्रजति॥ भुक्त्वा भुक्त्वा॥ कर्मण्याक्रोशे कृञः खमुञ्॥ कर्मण्युपपदे आक्रोशे गम्ये॥ चोरंकारमाक्रो
शति॥ करोतिरुच्चारणे॥ चोरशब्दमुच्चार्येत्यर्थः॥ स्वादुमि णमुल्॥ स्वाद्वर्थेषु कृञो णमुल् एककर्तृकयोः पूर्वकाले॥ पूर्वपदस्य मान्तत्वं निपात्यते॥

अस्वादुं स्वादुं कृत्वा भुंक्ते स्वादुंकारं भुंक्ते ॥ संपन्नंकारं ॥ लवणंकारं ॥ संपन्नलवणशब्दौ स्वादुपर्यायौ ॥ वासरूप्येण क्त्वापि ॥ स्वादुं कृत्वा भुं सि.द.त.
॥सि०७॥ क्ते ॥ अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत् ॥ एषु कृञो णमुल् स्यात् सिद्धाप्रयोगोऽस्य एवं यत्र तस्मिन् तत्र ॥ अर्थत्वात्प्रयोगानर्ह इत्यर्थः ॥
अन्यथाकारं ॥ एवंकारं ॥ कथंकारं ॥ इत्थंकारं भुंक्ते ॥ द्रुतं भुंक्ते इत्यर्थः ॥ सिद्धेति किं ॥ शिरोन्यथा कृत्वा भुंक्ते ॥ यथातथयोरसूयाप्रतिवचने ॥
॥१२८॥ कृञः सिद्धाप्रयोगे इत्येव ॥ असूयया प्रतिवचने ॥ यथाकारमहं भोक्ष्ये तथाकारं भोक्ष्ये किं तवानेन ॥ कर्मणि दृशिविदोः साकल्ये ॥ कर्मण्यु
पपदे णमुल् स्यात् ॥ कन्यादर्शं वरयति ॥ सर्वाः कन्या इत्यर्थः ॥ ब्राह्मणवेदं भोजयति ॥ यं यं ब्राह्मणं जानाति लभते विचारयति वा तं सर्वं भो
जयतीत्यर्थः ॥ यावतिविंदजीवोः ॥ यावद्वेदं भुंक्ते ॥ यावल्लभते तावदित्यर्थः ॥ यावज्जीवमधीते ॥ चर्मोदरयोः पूरेः ॥ कर्मणीत्येव ॥ चर्मपूरं स्तृ
णाति ॥ उदरपूरं भुंक्ते ॥ वर्षप्रमाण ऊलोपश्चास्यान्यतरस्यां ॥ कर्मण्युपपदे पूरेर्णमुल् स्यादूकारलोपश्च वा समुदायेन वर्षप्रमाणं गम्यं ॥ गो
ष्पदं प्रं वृष्टो देवः ॥ गोष्पदपूरं ॥ अस्येति किं ॥ उपपदस्य मा भूत् ॥ मूषिकाबिलप्रं ॥ चेले क्नोपेः ॥ चेलार्थेषु कर्मस्वपपदेषु क्नोपेर्णमुल् स्यात्
वर्षप्रमाणे ॥ चेलक्नोपं वृष्टो देवः ॥ वस्त्रक्नोपं ॥ वसनक्नोपं ॥ निमूलसमूलयोः कषः ॥ कर्मणीत्येव ॥ कषादिष्वनुप्रयोगं वक्ष्यति ॥ ॥१२८॥
अन्यथैवमित्यादौ २ अत्र प्रकरणे पूर्वकाल इति न संबध्यते ॥ निमूलकाषं कषति ॥ समूलकाषं कषति ॥ समूलं निमूलं कषतीत्यर्थः ॥ एकस्यापि धातोर्यस्य निम
लादिविशेषणसंबंधाद्भेदः ॥ तेन सामान्यविशेषणभावेन विशेषणविशेष्यभावः ॥ शुष्कचूर्णरूक्षेषु पिषः ॥ एषु कर्मसु पिषेर्णमुल् स्यात् ॥

शुष्कपेषं पिनष्टि ॥ शुष्कं पिनष्टीत्यर्थः ॥ चूर्णपेषं ॥ रूक्षपेषं ॥ समूलाकृतजीवेषु हन्कृञ्ग्रहः ॥ कर्मणीत्येव ॥ समूलघातं हंति ॥ अकृत
कारं करोति ॥ जीवग्राहं गृह्णाति ॥ जीवतीति जीवः ॥ इगुपधलक्षणकः ॥ जीवंतं गृह्णातीत्यर्थः ॥ करणे हनः ॥ पादघातं हंति ॥ पादेन हंतीत्य
र्थः ॥ यथाविध्यनुप्रयोगार्थः समानसमासार्थोयं योगः ॥ भिन्नधातुसंबंधे तु हिंसार्थानां चेति वक्ष्यते ॥ स्नेहने पिषः ॥ स्निह्यते येन
तस्मिन्करणे पिषेर्णमुल् ॥ उदपेषं पिनष्टि ॥ उदकेन पिनष्टीत्यर्थः ॥ हस्ते वर्त्तिग्रहोः ॥ हस्तार्थे करणे ॥ हस्तवर्त्तं वर्त्तयति ॥ करवर्त्तं ॥
हस्तेनांगुलिकां करोतीत्यर्थः ॥ हस्तग्राहं गृह्णाति ॥ करग्राहं गृह्णाति ॥ पाणिग्राहं ॥ स्वे पुषः ॥ करणे इत्येव ॥ स्व इत्यर्थग्रहणं ॥ तेन स्व
रूपे पर्यायविशेषेषु च णमुल् ॥ स्वपोषं पुष्णाति ॥ धनपोषं ॥ गोपोषं ॥ अधिकरणे बंधः ॥ चक्रबंधं बध्नाति ॥ चक्रे बध्नातीत्यर्थः ॥ सं
ज्ञायां ॥ बध्नातेर्णमुल् संज्ञायां ॥ क्रौंचबंधं बद्धः ॥ मयूरिकाबंधं ॥ अट्टालिकाबंधं ॥ बंधविशेषाणां संज्ञा एताः ॥ कर्त्रोर्जीवपुरुषयोर्नशि
वहोः ॥ जीवनाशं नश्यति ॥ पुरुषवाहं वहति ॥ पुरुषो वहतीत्यर्थः ॥ ऊर्ध्वे शुषिपूरोः ॥ ऊर्ध्वे कर्त्तरि ॥ ऊर्ध्वशोषं शुष्यति ॥ वृक्षादिरूर्ध्व ए
व तिष्ठन्शुष्यतीत्यर्थः ॥ ऊर्ध्वपूरं पूरयति ॥ ऊर्ध्वमुख एव घटादिः ॥ वर्षोदकादिना पूर्णो भवतीत्यर्थः ॥ उपमाने कर्मणि च ॥ घृतनिधायं निहितं ॥
रि ॥ घृतनिधायं निहितं जलं ॥ घृतमिव सुरक्षितमित्यर्थः ॥ अजकनाशं नष्टः ॥ अजक एव नष्टः ॥ कषादिषु यथाविध्यनुप्रयोगः ॥

यस्मात्स्वमुत्कृष्टः स एवानुप्रयोक्तव्य इत्यर्थः ॥ तथैवोदाहृतं ॥ उपदंशस्तृतीयायां ॥ इतः प्रभृति पूर्वकाल इति संबध्यते ॥ तृतीया कृदंत॰
॥सि॰कौ॰॥ प्रभृतीन्यन्यतरस्यामिति वा समासः ॥ मूलकोपदंशं भुंक्ते ॥ मूलकेनोपदंशं ॥ दंश्यमानस्य मूलकस्य भुजिं प्रति करणत्वात्तृ
तीया ॥ यद्यपि उपदंशिना सह न शब्दः संबंधः ॥ तथाप्यार्थोस्त्येव ॥ कर्मत्वात् ॥ एतावतैव सामर्थ्येन प्रत्ययः समासश्च ॥ तृती
॥१२९॥ यायामिति वचनसामर्थ्यात् ॥ हिंसार्थानां च समानकर्मकाणां ॥ तृतीयांते उपपदे अनुप्रयोगधातुना समानकर्मकाद्धिंसा
र्थान्णमुल्स्यात् ॥ दंडोपघातं गाः कालयति ॥ दंडेन घातं दंडघातं ॥ समानकर्मकाणां किं ॥ दंडेन चोरमाहत्य गाः काल
यति ॥ सप्तम्यां चोपपीडरुधकर्षः ॥ उपपूर्वेभ्यः पीडादिभ्यः सप्तम्यंते तृतीयांते चोपपदे णमुल्स्यात् ॥ पार्श्वोपपीडं शेते
पार्श्वयोरुपपीडं पार्श्वाभ्यामुपपीडं वा ॥ व्रजोपरोधं गाः स्थापयति ॥ व्रजे नोपरोधं व्रजेनोपरोधं ॥ पाण्युपकर्षं धानाः सं
गृह्णाति ॥ पाणावुपकर्षं पाणिनोपकर्षं ॥ समासत्तौ ॥ तृतीयासप्तम्योर्णमुल्स्यात् संनिकर्षे गम्यमाने ॥ केशग्राहं
यु ध्यंते ॥ केशेषु गृहीत्वा ॥ हस्तग्राहं ॥ हस्तेन गृहीत्वा ॥ प्रमाणे च ॥ तृतीयासप्तम्योरित्येव ॥ द्व्यंगुलोत्कर्षं खं ॥१२९॥
डिनत्ति ॥ द्व्यंगुलेन द्व्यंगुले वोत्कर्षं ॥ अपादाने परीप्सायां ॥ परीप्सा त्वरा ॥ शय्योत्थायं धावति ॥ द्वितीयायां च ॥

परीप्सायामित्येव ॥ यष्टिग्राहं युध्यंते ॥ लोष्टग्राहं ॥ अपगुरो णमुलि ॥ गुरी उद्यमने इत्यस्यैचो वा आत्स्यात् णमुलि ॥ अस्यपगोरं युध्यं
ते ॥ अस्यपगारं ॥ स्वांगेऽध्रुवे ॥ द्वितीयायामित्येव ॥ अध्रुवे स्वांगे द्वितीयांते धातोर्णमुल् ॥ भ्रूविक्षेपं कथयति ॥ भ्रुवौ विक्षेपं ॥ अध्रुवे किं ॥
शिर उत्क्षिप्य ॥ येन विना न जीवनं तद्ध्रुवं ॥ परिक्लिश्यमाने च ॥ सर्वतो विबाध्यमाने स्वांगे द्वितीयांते णमुल् ॥ उरः प्रतिपेषं युध्यंते ॥ कृत्स्न
मुरः पीडयंत इत्यर्थः ॥ उरोविदारं प्र तिचस्करे नखैः ॥ ध्रुवार्थमिदं ॥ विशिपतिपदिस्कंदां व्याप्यमानासेव्यमानयोः ॥ द्वितीयायामि
त्येव ॥ द्वितीयांते उपपदे विशादिभ्यो णमुल् व्याप्यमाने ॥ आसेव्यमाने चार्थे गम्ये ॥ गेहादिद्रव्याणां विशादिक्रियाभिः साकल्येन सं
बंधो व्याप्तिः ॥ क्रियायाः पौनःपुन्यमासेवा ॥ नित्यवीप्सयोरिति द्वित्वं न भवति ॥ समासेनैव तस्य भावस्य तयोरुक्तत्वात् ॥ यद्यप्यासे
वायां ष्वप्येण मुल् उक्त एव तथाप्युपपदसंज्ञार्थमासेवायामिह पुनर्विधिः ॥ गेहानुप्रवेशमास्ते ॥ गेहं गेहमनुप्रवेशं ॥ गेहमनुप्रवेशमनु
प्रवेशं ॥ एवं गेहानुप्रपातं ॥ गेहानुप्रपादं ॥ ~~गेहानुप्रपातं~~ ॥ गेहानुस्कंदं ॥ असमासे तु गेहस्य णमुलं तस्य च पर्यायेण द्वित्वं ॥ अस्य
तितृषोः क्रियांतरे कालेषु ॥ क्रियामंतरयति व्यवधत्त इति क्रियांतरस्तस्मिन्धात्वर्थे वर्त्तमानादस्यतेस्तृष्यतेश्च कालवाचिषु
द्वितीयांतेषूपपदेषु णमुल्स्यात् ॥ द्व्यहात्यासं गाः पाययति ॥ द्व्यहमत्यासं ॥ द्व्यहतर्षं ॥ द्व्यहं तर्षं ॥ अत्यसनेन तर्षणेन च गवां पानक्रि

यान्यवधीयते ॥ अघपाययित्वाध्यहमतिक्रम्य पुनः पाययतीत्यर्थः ॥ नाम्न्यादिशिग्रहोः ॥ द्वितीयायामित्येव ॥ नामादेशमाचष्टे ॥ नामग्राह कृदं० समाप्ति
॥ सि० कौ० ॥ माह्वयति ॥ अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ ॥ अयथाभिप्रेताख्यानं नाम अप्रियस्योच्चैः प्रियस्य नीचैः कथनं ॥ उच्चैः कृत्य ॥
उच्चैः कृत्वा ॥ उच्चैःकारं ॥ अप्रियमाचष्टे ॥ नीचैः कृत्य ॥ नीचैः कृत्वा ॥ नीचैःकारं ॥ प्रियं ब्रूते ॥ तिर्यच्यपवर्गे ॥ तिर्यक्शब्दे उपपदे कृञः क्त्वाण
॥१२८॥ मुलौ स्तः ॥ तिर्यक्कृत्य गतः ॥ तिर्यक्कृत्वा ॥ स्वाङ्गे तस्प्रत्यये कृभ्वोः ॥ मुखतः कृत्य गतः ॥ मुखतः कृत्वा ॥ मुखतःकारं ॥ मुखतोभूय ॥ मुख
तोभूत्वा ॥ मुखतोभावं ॥ नाधार्थप्रत्यये च्व्यर्थे ॥ नाधार्थप्रत्ययान्ते च्व्यर्थविषये उपपदे कृभ्वोः क्त्वाणमुलौ स्तः ॥ अनानानानाकृत्वा ॥
नानाकृत्य ॥ नानाकारं ॥ नानाभूय ॥ नानाभूत्वा ॥ नानाभावं ॥ एकधाकृत्वा ॥ अनेकद्रव्यमेकंकृत्वा ॥ एकधाभूय ॥ एकधाभूत्वा ॥ ए
कधाभावं ॥ एकधाकृत्वा ॥ एकधाकृत्य ॥ एकधाकारं ॥ प्रत्ययग्रहणं किं ॥ हिरुक्कृत्वा ॥ पृथग्भूत्वा ॥ तूष्णीमि भुवः ॥ तूष्णींशब्दे भुवः क्त्वा
णमुलौ स्तः ॥ तूष्णींभूत्वा ॥ तूष्णींभावं ॥ अन्वच्यानुलोम्ये ॥ अन्वक्शब्दे उपपदे भुवः क्त्वाणमुलौ स्तः आनुकूल्ये गम्यमाने ॥ अन्व ॥१२८॥
ग्भूयास्ते ॥ अन्वग्भूत्वा ॥ अन्वग्भावं ॥ अग्रतः पार्श्वतः पृष्ठतो वा अनुकूलो भूत्वा आस्त इत्यर्थः ॥ आनुलोम्ये किं ॥ अन्वग्भूत्वा तिष्ठति ॥ पृ
ष्ठतो भूत्वेत्यर्थः ॥ इह लौकिकशब्दानां दिङ्मात्रमिह दर्शितं ॥ विस्तरस्तु यथाशास्त्रं दर्शितः शब्दकौस्तुभे ॥ १ ॥ ॥ इति कृत्प्रक्रिया ॥ ॥